Published by Janardan Sakharam Kudalkar, M. A., LL. B., Curator of State Libraries, Baroda, for the Baroda Government, and Printed by Manilal Itcharam Desai, at
The Gujarati Printing Press, No. 8, Sassoon Buildings, Circle, Fort, Bombay.

Price Rs. 2-4-0

भूमिका

अस्य गद्यपद्यभूयिष्टस्य चम्पूप्रबन्धस्य प्रणेता कविस्सोड्ढलो नाम्ना। जन्म चास्य कायस्थवंशे। कायस्थवंशश्चाधुनाऽप्यनेकधा तत्र तत्र प्ररूढः प्रवर्तते। कविरयमात्मनोऽन्वयस्य मूलपुरुषं, भ्रातरं शिलादित्यस्य, नाम्ना कलादित्यं, श्रीकण्ठपार्श्वपरिचरस्य कायस्थसंज्ञस्य गणविशेषस्यावतारं निरूपयन्नारम्भे स्तौति। विशेषयति च निजवंशं "वालभो नाम कायस्थवंश (पृ.११,प.२८)" इति। यस्मात् वलभीनगर्यामासीदस्य वंशस्य कूटस्थः कलादित्यस्तस्माद्वालभ इति विशेषः। निबन्धारम्भे वंशमात्मनः प्रपञ्चयंस्तथा शिलादित्यकलादित्ययोस्संवादे "देव क्षत्रियादुत्पन्न (पृ.६,प.१२)" इत्यादि कलादित्यवचनमनुवदन् व्यनक्त्यात्मनस्संभूतिं क्षत्रियान्ववाये।

अयं च कविनोदाहृतस्स्वान्वयक्रमः। कूटस्थः कलादित्यः। तस्यान्वये समुद्भूत् चण्डपतिः (१)-तस्य सूनुः सोल्लपेयः (२) तस्य सूनुस्सूरः (३) तस्य सूनुः कविरसौ सोड्ढलः (४)।

जन्मास्य कवेर्गुर्जरस्य दक्षिणविभागे लाटदेशे। यदयं कविरारम्भ एवमाह, "तस्मिन्नशेषभुवनविख्यातनामनि महावंशे दलितकलिकलङ्कसंहतिरमृतमयाकारकमनीयो नर्मदाप्रवाह इव भूतिलोकमधिष्टितो लाटदेशमासीद्धुमेशवंशावतीर्णस्य महात्मनश्चण्डपतेरङ्गजन्मा सोल्लपेयो नाम"-(पृ. १२. प. ६)ति। तत्रैवानुपदमिदमप्याह "प्रथमतः पुत्रेषु पन्नावतीसूनुस्सोड्ढलो नाम, स खलु स्वर्लोकशोभाविलुण्ठिनं लाटदेशमध्यासित" (पृ. १२. प. ११) इति।

अथ लाटदेशे कस्मिन्नगरे ग्रामे वास्य जन्म? इदं तु न निश्चेतुं शक्यते।

परं जन्मदेश एवास्य नावासोऽभूत्। अपगते कौमारे परिसमाप्ते च विद्याभ्यासे केनापि कालयोगेनायं कोङ्कणदेशे स्थानकं नाम नगरमुपगम्यावस्थित इति विज्ञायते। इदं च कविरेव "कालपरिवर्तितावस्थितिक्रमेण च मृगमदपत्रभङ्गिमयं कोङ्कणभुवो मण्डनमिवोद्यानवनविलीनपरिसरं स्थानकं नाम राजधानीनगरमागत्यावस्थित (पृ. १२. प. १४)" इति वर्णयति। इदं च स्थानकमधुना ठाणेति ख्यायते। कविरयमात्मनो वृत्तं वर्णयन् कोङ्कणदेशाधिपतेश्छित्तराजस्य नागार्जुनस्य मुम्मणिराजस्य तथा लाटदेशाधिपतेर्वत्सराजस्य च समकालिकतामात्मनो ज्ञापयति। तथा चास्य वचनम्—"संवर्गितश्छित्तराजेन संभूषितो नागार्जुनेन संमानितो मुम्मणिनरेश्वरेणेति सोड्ढलेन ग्रामोपकुलताद्यसंपदा राजत्रयेण प्रतिपाद्यमानः सकलेन्द्रसदसि प्रतिष्ठामाससाद" (पृ. १२. प. १७) "अलङ्कारमाणिक्यं चौलुक्यवंशस्य सर्वाशर्माकरं लाटदेशाधिपः, कोङ्कणेन्द्रस्वतनुर्वीर्याति वत्सराजमनुप्रणयपरिपालितानन्तसङ्गतिसुखोपभोगार्थमाहूय नीतो जगाम (पृ. १२.प.२६)" इति च। तदेते छित्तराजनागार्जुनमुम्मणिनरेन्द्रास्त्रयः परस्परमेकोदराः क्रमाग्रजाः क्रमेण कोङ्कणदेशाधिपत्यमन्वभूवन्। एतेषु सर्वतो ज्यायांश्छित्तराजः अष्टचत्वारिंशदुत्तरनवशततमे (९४८) शकाब्दे (1026 A. D.) नोर (नोर) ग्रामे भूदानस्यैकं विशालं ताम्रपत्रं ताम्रपत्रे उल्लेखयत्। इदं च लेखः इण्डियन् एन्टीक्वेरी इत्यस्मिन् (Indian Antiquary, Vol. 5, Page 277) प्रकाशितः। तदनन्तरं तदनुजो मुम्मणिराजः द्व्यशीत्युत्तरनवशततमे शकाब्दे (९८२ 1060 A. D.) अम्बरनाथ (अम्बरनाथ) मन्दिरं प्रतिष्ठाप्य शिलायां लेखितवान्। इदं च लेखः बॉम्बे ब्रांच रॉयल एशियाटिक

स चायं सोड्ढलो बालभाव एव, प्रेयुषि पितरि परलोकं परिरक्षितो मातुलेन गङ्गाधरेण चन्द्रनाम्नो गुरोर्विद्यामधिगत्य विद्याभ्याससमकालमेव समुन्मिषितया कविताशक्त्याऽन्वहमेधमानः कवीन्द्रसदसि प्रतिष्ठामाससाद । अभूच्च सन्मानपात्रं सिलहारवंशसमुद्भवानां कोङ्कणनरेन्द्राणां छित्तराजप्रभृतीनां सोदराणाम्, अथ कदाचिदाहूतो लाटदेशाधीश्वरं चौलुक्यकुलाभरणं वत्सराजमुपजग्मौ । तत्र प्रणयपरिणतानन्तसङ्गतिसुखमन्वभूत् । तस्य च सभायां काव्यगोष्ठीषु विलासमात्मनः कवितायाः प्रकाशयन्नासीत् । अथ कदाचित् प्रसङ्गात् वणिक्पुत्रोपदेशापदेशेनात्मानमुपलक्षीकृत्य वत्सराजेन पठिताम्, " एकैकशः प्रकीर्णैः.............................कोऽपि परिभोगः । " (पृ. १३. प. ४) इतीमामार्यामुपश्रुत्य वत्सराजस्याशयमालक्ष्य प्रावर्तत कर्तुं काव्यनिबन्धमेकम् । कतिपयैरेवाहोभिरखिलसहृदयहृदयाह्लादकं कविकुलावतंसोपलालनीयमाकलितापूर्वकथासन्दर्भं चंपूप्रबन्धमिमं व्यरचयत् । अथ यान्यासन्नात्मनो मित्राणि, चन्दनाचार्यश्श्वेताम्बरसूरिः, श्वेताम्बरसूरिरपरश्च विजयसिंहाचार्यः, दिगम्बराचार्यो महाकीर्त्तिः, इन्द्रनामा चापरः, तैरेतैः विलोक्यमानप्रबन्धः प्रशस्यमानगुणश्च विश्राम्यन् कियन्त्येव दिनानि यावदास्ते तावदन्तराल एवाहूतो मुम्मणिमहाराजेन कोङ्कणाधीश्वरेण श्रावितनिजप्रबन्धस्तेन सन्मानितः परां निर्वृत्तिमवाप ।

मन्ये कवीन्द्रोऽयं शोभते गजेन्द्र इव मदधारया । यदयं कविरात्मनो विभूतिं जन्मतो धनतो विद्यातश्च वर्णयन् स्वकुलकूटस्थं सौराष्ट्रदेशाधीश्वरस्य शिलादित्यस्य भ्रातरं कलादित्यं अष्टमूर्तेः कायानुगतस्य कायस्थनाम्नोऽनुचरगणस्यावतारं वर्णयन् पूज्यपदमधिरोपयति कायस्थवंशम् । विशेषतः श्लाघते च कुलपुरुषान् । प्रकाशयति चानन्यसामान्यां धनसंपत्तिमात्मनः " विभूत्या च लाटदेशान्तःपातिविषयाणा (पृ. प. १५२) " मित्यादिना । कल्पयति चैतत्प्रबन्धश्रवणतो बाणस्यापि शापनिवृत्तिम्, बाणकृतमभिनन्दनं च । अथ चान्ते वाल्मीकिप्रभृतिकविरत्नहारे ग्रथयति चात्मानमतिमनोहरेण वाणीगुणेन ।

कविरयं बाणमनुसरति च्छायया । शब्दमाधुर्यमर्थमाधुर्यमप्यस्य सर्वतो गरीयः । अन्यैवास्योत्प्रेक्षणशैली । नूनमस्य कवेर्वाचि मधु क्षरति किञ्चन । अत्रोदाह्रियन्ते कतिचन पद्यानि निदर्शनतया ।


" अम्भःकणास्त्रशतचर्चितपत्रहस्तसंसक्तपङ्कजमुखी कुमुदोत्सवेषु ।
मुद्रावरुद्धमधुपध्वनितैरिवार्कशोकातुरा सरसि नीरजिनी विरौति ॥ "
" कमलिनी भुवनान्तरिते रवौ व्यपगतालिकलापशिरोरुहा ।
परिदधे विधवेव सुधाकरद्युतिवितानमिषेण सितांशुकम् ॥ "
अन्धत्वमाहितं मन्ये तमसा दीपकेष्वपि ।
अतो हस्तधृताः स्त्रीभिः सञ्चार्यन्ते गृहेष्वमी ॥
चान्द्रं महो मण्डलभाजनस्थं
दुग्धं यथा यामवतीमहिष्याः ।
वियोगिनां हृद्दहनोग्रतापे-
रुल्लासितं व्योमतले लुलोठ ॥

कथायास्सारस्तु—आसीत् प्रतिष्ठाननगरे राजा मलयवाहनः । तेन नागलोकाधिपतेः

[illegible] त्रिभुवनैक रत्नाकरदुहिता लक्ष्मीरूपकल्पेति । [illegible] कविना [illegible] स्वनिर्दर्पणे सङ्कीर्तितेति ।

[illegible] पदानि कानिचित्, यथा " भानुमतेव पद्मः" (पृ. १५४) [illegible] । सौन्दर्ये [illegible] च " [illegible]" (पृ. ८५) इति । अपि [illegible], परे तु संस्कृत एव गणयन्ति । तथा [illegible] च [illegible] प्रयोगास्तु न दृष्टपूर्वोऽस्माभिः, देशे तु तत्र तत्र व्याहृतिपदे ज्ञा, [illegible] । [illegible] विलोकनेन भाष्यम्, शोभते नाम कवीनामेतत् । [illegible] ।

INTRODUCTION



Author's Ancestry—Soddhala, the author of this composition which is called "Champoo" in Sanskrit, was, as can be seen from the evidence furnished by himself in his autobiographical statements, born in the country called Lâta, the southern part of Gujarat, described by him as the land watered by the river Narmadâ. He belonged to the Kâyastha caste. He traces his descent from Śilâditya's brother Kalâditya, whom he praises as an incarnation of the Gaṇa, called Kâyastha, a follower of God Śiva. By describing Kalâditya as being born in the Kshatriya caste he takes pride in his own descent as a Kshatriya. Thus his lineage in brief is this:—In the Vâlabha branch of the Kâyastha caste, of which Kalâditya was the founder, he was born of Soora, who was the son of Sollapeya, who again was the son of Chandrapati.

Author's Life and Time—The internal evidence does not enable us to ascertain the exact place of his birth; still this much is pretty certain that he did not flourish in the place where he was born. He lost his father when he was a mere boy and was brought up by his maternal uncle Gangâdhara. He got his education from a teacher by name Chandra and after finishing his studies, through some coincidence of circumstances, he went to Sthânaka (modern Thânâ), then the capital-city of the kingdom of Konkaṇa. There he flourished at the court of the three royal brothers, Ćchittarâja, Nâgârjuna and Mummuṇirâja, who succeeded one another as kings of Konkaṇa. He describes himself as a contemporary of these three kings, as also of Vatsarâja, the Châlukya King of Lâta, who also honoured him by inviting him at his court.

Ćchittarâja, the eldest brother, who came to the throne of Konkaṇa first, engraved a metal-plate inscription dated 1026 A. D. (Vide *Indian Antiquary*, Part V. page 277). Mummuṇirâja, the youngest brother, who came to the throne last, also engraved a stone-tablet in 1060 A. D. (Vide *Journal of the Bombay Branch, Royal Asiatic Society*, Part XII page 329). As our author was a contemporary both of Ćchittarâja and Mummuṇirâja, we can infer with certainty that he must have flourished in the eleventh century of the Christian era.

Date of Composition—The present work seems very likely to have been composed between 1026 A. D. and 1050 A. D. The author by his words-'स्थांत्वात् सनागतेन' (p. 156. l. 2)-suggests that the work was finished while Vatsarâja, the King of Lâta country, was alive. This Vatsarâja was very probably dead before 1050 A. D., because his son Trilochanapâla made a gift-deed in 1050 A. D. in which he (Trilochanapâla) designates himself as the king, which he can do only if Vatsarâja was dead. On the other hand it appears that the work was written after 1026 A. D., for he writes that within

शिखण्डतिलकस्य तनया कन्यारत्नमुदयसुन्दरी विष्णुनेव रत्नाकरदुहिता लक्ष्मीरुपलब्धेति संभाव्यते कथेयमुदयसुन्दर्याः कविना समवलोक्य स्वमतिदर्पणे सङ्गृहीतेति ।


प्रयुङ्क्ते चायं कविर्विरलप्रयोगानि पदानि क्वचित्क्वचित्, यथा " भानुमतेव पद्मः" (पृ. १५ इति पुल्लिङ्गपद्मशब्दम् । सौन्दर्यार्थे लडहशब्दं च " लडहललाटीकटाक्षैः" (पृ. ८५) इति । अ च लटभशब्दस्य विकृतं रूपं देशीयमिति केचित्, परं तु संस्कृत एव गणयन्ति । तथा छटकशब्दं विप्रुषि, अस्य शब्दस्यास्मिन्नर्थे प्रयोगस्तु न दृष्टपूर्वोऽस्माभिः, देशे तु तत्र तत्र व्यवहृतिपदं छा छाण्ट, इत्यस्ति प्रयोगः । प्रायश्छटाशब्दस्य विकृतेनानेन भाव्यम्, शोभते नाम कवीनामेतन् निरङ्कुशा हि कवयः ।

अयं च चम्पूप्रबन्धः परिशील्यमानः पुराऽयं गूर्जरदेशो मधुमयफणितीनां वश्यवचसां वा भासादिभिस्समरेखामनुविशतां महाकवीनामास्पदमभूदित्यवगमयति । कीर्त्तिशेषेण श्रीमता चि नलालदलाल (Late Mr. C. D. Dalal, M. A. Librarian, Central Librar Baroda.) महाशयेन पुस्तकमेकमेवास्य शेठवाडीलाल हीराचन्दद्वारेण पाटणनगरस्थपार्श्वना पुस्तकालयतः (loan) प्रत्यर्पणं प्रतिश्रुत्य संपादितम् । महताऽपि प्रयत्नेन पुस्तकान्तरं नालभ्यत एकमेव पुस्तकमिदमादर्शतयाऽवलम्ब्य तेनैव महाशयेन चत्वारिंशत्पत्रपरिमितो निबन्धस्यैकांश मुद्रणपदं प्रापितः । एतस्मिन्नन्तर एव विधिविपरिणामेन कालस्य वशमापद्यत । अनेन च पण्डि प्रकाण्डेन काव्यमीमांसाप्रभृतयो बहवो निबन्धास्सम्यक् परिशोध्य प्रकाशिताः । अस्य चाल्पीयस्ये वयसि समुत्पन्नं निधनं विशेषतो वटपत्तनराजकीयपुस्तकालयस्य गैर्वाणांशे हानये, अथ का प्रभवति किमनुशोकेन । अथ तत्राविक्लवैरवशेषपरिशोधनेऽनुयुक्तेन मया यथामति परिशोधितोऽ निबन्धः । परमेकमेव पुस्तकम्, प्रायस्संवलितमशुद्धेन, मतिश्च नत्सावधिः, स्यान्नाम स्खालित्यम क्षन्तुमर्हन्ति पण्डिताः । अथ चादर्शपुस्तके क्वचित्क्वचित्पदानि वाक्यानि च भूयो विगलितानि तेषां चानतिकठिनेऽपि पदे स्वमतितः पूरणं महाकवेर्गभीरहृदयस्यास्य वाङ्मधुनिष्यन्दे दूषणमापादयं दिति तत्र यत्नो विशेषतो न व्यवधायि ।

यदि स्याद्गुणलेशोऽत्र तुष्यन्त्येव तु पण्डिताः ।
तुष्याम्यहं तु दोषेण ज्ञापितेनेह बोधितः ॥

एं. कृष्णमाचार्य.
प्रधानाध्यापक,
संस्कृत पाठशाला वृत्तालय (वडताल)

INTRODUCTION



Author's Ancestry—Soddhala, the author of this composition which is called "Champoo" in Sanskrit, was, as can be seen from the evidence furnished by himself in his autobiographical statements, born in the country called Lâta, the southern part of Gujarat, described by him as the land watered by the river Narmadâ. He belonged to the Kâyastha caste. He traces his descent from Śilâditya's brother Kalâditya, whom he praises as an incarnation of the Gaṇa, called Kâyastha, a follower of God Śiva. By describing Kalâditya as being born in the Kshatriya caste he takes pride in his own descent as a Kshatriya. Thus his lineage in brief is this:—In the Vâlabha branch of the Kâyastha caste, of which Kalâditya was the founder, he was born of Soora, who was the son of Sollapeya, who again was the son of Chandrapati.

Author's Life and Time—The internal evidence does not enable us to ascertain the exact place of his birth; still this much is pretty certain that he did not flourish in the place where he was born. He lost his father when he was a mere boy and was brought up by his maternal uncle Gangâdhara. He got his education from a teacher by name Chandra and after finishing his studies, through some coincidence of circumstances, he went to Sthânaka (modern Thânâ), then the capital-city of the kingdom of Konkaṇa. There he flourished at the court of the three royal brothers, Ćchittarâja, Nâgârjuna and Mummuṇirâja, who succeeded one another as kings of Konkaṇa. He describes himself as a contemporary of these three kings, as also of Vatsarâja, the Châlukya King of Lâta, who also honoured him by inviting him at his court.

Ćchittarâja, the eldest brother, who came to the throne of Konkaṇa first, engraved a metal-plate inscription dated 1026 A. D. (Vide *Indian Antiquary*, Part V. page 277). Mummuṇirâja, the youngest brother, who came to the throne last, also engraved a stone-tablet in 1060 A. D. (Vide *Journal of the Bombay Branch, Royal Asiatic Society*, Part XII page 329). As our author was a contemporary both of Ćchittarâja and Mummuṇirâja, we can infer with certainty that he must have flourished in the eleventh century of the Christian era.

Date of Composition—The present work seems very likely to have been composed between 1026 A. D. and 1050 A. D. The author by his words-'क्ष्मापालात् वत्सराजेन' (p. 156. l. 2)–suggests that the work was finished while Vatsarâja, the King of Lâta country, was alive. This Vatsarâja was very probably dead before 1050 A. D., because his son Trilochanapâla made a gift-deed in 1050 A. D. in which he (Trilochanapâla) designates himself as the king, which he can do only if Vatsarâja was dead. On the other hand it appears that the work was written after 1026 A. D., for he writes that within

a few days after the work was completed, it was read before Mummuṇirâja, who, in appreciation thereof, rewarded him handsomely. This fact, therefore, of the work being read before Mummuṇirâja and of its being appreciated by him enables us to infer that Mummuṇirâja must have been on the throne then and the reward was given by him, not as a brother of the king but as the actual ruler which he became after 1026 A. D.

Incidents in Author's Life—Even as a student our author made his genius recognised by other poets. It appears that, while residing in great honour at the court of the kings of Konkaṇa, he was, on one occasion, invited at his court by Vatsarâja, king of Lâta. Our author was fortunate enough to win the admiration as well as the royal patronage of Vatsarâja. This Vatsarâja, once by way of a taunt to the poet, recited a verse professing apparently to give admonition to a merchant in the words 'एकैकशः प्रकीर्णः......कोऽपि परिभोगः' (p. 13. l. 4). Hearing this and fully grasping the intention of the king, the author at once set about to compose a work and within a few days brought out this charming and unique poetic production.

Author's Special Merits—The glowing terms in which he describes his position and powers, his great anxiety to trace his descent from an exalted ancestor of the Kshatriya race born of an immediate follower of God Śiva, the language in which he praises his forefathers, his reference to his own self as an equal to Bâṇa and Vâlmiki–all go to prove that the author is sublimely proud of his merits. And yet his pride is not unbecoming. He is indeed a charming writer and a worthy follower of Bâṇa. In sweetness and and melody of language and beauty of ideas, he is uniquely happy and his creative fancy is peculiarly his own. In him Gujarat can well take the pride of having produced a literary gem of the standard of Bâṇa.

Ms.-Materials—The solitary manuscript on which the present edition of this work is based was secured by the late lamented Mr. Chimanlal D. Dalal, M. A., of the Baroda Central Library, through Sheth Vadilal Hirachand, from the Library of the Pârsvanâtha Bhandar of Pâtan in the Baroda State. He tried his best to secure more manuscripts of the work, but could not succeed. At last he based his text on this only available Manuscript and while he was seeing through the press a part of this work, the cruel hand of death snatched him away prematurely. The rest of the task was consequently entrusted to me by the Curator of State Libraries, Baroda, under whose supervision the "Gaekwad's Oriental Series" is edited. I leave it therefore to appreciative readers to judge how far I have been successful in my task, requesting them at the same time to consider that the Manuscript of the text was only one and full of mistakes and several omissions, and that these latter have now been corrected by me from mere conjectures of my mind which is indeed far inferior to that of our great author.





सोड्ढलविरचिता

उदयसुन्दरी कथा।

विश्वाभिधे महति धामनि मूलहेतुः
स्तम्भस्त्रिभूमिसुभगे जयति त्रिनेत्रः।
देवी गिरीन्द्रदुहिता घटिता यदङ्ग-
भागे वरीयसि विराजति शालभञ्जी॥
देवस्य पङ्कजभुवो वदनात्प्रसूता
वाचाम्पतिर्भगवती जगतीं पुनातु।
या वाङ्मयं सपदि विश्वमुदीक्षयन्ती
तारेव तिष्ठति मनोनयने कवीनाम्॥
दीपैः किमल्परुचिभिः शशिना जडेन
किं किं च तेन रविणाऽपि दिनोदितेन।
यत्रैष सूक्तकरदर्शितविश्वसृष्टि-
रास्ते नवः कविरिति प्रवणो मणीन्द्रः॥
अर्थैरसारमपरिस्फुटवर्णजातं
ये शब्दमात्र......विपञ्चयन्ति। मिह साधु
स्वेनामुनैव जगति प्रथिता गुणेन
सत्यं निसर्गतरलाः कवयो वयस्ते॥
ते यान्ति हन्त कवयः... सफलां विभूतिम्
......रपरैर्भिरसनैरनिरस्तदर्पाः।
नीरन्ध्रसंधिघटितैरचलैर्वचोभि-
र्ये विस्तृतं विरचयन्ति रसप्रबन्धम्॥
राज्ञां सभासु परिष......णां
गोष्ठीषु चाखिलसुभाषितभावकानाम्।

मेकासने समुपवेशयताऽभिनन्दम् ॥

देव्या ''''वलधामनि हंसपृष्ठे
लीलायितं चरणयोर्द्वितयेन यस्याः ।
सा किं रमामिषनिषण्णविलोचनेषु
चिह्नाविपेषु ''''''दं करोति ॥

योऽप्यस्ति लोकतिलकः क्षितिपेषु कश्चि-
देकः कृती स्वयमसावनुपासितोऽपि ।
निर्मथ्य पत्त्ररथनाथ इव द्विजिह्वान्
क्षिप्त्वामृतं नभसि नेष्यति काव्यकुम्भम् ॥

ये नाम केचिदमुना कवितारसेन
व्यासादयः कृतधियो भुवनेषु सिद्धाः ।
तेषामुपासितपदाः कवयः किमन्य-
दासादयन्ति परमत्र सुवर्णसिद्धिम् ॥

बाणस्य हर्षचरिते निशितामुदीक्ष्य
शक्तिं न केऽत्र कवितास्त्रमदं त्यजन्ति ।
मान्द्यं न कस्य च कवेरिह कालिदास-
वाचां रसेन रसितस्य भवत्यधृष्यम् ॥

मूढेन पश्यत मया नु यशःकृतेऽद्य
क्षोदेष्वनीश्वरमहो सृजता प्रबन्धम् ।
रत्नं निकामदृढरोहणशैलमग्न-
मुद्धर्तुमेष स मृणालनलो गृहीतः ॥

तदिममतादृग्गुणमपि यः किल भुवनैकबन्धुरमलात्मा ।
सुकृती स खलु कविस्तं संगृह्यतया साधुरादत्ताम् ॥

सा जयति भणितिरहो रसवक्ता कुञ्चिकेव या सर्वम् ।
उद्घाटयति कवीनां रसनासारस्वतं कोशम् ॥

पूर्वमिह मर्त्यलोके सकलक्ष्मावलयभूषणीभूतभवनमणिकिरणकुण्डलायां वलभीतिप्रसिद्धनामरम्यायामसीमगुणभाजि राजधान्यामनन्तनमितसामन्तमस्तकाभरणमणिहंसकोपसेव्यमानचरणशतपत्रः प्रथितपृथुकीर्त्तिकल्लोलिनीकलापवलयोपगूढसप्तार्णवो मानविनयनशफरसम्पातमीनध्वजस्तेजसो राशिरासीदवनीश्वरः शिलादित्यो नाम ।

यस्योद्यद्दीप्रवज्रानलसरलशिखाभोगभासि प्रतापे
स्फूर्जत्युच्चैर्न केषां झगिति विगलितो भूभृतां स्तब्धभावः ।
सा नु व्यक्तैव तस्मिन्नसमगुणवती कापि दिव्यौषधीनां
शक्तिर्यन्नो विलीनस्तुहिनदलमयोऽप्येष मन्ये हिमाद्रिः ॥

तस्य च सदैवाङ्गलग्नः पुरःसरः कार्येषु, परिमल इव पारिजातस्य, तरङ्गाभोग इव सागरस्य, किरणकलाप इव दिवसराजस्य, शिखाभर इव कृशानोरेक एवानुजन्मा तीव्रतरवारिधाराजलमार्जितारिनामाक्षरश्रेणिः, आसमुद्रमेदिनीकेलिदुर्ललितविक्रमो, निधानमशेषविषयवर्तिनो ज्ञानस्य, सरस्वतीभवनं, नाम्ना कलादित्य इति पुरुषभूषणं बभूव । यः समन्तादुपान्तनिहितनूतनेन्द्रनीलमणिमयूखवलयमालाभिरलघुलोहशृङ्खलाभिरिवोपसज्जितं निजाग्रजराज्यसिंहासनमनारतं हठादाकृष्यमाणनरेन्द्रसम्पदां बन्दिशालीचकार । स हि महीभृतामुत्तमस्तेनानुजन्मना सह समस्तमनिशं संसारसुखमखण्डितविलासमासेवमानः कदाचिदसहमानोऽन्यतेजस्विषु प्रथममसमसंरम्भसञ्चरदपारहरिकरिरथखुररजोभिराक्रम्य दिवसराजस्य मण्डलमुच्चचाल दिशो वशीकर्तुम् ।

यस्मिन्नुच्चलिते विजेतुमभितो दिक्चक्रमुच्चक्रम-
क्रामत्कुञ्जरदण्डचण्डचरणन्यासैर्नमन्त्या भुवः ।
मन्ये निर्भरपातमुद्गरमहाभारेण भग्नस्तदा
तेनैवं चलति प्रकामकुटिलीभूतो भुजङ्गाधिपः ॥

अथ तस्य सुदूरमाक्रान्तिमता विक्रमगुणेन विपक्षवंशमवनम्य कोदण्डवत्कलत्रितं कुर्वतः क्रमेण क्रमलब्धानीतनिखिलनरपालचक्रस्य कथञ्चन बलीयसा [illegible]णोत्तरापथस्वामिना मान्यान्ववंशप्रभवेण भूभृता धर्मपालेन सह विग्रहो दैवेनाचचार । तं तथा विलोक्य विग्रहस्यायतिमेकस्मिन्नहनि ननु कथमसावस्मत्[illegible]नामिति क्रोधवलितेन चेतसा समरोपकरणसज्जितमात्म[illegible]र्वीश्वरः स्वयं गत्वा दुर्गोपगुल्मान्तिके बभूव । तत्र च प्रचुर[illegible]पकरणदारुणे प्रसरमागच्छति महारणे, रणरसा[illegible]निर्गलितवारिवेगेषु प्रवर्तमानेषु कबन्धताण्डवेषु, नरकरि[illegible] शोणितनदीषु, दीप्यमानजयाशापुनरपाक्रमेषु [illegible] च [illegible], सहसैव दुर्गादागत्य सिन्धुर[illegible] पतन् [illegible] विविधवर्णाश्रयणोत्सुकः [illegible] ।
स निकटमुपेत्य भ्राता कलादित्यः स्वामिनाश्रयं[illegible]

किमप्यसौ शर इति गृहीत्वा राज्ञोऽनुमत्या मनसि तान्यक्षराणि स्फुटीकृत्य नन्वार्यायुगलमेतदिति प्रकाशं वाचयामास ।

कर्णे निवेशितपदः प्रहितो विद्वेषिणः प्रविश्याङ्के ।
कोऽपि पतत्रिप्रवरः कार्यं विदधाति विजिगीषोः ॥

अपि च ।

पूर्वापरयोः शुद्धिं विमुच्य कुटिलक्रमेण विचरन्तः ।
जयमिच्छन्ति नियुक्ताः सर्वे विशिखा रिपोरेव ॥

राजा त्वीदृशमिदमार्यायुगलमाकर्ण्य मनस्येव भावितार्थो झगित्याकृष्य दुर्गमूलाह्वलानि संवृताखिलससीकसंरम्भो निवर्त्य निजसेनानिवासमाजगाम । तस्मिन्नुचितक्रमेण करणीयमह्नो निवर्त्य रजन्यामाहूय रहस्यकालमुक्तसमरसम्भारोद्धूयमानामितवितर्कं भ्रातरमुवाच । ननु वत्सेन शरस्थमायातमवधारितमिदमार्ययोर्युगलम् । अत्र हि शरप्रणुतिनिन्दाच्छलच्छन्नो नूनमन्योऽयमर्थात्मा । तथा च जानाति वत्सो यत्किल ममाऽस्ति धन्विनामग्रणीरग्रजन्मा गुणाढ्य इत्याप्तः सेवकः । स खलु मयात्र द्विषदन्तिके पूर्वमेव प्रणिधिरूपेण निरूपितो वर्तते । तेनाद्य श्लेषोक्तिचतुरेणैतदार्यया प्रथमया कर्णे निवेशितपदः पतत्रिप्रवर इति पदद्वयेन कर्णे संसिद्धप्रहितिः प्रणिधिः पतत्रिभिः प्रवरो धन्वी किलाऽहमिति प्रत्यभिज्ञाप्य परिपन्थिनोऽङ्के प्रविश्य कार्यकारित्वमात्मनो ज्ञापितम् । द्वितीयया च निवेद्य प्रहितं यत्खलु ये हि कर्मसु नियुक्ताः विशिखा इति विगतशिखाः मूढजातयस्ते सर्वेऽप्युज्झितपूर्वापरक्रमा वक्रभावेण विचरन्तः शत्रुमेव जयन्तमिच्छन्तीति वाच्यार्थे निश्चितमनेन नीतिनिपुणेन रिपुणा कथञ्चन प्रभेदिताः सर्वेऽप्यस्माकममी करितुरगकोशादिष्वधिकारिणः । एवं च यद्यथैव किमप्युपक्रम्यते तत् तथैव तैरेवमकर्मभिराख्यायमानमभितः प्रतिसमाधत्ते सावधानो रिपुः । इत्थमत्रावायाति विग्रहो वृद्धिं, तदद्य रात्रावेव प्रतिगृहं सञ्चारितचरत्वेन जानीहि किन्नाम सत्यमेतदित्यमन्दमादिष्टेन तेन यथानिरूपितमशेषतश्चक्रे । प्रातरागत्य च देव ! यथा गुणाढ्येनाऽऽख्यातं व्याख्यातं च देवेन तथैव तत्सर्वमित्युक्ते निकामकुपितो नृपेन्द्रः सपदि सञ्चरत्कोपलक्ष्मीपदक्षेपलग्नेन यावकरसेनेव लाञ्छितां लोहितां दृशमादधानः क्रोधिन्यां दशि स्थितेन च कृतान्तेन दलितोदञ्चितामलनदमश्रुदंष्ट्रिकामिव भ्रुकुटिमाभोगभीषणां घटयन्नुद्धटेन पथा वक्तुमारेभे । भवतु वत्स !

किमेभिरहितप्रभेदविवर्दितैरसाधुभिः सहायैरेष चेज्जलैरभेदितोऽस्ति मदीयो बाहुरवश्यं मन्दरमहीध्र इव लक्ष्मीं पयोधिमध्यमग्नामप्युद्धरिष्यति ।

तथाहि—

श्रीः स्वयं चापटङ्कारस्वनव्याहारधाविता ।
सेनेवागत्य धीराणां दोर्दण्डमधिरोहति ॥

अपि च—

लक्ष्मीपारावत्या वसतिकृते पाणिपञ्जरप्रवरः ।
विहितः स एव विधिना सुभटानामिह भुजस्तम्भः ॥

तदेष चिराद्भवतु मे संप्रति कृपाणप्रणयी पाणिरित्यसिदण्डमादातुकामं राजानमालोक्य कलादित्यः सादरमवादीत् । ननु जगत्त्रयाक्रमणकर्मठोरुविक्रमः किमित्येवमेतावत्यणीयसि रिपावार्यः स्वयमेनं कृपाणमादत्ते । किं नाम विस्मृतः स्वामी? । देव! क्षत्रियादुत्पन्नः स्नेहेनोपलालितः पालितश्च कोशेन मध्यगतो मुष्टेरनिष्टनरनिग्रहोपकरणमहं ते मण्डलाग्रः । तदादिश क्षणादवश्यमद्यैव त्वदीयेन तेजसा दलितदर्पान्धतमसं धर्मपालमवनौ विनतिलुलितकायं त्वच्चरणतलवर्तिनो लक्ष्मरेखामयस्य चक्रस्याक्षदण्डं करोमीति सानुबन्धमभिधाय बलादनिच्छतोऽप्यग्रजस्य गृहीतभण्डनारम्भपरिकरः स्वीकृत्य सकलमलिकुटुम्बडम्बरितगण्डफलकमुड्डामरं मत्तकरिवरूथिनीवृन्दमुदग्रवेगं स्वीयं सैन्यमनिन्द्यं च सामन्तचक्रमेकहेलयेव विश्वमास्फालिताजितूर्यनिर्घोषनिर्भरं कुर्वन् प्रणम्याग्रजं निर्जगाम । झगिति चाग्रे स्वयमवष्टभ्य सुभटसन्दोहदुर्गमं दुर्गमकरोदनन्तनरहरिकरीन्द्रसंहारदारुणं महारणम् । तथाहि—

निर्लूनं सुभटस्य कङ्कणमणिश्रेणीशिखाडम्बरो—
द्दीप्रप्रान्तमुदस्य दस्युपतगत्रासेन गृध्रो भुजम् ।
यस्मिन्नस्तमुपागतैर्नृपतिभिस्तत्कालमूर्ध्वं जग-
द्गच्छद्भिः सह दीपवर्त्तिक इव व्योमान्धकारे ययौ ॥

किं बहुना ।

तामासाद्य सुदूरमस्त्रपतनप्रक्षुण्णवीरत्रुट—
त्तूर्यद्वारकपालजङ्गलचयच्छन्नामनीकक्षितिम् ।
जातं गृध्रगणोज्झितं द्रुमकुलं भल्लूकशून्यं वनं
निष्कापालिकमम्बिकागृहमपप्रेतं च लङ्कापुरम् ॥

त्युचितानुष्ठानमूढोऽहमाचरामि । कलादित्योऽपि निजबुद्धीनामसाध्ये कार्य-
वस्तुनि किमेव किल मन्त्रयिष्यति । यतः—

उपायस्योल्लेखं कमपि न यदा पश्यति नर-
स्तदानीं किञ्ज्ञानं स्फुरति मतिपुलेऽपि कुशले ।
सहस्रं पादानामपि रथमनालम्बपथगं
विना व्योमन्यर्कश्चलतु यदि शक्नोति चलितुम् ॥

अथवा किमनेन प्रयोजनविनिश्चयाक्षमेण मुधैवमालोचविस्तरेण क्लेशया-
म्यात्मानम् । येन देवताविशेषेण ममैतद्राज्यमागतमेतावतीं वृद्धिं पालकोऽपि
तस्य तेनैव कश्चन विधिनिर्मितो व्यक्तिमवश्यमेष्यतीति मनसा संप्रधार्य-
न्नेव निद्रां जगाम । अथ तथा निद्रोपभोगसुखमनुभवतः क्षितीन्द्रस्य परि-
गलति यामत्रये रजन्यास्तस्य शयनगृहस्यान्तरेकहेलयैव झगिति मणिनूपुरप्र-
सूतः सुन्दरो ध्वनिरुदभूत् । तेन च ध्वनिना झटित्यसावुद्भिन्ननिद्रो विमुद्रयति
चक्षुषी यावत् तावदग्रे झगित्यद्भुतानुहारिणा दर्शनेनाऽऽप्यायितविलोचनां
कान्तिबहलैरवयवैरेकमूर्तात्मकशिवतेजोमयं गात्रमुद्वहन्तीं निर्मलस्य लाव-
ण्यवारिणस्तरता तरङ्गवलयेनेव स्वच्छांशुकेन जनितमतिमनोहरं नेपथ्यमा-
दधानामविरलकुरलोपशोभिना भालेन तिमिरमूलोदितेन खण्डेन्दुना भास-
मानामधिदेवतामिव निशायाः कर्णयोर्भूषणमयेन विलासतामरसकर्णिकाद्वयेन
सेव्यमानां सगोत्रामिव पाथसां साम्येन मुक्ताभरणस्य दायादामुदधिवेलायाः
सादृश्येन वदनस्य सोदरामिन्दोरास्पदतया कान्तेः सजातिं रत्नजातस्य कनक-
नूपुरयुगादधः प्रसर्पता द्युतिभरेण पिञ्जरितचरणां कपिशकिञ्जल्कपांसुलेन सरो-
जवनाध्वनेवागतां गौरतरेणाङ्गलावण्येन चन्द्रिकामूर्तिधवले चन्द्रमसीव सुधा-
समुत्थितां मधुरया मूर्त्या दुग्धसिन्धाविव निष्पन्नामसामान्यदर्शनामचिन्त्य-
रूपवतीं योषितं ददर्श । सविस्मयानिरुकमालोक्य च तामपि येनाऽहमुद्बुद्धः स
नूनमस्याश्चरणसञ्चारजन्मा नूपुरध्वनिः । भवतु पृच्छामि का पुनरसौ । न ताव-
दहमनेन प्रसरता निरन्तरमेतदङ्गस्य तेजसा निरस्यमानदृष्टिः स्पृष्टमूर्तलेयम-
स्पृष्टमूर्तला वेति निर्णेतुं पारयामि । यदि वा द्वारपालाङ्गुल्यामिकैरज्ञापितानामनु-
द्घाटितकवाटसंपुटे शयनसद्मनि प्रवेशोऽत्र मनुजसीमन्तिनीनां, न चानर्घ्य-
जनोचितेनामुना कान्तिकलापेन मानुषीयमवश्यं दिव्यैव काचित् । दिव्य-
जनो हि सामान्योऽपि मान्यो मनुष्याणां किं पुनरविकारवता दृशोर्विभ्रमे-
णापनीतचापलं महनीयमिव दधाना स्वरूपमसावीदृशीनि निश्चित्य चेतसि

* सदृ°

मायथौ राज्यम् । राज्यं हि न नाम निरमात्यमसूत्रधारं नाटकमिव पा
प्रवर्तयितुं यस्मादमात्यमुख्यः सकलोऽपि कलापः कार्याणाम् । स चास्म
ममात्यः कनकायनो नाम निकाममीश्वरो मानितोऽपि कथञ्चन सार्द्धमधि
रनिरूपितैः स्वजातिभिरवसरे व्यभिचारमुपदर्शयामास । तदिह संप्रति
किल वर्णचतुष्टयाद्विशुद्धश्चतसृभिरुपधाभिरुचितोऽधिकारेषु । द्विजन्मानो
ब्रह्मतेजसो वन्दनीयाः पूज्या एव मन्त्रिपुरोहितपदे स्थापयितुमुचिता भवा
नार्थचिन्ताधिकारेणात्मनः प्रहीयन्ते । तैजसीं वृत्तिमपहाय पाशुपाल्यकृषि
णिज्योपजीविनां च विशां हीनतया हृदयवृत्तेरिहावकाशोऽपि न श्रेया
शूद्रास्तु समयदर्शितेनामुना व्यभिचारेण च निवेदिता न तावदर्हन्ति
अतः को नूनमवेक्षणीयगुणक्षेत्रं क्षत्रियादपरः सम्प्राप्यते । स तु स्वध
धीनपुरुषव्रतः सहजस्य तेजसः पात्रं, न खलु मनुष्यजन्मना मादृशेनान्
कर्मणि पार्यते प्रवर्तयितुम् । को नाम भगवन्तमम्बरतलावगामिनं मरीचिम
लिनमवनिपथेन प्रचारयितुमलं, कस्यास्ति शक्तिरूर्द्ध्वमुल्लासिनमनलशिखा
लापमधोमुखं प्रवर्त्तयितुं, केन च शक्यते तडिद्दण्डस्य विस्फुरणला
मन्दतां नेतुम् । अथास्ति श्रूयते च क्षत्रियाणां प्रवृत्तिरधिकारेषु । यदा हि
तृवधामर्षरोषितो भार्गवः समग्रमेव राजन्यकमकुण्ठतरसारधारोपदर्शितान
समुच्छलद्विस्फुलिङ्गदलभासुरेण परशुना सर्वतस्त्रुटितकण्ठपीठीकमारब्धव
कर्त्तुं तदा तेन कियताऽपि क्षत्रियजनेन कियत्कालमात्मनो रक्षार्थं क्षात्रम
हाय पन्थानं वृत्तिरियमादृता नियोगस्य । यद्यप्येवं तथाऽपि चान्यपा
वङ्कुलपुत्रको न क्वचित्कश्चिदात्मनः श्रियमधिप्रवेशयितुं विश्रम्भविपर्यीकृ
भीत्या । तथा च दिनेन्दुरादित्यस्य धामन्यन्तरनुप्रविष्टो झटित्यवसर
वाप्य मिलितया रजनिसामग्र्या तमपि प्रतापवन्तमिनं समुच्छेद्य स्वयमशे
भुवनमाक्रान्तवान् । अस्मत्कुले तु न कश्चित्तथाविधो बुद्धिमानस्ति यः कि
संवर्गयन्नशेषतः स्वामिनो वन्धून् गोत्रभिदो मन्त्रिणं धिषणमपि दुर्बुद्धिं मन्यते
नन्दयन्ननेकशः कोविदकुलानि विबुधविद्विषामनुगतं शुक्रमपि मूर्खं गण
यति, मिलत्कोटिशोरथवरूथिनीदशरथमेव स्वामिनं कुर्वाणं वसिष्ठमप्यल्प
धियं कल्पयति, जगतोऽपि वन्धुतया व्यवहरन् विश्वामित्रं रामस्याप्यमात्य
... कलयति, येन तस्मिन्नसमलक्ष्मीविकासविस्फुरितकीर्त्तिवले राज्यभा
रमारोप्य निराकुलो विलासदर्शितानि सुखान्यनुशीलयाम्येवं च किमिह संप्र

त्युचितानुष्ठानमूढोऽहमाचरामि। कलादित्योऽपि निजबुद्धीनामसाध्ये कार्यवस्तुनि किमेव किल मन्त्रयिष्यति। यतः—

उपायस्योल्लेखं कमपि न यदा पश्यति नर-
स्तदानीं किन्नाम स्फुरति मतिपुञ्जेऽपि कुरुते।
सहस्रं पादानामपि रथमनालम्ब्यपथगं
विना व्योमन्यर्कश्चलतु यदि शक्नोति चलितुम्॥

अथवा किमनेन प्रयोजनविनिश्चयाक्षमेण मुधैवमालोचविस्तरेण क्लेशयाम्यात्मानम्। येन देवताविशेषेण ममैतद्राज्यमागतमेतावतीं वृद्धिं पालकोऽपि तस्य तेनैव कश्चन विधिनिर्मितो व्यक्तिमवश्यमेष्यतीति मनसा संप्रधारयन्नेव निद्रां जगाम। अथ तया निद्रोपभोगसुखमनुभवतः क्षितीन्द्रस्य परिगलति यामत्रये रजन्यास्तस्य शयनगृहस्यान्तरेकहेलयैव झगिति मणिनूपुरप्रस्तुतः सुन्दरो ध्वनिरुद्भूत्। तेन च ध्वनिना झटित्यसावुड्डीननिद्रो विमुद्रयति चक्षुषी यावत् तावदग्रे झगित्यमृतानुहारिणा दर्शनेनाऽऽप्यायितविलोचनां कान्तिबहलैरवयवैरेकभूतात्मकशिवतेजोमयं गात्रमुद्वहन्तीं निर्मलस्य लावण्यवारिणस्तरता तरङ्गवलयेनेव स्वच्छांशुकेन जनितमतिमनोहरं नेपथ्यमादधानामविरलकुरलोपशोभिना भालेन तिमिरमूलोदितेन खण्डेन्दुना भासमानामधिदेवतामिव निशायाः कर्णयोर्भूषणमयेन विलासतामरसकर्णिकाद्वयेन सेव्यमानां सगोत्रामिव पाथसां साम्येन मुक्ताभरणस्य दायादामुदधिवेलायाः सादृश्येन वदनस्य सोदरामिन्दोरास्पदतया कान्तेः सजातिं रत्नजातस्य कनकनूपुरयुगादधः प्रसर्पता द्युतिभरेण पिञ्जरितचरणां कपिशकिञ्जल्कपांसुलेन सरोजवनाध्वनेवागतां गौरतरेणाङ्गलावण्येन चन्द्रिकाभूतिधवले चन्द्रमसीव सुधासमुत्थितां मधुरया मूर्त्या दुग्धसिन्धाविव निष्पन्नामसामान्यदर्शनामचिन्त्यरूपवतीं योषितं ददर्श। सविस्मयातिरेकमालोक्य च तामपि येनाऽहमुद्बुद्धः स नूनमस्याश्चरणसञ्चारजन्मा नूपुरध्वनिः। भवतु पृच्छामि का पुनरसौ। न तावदहमनेन प्रसरता निरन्तरमेतदङ्गस्य तेजसा निरस्यमानदृष्टिः स्पृष्टभूतलेयमस्पृष्टभूतला वेति निर्णेतुं पारयामि। यदि वा द्वारपालाङ्ग्यामिकैरज्ञापितानामनुद्घाटितकवाटसंपुटे शयनसद्मनि प्रवेशोऽत्र मनुजसीमन्तिनीनां, न चामर्त्यजनोचितेनामुना कान्तिकलापेन मानुषीयमवश्यं दिव्यैव काचित्। दिव्यजनो हि सामान्योऽपि मान्यो मनुष्याणां किं पुनरविकारवता दृशोर्विभ्रमेणापनीतचापलं महनीयमिव दधाना स्वरूपमसावीदृशीनि निश्चित्य चेतसि

ससंभ्रमं चोत्थाय तल्पतलात् समयसमुचितोपजनितेन प्रश्रयेण दर्शितादरस्तामवादीत् । कथय पुण्यदर्शने ! का नाम भवती, कुतः, किमर्थमज्ञातस्त्रीजनविरुद्धमेकपुरुषाध्यासितमेतदागताऽसि रहःस्थानमिति प्रोक्ता नृपेण सा प्रतापशालिना स्मितेन सुधाशीतलेन चक्षुषा चाह्लादयन्ती प्रत्युवाच । भोः श्रीमतामीश ! जानासि यामिह वशीकर्तुममी समन्ताद्राजानः प्रसरदसमाशुपातितानल्पनरकरितुरङ्गमाश्च कुङ्कुमविपङ्कितं विमानकमिव समरमाश्रयन्ति, यस्य कृते ब्रह्माण्डविवरसञ्चारी वीरलोकः कल्पमिव दर्शितफलं कृपाणमावहति, या खलु निकामवत्सलतया पशुजात्यापि कामधेन्वा स्तनान्तर्निवेश्य परिपालिता, विचेतनेनापि कल्पद्रुमेण स्कन्धमधिरोप्य संवाहिता, दृषदापि चिन्तामणिना हृदये विन्यस्य धृता, किं बहुना, यया विरहितेयमित्थं प्रसरमागतापि त्रिलोकीलता मुहूर्त्तेनैव शोकमायाति, साऽहं सलिलसोदरा महोदधेरात्मजा लक्ष्मीः प्रसाधिताशेषदिङ्मुखस्य वशीभूता तवैव मण्डलाग्रे वसामि । त्वया च राज्यचिन्तकमपश्यता निवेशितेण देवतासु चिन्ताभरेणाद्य सूचिता विभावयन्तीव प्रयोजनमात्मनोऽपि सपदि प्रत्यक्षीभूय प्रस्तुतोपदेशदानार्थमागता । तदेतद्बुध्यसे भूपालतिलक ! मत्पालनाय किमित्यन्यमन्यत्र पुरुषपुङ्गवं गवेषयसि । श्रूयताम् । यदा किल सकलोऽपि सशेषमन्दरोपकरणः स्वर्गौकसां जनः सिन्धुनाथमथनव्यापारमारभत तदाऽहं शशधरसुरभिकौस्तुभादिवस्तून्मेपक्रमेण निर्गत्य झगिति दृङ्मार्गमागताऽपि कथञ्चिन्मन्दरपरिभ्रमोद्भूतदुस्तरावर्तसन्निवेशेन पुनरतिगभीरे पयसि पाथोनिधेरमज्जम् । विघटिताध्यवसायविधुरेण च विषण्णेन सर्वतोऽपि शतमखप्रमुखेण विबुधवर्गेण मदर्थमविलम्बसदुपायमापृष्टो बृहस्पतिरुवाच । नियतमेकोऽस्ति श्रूयतामुपायः । प्रायशो विदित एव भवतामतिप्रसिद्धः कायस्थो नाम गणः श्रीकण्ठसन्निधावास्ते । स चाष्टमूर्तेर्भगवतो जलमयीं मूर्तिमधिष्ठितस्यासन्नसहचरत्वेन काये स्थितत्वात्कायस्थ इति जलैरनाहतशक्तेः प्रणयास्पदमम्बुधेरासीत् । एवं च तेन कृत्वा निकामविषमार्णवोदरकुटीरकोणं गताऽप्यसौ हठादानीयत इत्यमरमन्त्रिणा प्रोक्ते त्वरितमाहूय प्रवर्तितः सोऽत्यर्थमर्थनया सुरसमूहस्य झटिति तत्रान्तर्दत्तझम्पो मां मन्दरपरिक्षोभितैः पयोभिरितस्ततोऽन्तर्भ्राम्यमाणामादाय निर्जगाम समर्पयामास च दिवौकसाम् । इदानीं तु त्रिदशलोकोपरुद्धस्य भगवतो भवस्यादे- [illegible] मामनुपालयितुमवतीर्णो मर्त्यलोकं, स्थास्यति च वं- [illegible] यावदत्रैव । स खल्वेष तस्यावतारस्तावको भ्राता कलादित्यस्तदङ्ग !

मदीयमिदं वचः प्रमाणीकृत्य समर्पय सर्वाधिकारस्वामिनीं प्रातरमात्यमुद्रामेतस्य, येनाहमनेन परिपालिता निरपायमाप्यायनसुखान्यनुभवामीत्यभिधाय धृत्वा करपल्लवेन सा चैषा मदङ्गरक्षाकृते मुररिपुप्रहिता स्वयमुपरिकेण गरुडेनाधिष्ठिता सुवृत्तशालिनी सुवर्णसंभूतिर्महत्तरा मुद्रा, ग्रहीष्यति च भवानुभावादपगतान्यभावापग्रहः कलादित्य इति राज्ञः करे मुद्रां समर्प्य झगित्येव शय्यासन्नवर्त्तिनि कृपाणे तदेव निजं मर्त्यजनविलोचनागोचरं स्वरूपमाधाय विशश्राम। राजा तु मुद्रालाभसुभगेन तेन व्यतिकरेण सरभसमुल्लसितमानसस्तमल्पशेषमपि कल्पप्रमाणं मन्यमानोऽखिलं रात्रेः कथंकथमपि जाग्रदेव वन्दिनां वर्णावलीवचोभिराख्यायमानमासाद्य प्रभातमुत्थितो निर्वर्त्य निखिलमवसरोचितं क्रियाकलापमारात्रिकादिमङ्गलोपचारशालिनि विशालमणिवेदिकाचतुष्के विरचितास्थानमुपविष्टः। पुरो निविष्टेषु प्रणयिलोकेषु कुवलयदलायतेन चक्षुषा संभाव्य सन्निहितमासीनं पुण्डरीकनामानमसामान्यगौरवं पुरोधसमशेषतोऽपि तं शर्वरीवृत्तान्तं कर्ण एव निभृतमावेदयाञ्चके, दर्शयामास च तां कल्याणमयीं मुद्राम्। अथ प्रहृष्टेन पुरोधसा श्रवणादेव महाराज! नियतमवितथान्येव देवतावचांसि। पश्य शुभसूचकमिदमेव मङ्गलवतां कर्मणामुपस्थितं मुहूर्त्तम्। अत्र हि कमलया प्रदत्तां विना विलम्बमादेशः क्रियत इति प्रोक्ते राजा त्वरितमाहूय बहुमनेन प्रेमोपचारबन्धुना वचोनिर्बन्धेन प्रबोध्य सज्जीकृतमनल्पसमुचितेन प्रक्रियाक्रमेण मुद्रामर्पयित्वा तं निष्कण्टकीकृतसकलभूवलयनिराकुलतया विरतविश्वव्यापारमात्मनो भ्रातरं कलादित्यममात्यपदे निरूपयामास। अनन्तरमसौ वास्तव्यनाम्नो [illegible] क्षत्रियविभूषणं कलादित्यस्तेन भवस्य भगवतोऽनुभावेन नाम्नेव निजाग्रजराज्यलक्ष्मीपालनपरामधिकारपदवीमादाय व्यापारितवान्ः [illegible] स्नाद्। [illegible] पाल्लितसकलराज्यत्। [illegible] क्रमेण [illegible] सुधा भ्रमेण [illegible] [illegible] इति [illegible] नाम [illegible] ॥

[illegible]

येनान्तराधृतभरेण धराधिपत्ये राज्ञां जयत्यहतविस्तरमातपत्रम् ॥

किं बहुना। तृतीयमकृतोन्मेषं कायस्थ इति लोचनम्।
राजवर्गो वहन्नेष भवेदत्र महेश्वरः ॥

तस्मिन्नशेषभुवनविख्यातनामनि महावंशे दलितकलिकलङ्कसंहतिरमृतमयाकारकमनीयो नर्मदाप्रवाह इव भूतिलकमधिष्ठितो लाटदेशमासीद्दुमेशवंशावतीर्णस्य महात्मनश्चण्डपतेरङ्गजन्मा सोलपेयो नाम। तस्य च बहूनामन्यतमः सुतानामीश्वरविभूषणं शशीव ग्रहाणामनन्तमुखोदञ्चितप्रघोषः पाञ्चजन्य इव शङ्खानां सुमनसामभीष्टः पारिजात इव तरूणामसीमवता गुणग्रामेण निरूद्धनिखिलमेदिनीविभागः सुवृत्ततया तिलको गोत्रस्य सुगृहीतनामा सूर इति सूनुर्बभूव। तस्मादमलमुक्तावदातकीर्त्तेः पुरुषपुङ्गवादजायत प्रथमः पुत्रेषु पम्पावतीसूनुः सोड्ढलो नाम। स खलु स्वर्लोकशोभाविलुण्टिनं लाटदेशमध्यासितो विद्याभ्याससमकालमुन्मेषमागते कविपथोपदर्शिनि सारस्वते ज्योतिषि निसर्गसुस्थितस्तेनैव कवितारसेन मानसमनुशीलयामास। कालपरिवर्त्तितावस्थितिक्रमेण च मृगमदपत्रभङ्गिमयं कोङ्कणभुवो मण्डनमिवोद्यानवनविनीलपरिसरं स्थानकं नाम राजधानीनगरमागत्यावस्थितः कोङ्कणमहीभुजो जाह्नवीयमुनयोरिव सरस्वतीश्रियोर्वेणीसङ्गमेन संवर्गितः छित्तराजेन संभूषितो नागार्जुनेन संमानितो मुम्मुणिनरेश्वरेणेति सोदरेण क्रमोपभुक्तराज्यसंपदा राजत्रयेण प्रतिपद्यमानः कवीन्द्रसद्मनि प्रतिष्ठामाससाद। अथ कदाचिदसावुदयगिरिशिखरयन्त्रोल्लालितविमुक्ते तिमिरकरिघटाघातिनि गण्डोपलगोल इवाम्बरमनुसरति भगवतस्तीव्रत्विषो मण्डले चण्डकरकिरणकुञ्चिकोद्घाट्यमानेष्विव विघटितदलकपाटसम्पुटेषु व्यक्तीभवत्सु तामरसकोशेषु दिवसलुण्टाकोल्लुण्टितश्रियः कुवलयवनादाक्रन्दमुखरासु प्रभास्विव समीपमम्बुजग्राममनुप्रधावतीषु गुञ्जतामिन्दिन्दिराणां श्रेणिषु प्रदोषपवनपटपल्लवापमार्ज्यमाणेष्विव निर्मलीभूतेषु ककुभां मुखेषु वासरविधेयकर्मणि क्रमशः प्रवृत्तेषु जनपदेषु जाते च लोचनावकाशदायिनि प्रभातसमये सभामधिष्ठितं कीर्त्तिचन्द्रिकाविस्तारसितपक्षमनाकृष्टचापकन्दर्पमलङ्कार-

चौलुक्यवंशस्य कवीनामीश्वरं लाटदेशश्रियः कोङ्कणेन्द्रसुहृदमुर्वी-
वल्लभराजमनु प्रणयपरिगतानन्तसङ्गनिरुत्सवोपभोगार्थमाहूय नीतो जगाम।
च प्रवर्त्तमानासु चतुरकविकदम्बकोद्घुष्यमानानेकरसविपञ्चनपटीयसीषु

स्वैरगोष्ठीविभूतिष्वन्तर एव रत्नविक्रयवता वणिक्पुत्रेणाऽऽनीय दर्शितं मुक्ताफलप्रकरमालोक्य सहसैव मणितत्त्वविदां नरेन्द्रः प्रस्तुतार्थदलशालिनी-मार्यां पपाठ।

एकैकशः प्रकीर्णैर्मुक्तामणिभिः किमेभिरेभिस्तु।
यं सृजसि हन्त हारं तस्यान्यः कोऽपि परिभोगः॥

श्रुत्वा च तयाऽऽर्यया झगित्येवासौ वासितात्मा कविश्चिन्तयामास मौनम-वतिष्ठमानो मुहूर्त्तमुचितक्रमेण च विसर्जितो भूभुजा मन्दिरमाजगाम विक-ल्पयामास च। ननु विविधवैदग्ध्यवता पार्थिवेनेत्थमनया स्वाभिप्रायक-ल्पितयार्यया केवलानि विफलानि मुक्ताफलानीति तैरेव सूत्रिताभोगवतो हारस्य गौरवमारोपयन्त्या वणिक्पुत्रोपदेशव्याजेन सम्यगुपदिष्टमिह ममैव जाने। यतः—

मुक्तकवृत्तैः कविता कैव किलाऽसौ विना प्रबन्धेन।
ताराभिर्न विराजति शून्या चन्द्रेण गगनश्रीः॥

तत्साधु संवृत्तमनेन वत्सराजपठितार्यावधारणेन मे योगाञ्जनेनेव मोहति-मिरावृतेयमुद्घाटिता मानसी दृष्टिः शब्देनेव निद्रान्तः प्रबोधिता बुद्धिरुदकपा-तेनेव मूर्च्छितश्चेतनां लम्भितो विवेकश्च। ततश्च किमहमित्थमनेननैकप्रकीर्णवृत्त-कवितामात्रकेण कृतार्थः प्रमादी तिष्ठामि। करोमि स्वशक्तिविस्तरपरीक्षणं विना कुतूहलेन भूरिणा च कीर्त्तेरभिलाषेण साद्भुतापूर्वसंविधानकमनेकरसानुबन्धपरं प्रबन्धम्। प्रक्रमे तु रमणीयं न नाम केवलं गद्यं नापि केवलं पद्यमुभयानुबन्धिनी चम्पूरेव श्रेयसी, यस्मादन्यैव रत्नैर्विपञ्चितस्य शोभा कनकभूषणस्य, अन्यदेव पाटलामिश्रितस्य सौरभं विचकिलगुलुञ्छस्य, अन्य एव वंशध्वनिगर्भितस्य मनोहारिमा गीतस्य, अन्यदेव कर्पूरमिलितस्य शैत्यं मलयजद्रवस्य, अन्यैव च हृद्यता पद्यानुषङ्गिणो गद्यस्येति चेतसि विचिन्त्य चम्पूमेव कथां कर्त्तुमुपजनित-निश्चयस्तद्दिनमतिवाहयाञ्चक्रे। द्वितीयेऽहन्युत्थाय कृताग्रहमव्यग्रमनसः कवयः क्षमन्ते काव्यकल्पनास्वित्युचितमेकान्तवसतेरहेतुं व्यासङ्गानां निमित्तमात्मनः प्रसक्तेरबाधकं मनोऽवधानस्य निजं कर्मान्तारामपरिकरास्पदं ग्राममयासीत्। त-त्र स्थित्वा निरतिशयमनवद्येन चेतसा विश्रुतोदात्तनायकवतीं कथां कर्त्तुमारेभे निर्माणयामास च कतिपयैरहोभिः। अनन्तरमन्यस्मिन्नहनि निर्वर्तितविधेयः प्रा-तरेव तं प्रबन्धपुस्तकमादाय निर्गतस्ततो ग्रामात् प्रतोपसत्वरमुदञ्चितक्रमेण स-मागच्छन्नेकत्र गिरिपरिसरारण्यजुष्टरोद्देशे दक्षिणेन मार्गाच्चान्द्रमसं ज्योत्स्नापु-

ञ्जमिव प्रबलान्धकारपेटिकया वन्दिगृहीतं रोहणैकगोत्रजं शशिकान्तशिलाकूट-मिवेन्द्रनीलसंहत्या दायाद्यविग्रहेणारब्धं शुचीभूय स्थितं दुग्धार्णवोर्मिस्तम्बमिव वाडवधूमश्रेण्याऽलभ्यायविधृतं स्फटिकसुभगं कैलासमिवाञ्जनमहीध्रमेखलया गाढालिङ्गितं मथ्यमानाब्धिफेनपाण्डुरितं मन्दरमिव मुरारिभुजगावेष्टितं पि-ण्डिताकारपरिणतं हराट्टहासराशिमिव दक्षिणमुखत्विषा मण्डलितमतिविश-दसुधापिण्डपाण्डुरमविरलविनीलवनराजिमालया वलयितोपान्तं प्रासादमद्रा-क्षीत्। तद्दृष्ट्वा च सानुस्मरणमये! सोऽयमरण्यवर्ती भगवतो भार्गवस्य सार-स्वतः प्रासादः। तदिदानीं कथमपश्यन्नपूजयन्नेव च देवीं व्रजामि। किन्त्व-यमभ्यवहारकरणादतच्छङ्कीभूय गतो वासरः प्रहरमात्रावशिष्टश्च वर्तते, सन्नि-हितपश्चिमदिक्सङ्गमाशयेव देवस्यापि खरांशोरुत्तीर्णवानुत्तापस्तावदतोऽद्य-तनमेनं वासरमिहैव गमयामि। प्रातरुषस्येव निर्झरजलामलस्नपनपूर्वमपूर्वा-रण्यतरुलताकुसुमैरभ्यर्च्य भारतीं यास्यामीति संप्रधार्य झटित्येव चलित-स्तस्याभिमुखमुत्क्षिप्तगतिक्रमो देशान्तं तावन्तमल्पान्तरालसुगमं पन्थानम-तिक्रम्य झगिति प्राप्तवान्। अथाग्रे तदङ्गणकवर्त्तिन्यामतिबहलवकुलकङ्कोल-तिलकतालीतमालवलयालङ्करणभाजि पुष्करिण्यां धौतचरणो निर्मलेन पयसा प्रक्षाल्य सततसञ्चारश्रमोदबिन्दुभिः कलुषितकपोलभालस्थलं वक्त्रमाचान्त-शुचिजलपवित्रः प्रविश्य तस्मिन्नसमशिलाकर्मनिर्मिताभोगशोभिनि प्रशान्ता-भ्यन्तरमनोहरे निर्जनतया च रहः श्रीसदसि प्रासादे प्रतिष्ठितां चतुर्मुखवदन-चतुःशालाधिवासपरमेश्वरीमंशुधरचैतन्यरत्नोत्तेजनकुरुविन्दशक्तिं कविजन-रसनाविमानगामिनीमखिलवाङ्मयस्वामिनीं सरस्वतीमपश्यत्। आलोक्य च देवीं झगिति स्पृष्ट इव पङ्कजप्रकरैराश्लिष्ट इव चन्द्रिकया सिक्त इव चन्दनच्छ-टाभिः स्नपित इवामृतरसेन सततमधिकाधिकोद्भूतनिर्वृतिरानन्दितेन मनसा ननु संप्रति सर्वकालीनो वाक्यकुसुमोपहारः श्रेयानिति कुलश्रद्धानुबन्धमाव-द्धकरकमलसंपुटमनुष्टुभा श्लोकयुगलेन स्तुतिमकरोत्।

वागीश्वरि! जयन्त्येतास्तव ध्यानामृतोर्मयः।
यज्जन्मा मानसक्षेत्रे बोधबीजाङ्कुरोदयः॥
जयन्ति तव भास्विन्यो भारति! ज्योतिषश्छटाः।
स्फुरन्ति यत्र तत्रैव ज्ञानरत्नमयो निधिः॥

इति कृतस्तुतिः क्षितितलमिलितालकेन शिरसा प्रणम्योत्थाय च सली-
[illegible] गतेषु सहचारिष्वेकाकी विश्रमितु-

सुत्कीर्णलिखितलेपितानल्परूपकोपशोभावत्यन्तर्मण्डप एव मसृणशिलाफलकनिर्माणशुचिनि मत्तवारणके समुपाविशत्। सुखकृते च वामाङ्गेन तस्थौ। कौतुकेन च निरूपिताक्षिपत्रः समन्ताल्लिखितानेकस्वरूपाणि रूपकाणि पश्यन्नपश्यदुभयतो द्वारशाखावलग्नं रूपान्तरत्वमिव हिमाद्रिकैलासयोः पूर्वस्वरूपमिव पाञ्चजन्यशशिनोः परिणतिसाफल्यमिव पाषाणजातेराधारगौरवमिव धवलवर्णस्य डिण्डीरदेवताजातकमिव चन्द्रलोकपुरुषदृष्टान्तमिव श्वेतद्वीपजनवर्णिकोपदर्शनमिव शशिकान्तसृष्टं निसर्गधवलमुपलपुत्रकयोर्द्वन्द्वम्। तद्दर्शनोत्पन्नविस्मयश्च चिन्तितवान्। नन्वेतदीदृशानपूर्वाकारकमनीयं दृषत्पुत्रकद्वितयमत्र कुतो निष्पन्नं, केन सुकृतसंसर्गशालिना जनेन कारितं, केन वाऽनन्यसामान्यकौशलेन शिल्पिना विनिर्मितं, किं द्वारपालाविमावाहोस्विद्देवताविशेषः कश्चित्, उत द्वारशाखोपशोभारूपकमात्रमेवेदमिति विमर्शपुरःसरमद्भुतमणिपुत्रकालोकनकुतूहलेन व्याक्षिप्तात्मनस्तस्य भगवानुष्णरोचिरस्तं जगाम। अस्तमिते च देवे अंशुमालिनि पतिविलयशोकाक्रान्तयेव पूर्वया दिशा सुदूरमास्फाल्य भग्नाञ्जनकूपिकोच्छलिता कज्जलरजोराजिरिवोदयमहीधरादुल्ललास गरीयसी छटा तिमिरस्य। पश्चिमया तु झटित्युन्मथ्य भाजनमपास्तस्य प्रसाधनालक्तकरसस्य विलुठितः प्रवाह इवास्तगिरिशृङ्गसङ्गत्याचिरात् सन्ध्यानुबन्धी सुबन्धुरो रागः। सहसा नभःश्रियाप्याच्छोट्य कण्ठतो निरस्तानि त्रुटितवरहारदण्डाद्विगलितानि मुक्ताफलानीव प्रविरलसंनिवेशमदृश्यन्त नक्षत्राणि। अथ यथागतमागत्य मिलितेषु सहचारिष्वसावुत्थाय गत्वा च पुष्करिण्यामवश्यकरणीयं कर्म सायन्तनमकार्षीत्। आयतने च सन्ध्याप्रदीपदानाय निर्जनायामरण्यभूमौ कुतश्चिद्वनचरमन्यं वा बहिरन्विष्य समानेतुमनुचरान् प्रेषितवान्। स्वयं पुनः प्रविश्य घननिबिडतमालोकं तत्रैव पटलताच्छादितसुपरिविन्यस्ततूलकं मत्तवारणकमध्यासितः प्रदीपचिन्तया तस्थौ। अत्रान्तरे च झगित्येव तयोर्दृषत्पुत्रकयोरन्तराले गलन्मणिशलाकेव तिमिरसंहतिमुत्सारयन्ती सुधूमकरालाकृतिरनैलवर्तिपरिकरा निराश्रयवती ज्वलन्ती शिखेव परमुल्ललास दीपस्य। तद्दीपदर्शनजातसंभ्रमस्तत्क्षणमेव च द्वावपि तौ तां तथा शिलामयीं सृष्टिमपहाय दिव्यनारीरूपावचिन्त्येन तेजसा ज्वलन्तौ वदन्तौ च मणिप्रदीपानलनिभपरस्पराकृती निजस्थानात् मुक्त्वा देवीं प्रणम्य समुत्कण्ठया च भक्त्या नानाविकल्पानेन परिणतार्थकान्तिना वाचां गुम्फेन स्तुतिं स्तोत्रम्।

देवि ब्राह्मि! जगत्येष मन्त्रोष्मा संभृतस्तव ।
यत्नेन कवीन्द्राणां वाचि पाकः प्रवर्तते ॥
जयन्ति त्वत्कराम्भोजे मकरन्दकणश्रियः ।

मतिमतामग्रगण्य ! मदीय एवैष कवितापरिश्रमो, मया हि महता मनःसंरम्भेण सृष्टः प्रबन्धोऽयमिदानीं क नु किल श्रावयामि, कस्याग्रे स्वीयमभ्यस्यमानमिमं गुणोल्लेखं प्रतिपादयामि, को नाम समाकर्ण्य यथार्थवादितया सौजन्यं नाटयिष्यति, यस्मात्सकलगुणविचारचर्चाविपश्चितां धुरन्धरो धरेन्द्रभूषामणिः वत्सराजनामा नरेश्वरः परमं मित्रमिति मे पक्षीकृतो लोकैः, क्षितिभृतश्चान्ये सर्वेऽप्येकैकेन कटुरवोत्फुल्लगलनालिनानुधव्याघ्रेणाघ्रातसन्निधयः सुदूरमुज्झिता गोजातिभिः गुणिनोऽपि स्वगुणाभिमानमहाभरग्रस्ता नोच्छ्वसितुमपि पारयन्ति, लोकश्च परगुणोन्नतिमसहमानो नीचतां प्रपन्नः, नीचाश्च निसर्गद्वेषिणः परेषु ।

तथाहि—

नीचजातिर्भवत्येव लोकस्थितिविरोधिनी ।
अशिवाऽपि सती येयं ज्वालास्तुण्डेन मुञ्चति ॥

किञ्च—

सूनागृहघटस्येव पिशुनस्य कुजन्मनः ।
आस्फालितमुखस्यापि भाङ्कारः केन वार्यते ॥

ये हि व्यासादिमहाकवीनामपि प्रबन्धेष्वपवदन्ति ते किं न मादृशामपवदिष्यन्ति । साधवो हि कलिकालतमःपटलपिहितेऽस्मिन् जगति क नाम दृश्यन्ते, तेनायमहो न केवलमिदानीमेव यावत्कमपि सुहृज्जनं सत्कविमर्मिणं च श्रोतारमासादयामि तावदेवमसौ बद्ध एव स्थास्यतीत्यादि स्वान्तःपरिपिण्टितमशेषमावेदयाञ्चक्रे । सोऽथ द्विजन्मा तालकः ससंभ्रममनाः कविप्रवर ! त्वमेवमसज्जनात् त्रासविधुरो विषीदसि, मा विषीद ।

नो जीविकेयमिदमन्यगुणापहारकर्म प्रकामसुखदं व्यसनं खलस्य ।
आखोः सुवर्णमपहृत्य कृतं निवासरन्ध्रे करोति किल कामिह केलिवृत्तिम् ॥

तथापि—

कुर्वतः कवितान्भोधौ प्रबन्धेन विजृम्भणम् ।
कवेः प्रौढस्य कस्यास्ति जल्मानुपतो भयम् ॥

साधुस्तु यदेवमभिलषितो द्रष्टुं तदप्युचितमेव स्तुतः ।

नापनुत्सार्यमूनमातपकस्य सम्भ्रमः ।
तेनैव ध्रियते लोकैर्मस्तकोपरि सज्जनः ॥

तदद्यैवं सोऽपि कर्मणा सुकृतेन तवानीतः समागतः साधुजनः शिलशाप्युचितश्रोतृजनानल्पित्वनिर्विण्णः खेदमावहसि ? । आवय महात्मय

कविप्रदीपप्रबन्धमेतस्य सहजसज्जनस्य सुकवेः सूक्तामृतरसार्थिनः परगुणप्रमोदिनो निखिलवाङ्मयविदः कोविदचूडामणेस्तिलकनाम्नो मदीयमित्रस्य, मम च किञ्चिज्ज्ञस्य, सफलय कवितागतं क्लेशमात्मनः, कुरु कृतार्थमावयोः श्रुतीन्द्रियम्। पश्यामः कीदृगुपक्रमः कथायाः, कीदृशाः संबन्धसन्धयः संविधानकस्य, कीदृशो रसः प्रस्तुतोपक्रान्तस्य वस्तुनः, कीदृशी रचना पदन्यासस्य, कीदृशः स्वगुणो भणितिभङ्गीनाम्। अन्यच्च। वर्णानामविसंष्ठुलन्यासो मसृणता परिपुष्टिर्मांसलता काठिन्यविपर्ययः कोमलता स्निग्धभावो लालित्यमिति मसृणता मांसलता कोमलता लालित्यं चेति वाणीगुणैश्चतुर्भिरनुषङ्गवत्यः सप्राणघनप्राणाल्पप्राणैस्त्रिभिर्भेदैर्विभिन्नाः क्रमेण कौकिली मायूरी माराली चेति तिस्र एव किल जातयः सत्कवीनाम्। तथा चैतांश्चतुरोऽपि गुणानावर्जयन्तः कवयः केचन ससौष्ठवैरक्षरैः सप्राणां वाचमुल्लासयन्तः कोकिलमनुकुर्वन्ति। केचिदनन्तसौष्ठववता घनप्राणेन वर्णगुम्फेन शब्दमाराधयन्तो मयूरतामाश्रयन्ति। केचिच्च मितसौष्ठवं बन्धमाश्रित्याल्पप्राणेन वचसा मरालतामनुहरन्ति। अपरे पुनरमीषां चतुर्णां गुणानामेकत्र समवायशून्येन महाप्राणेन निष्प्राणेन वा पदन्यासेन जनयन्तो वाचमेतत्पथोत्तीर्णां भिन्नजातयः कवयस्तदेवं विचित्रक्रमेण समुदञ्चितभारतीकेषु कतमजातिरस्मि कवीन्द्रेष्वित्येतदप्यवगतं भवेदित्यादि सप्रेमदर्शितादरमुदीर्य तूष्णीमभूत्। अथासौ सविशेषविस्मयं कविरहो विज्ञता जनव्यवहारवर्त्मनि, अहो प्रौढिरालापकल्पनासु, अहो व्युत्पत्तिकौशलं कवितागुणेष्वनयोर्यथा चेयमीदृशी प्रबन्धविलोकने दृष्टिर्यथेदमीदृशमनन्यसाधारणं च सौजन्यं तथा नियतं परिश्रमः सफलतामेष्यति मदीयस्तत्किमिति नाहमुपदर्शयामीति सञ्चिन्त्य सुतुष्टेन चेतसा जगाद। हन्त! द्विजन्मकपुङ्गव! कुतूहलेन संभृतगर्भायां सुगुणदरिद्रायां मलाचि जातेयमात्मजा चम्पूस्तदीयममुष्याः सर्वतोऽप्यङ्गेषु दुर्वर्णा च संवृत्ता न नाम यथावद्दर्शिनो जनस्य दर्शयितुं पारयन्त्येतदन्यार्थिना चेद्दर्शयामि, सा पुनरमुष्यां भद्रं किमपि विधिना लिखितं भवत्प्रियसाधना युष्माभिरभिनन्दनीयां दशामासादयति। किन्तु न नाम यदि प्रस्तुतमस्मत्कर्मविच्छेदीति खेदस्य हेतुर्भवामि। तदिमं दीपकोद्योतनकृते वह्निमानेतुं मया प्रेषितमात्मान्तमनुचारिणं लोकमङ्गलादेव निवारयामि परतः क्षेत्रपालदेवकुलिकायां मदीय च शयनाय निरूपयामि। एवं कृते गृहमिव निश्चिन्तेन चेतसा निरवद्यमाख्यानं कथयामीति तावदाशयो मे परमस्तु भवदिच्छा प्रमाणमित्यभिधाय सवन्दनमिति तिलकानुमोदितेन तेन द्विजन्मना तालुकेन सम-

अयमनुज्ञातः समुत्थाय तस्माद्देवीभवनान्तर्मण्डपादङ्गणे बभूव । स्थित्वा तत्र यथा यत्समुचितमालोचस्तृत्रितं कृत्यं त्वरितं तथैव तदखिलमविरलरभसाश्रितश्चक्रे ।

स कविरथ यथावत्सूत्रितैकान्तरम्ये
सदसि वचनदेव्याश्चेतसा सुस्थितेन ।
अविशदसमसूक्त्या सेवितुं तौ द्विजाती
निवसति हि समग्रा यत्र सारस्वतश्रीः ॥

इति कायस्थकविसोड्ढलविनिर्मितायामुदयसुन्दरीकथायां
कविवंशनिवेदनो नाम सारस्वतश्रीपदाङ्कः
प्रथम उच्छ्वासकः ।

द्वितीयोच्छ्वासकः ।

ततश्चासौ तदेव मत्तवारणकमनुसृत्योपविष्टः ससम्भ्रममहो यदाऽऽलोचितं कृतं किं नाम तत्तथा सर्वमभून्न ते निराकुलं हृदयं ?, एवं नेत्थंचरितमारभ्यतां कथेयमेतदाकर्णनरसोत्सुकीभूतमनसो हि वयं प्रतिपालयन्तो भवन्तमेव हि तिष्ठाम इति परिचयानुरोधरसिकया दृशाऽभिनन्द्य भणितः सुभाषितरसार्थिना तालकेन सोल्लासमेवं क्रियत इत्यभिधाय बन्धादुन्मुच्य पुस्तकमुचितक्रमेण श्राविताभीष्टदेवतोपश्लोकनादिकवीश्वरप्रक्रियः कथामारेभे ।

श्रूयतां प्रसिद्धमिह पयोधिवलयवप्रायामवन्यां कनकमिव धातुषु, माणिक्यमिव रत्नेषु, तिलकवर्तनमिव मण्डनेषु, मुखमिवाङ्गावयवेषु, त्रिदिवमिव भुवनेषु, नन्दनमिवोद्यानविपिनेषु, प्रकृष्टं पत्तनेषु, सर्वाङ्गसादृश्येन सोदरं पुरन्दरपुरस्य, उपरिनिवासेन तलवर्त्तिनः फणिपतिनिवासनगरस्य शिरसि च दत्वा पदमिव तिष्ठमानं, सुदूरमञ्जनच्छायं, गगनमनुप्राप्तैस्तत्कान्तिसङ्क्रमेणेव श्यामलितैरमलमरकतोपलफलकसङ्घट्टसृष्टैरट्टालकैरलङ्कृतेन सितमणिनिर्माणवता प्राकारचक्रेण कुण्डलितम्, उत्तुङ्गदुर्गाट्टालकपरिपाटिभित्तिभिः स्खलितादभ्रतटिनीप्रवाहादधःपतितैरिव निर्ज्जितार्णवभरणविस्तरैर्वारिभिरापूर्णगर्भया परिखया प्रपञ्चितोपान्तरमणीयं, परिखातटीष्वनिलसन्निवेशवलयितेन यज्ञानलधूमसमुदयेन समन्तादसितकाण्डपटेनेव विनिवारितप्रवेशं कलिकालदृष्टेः, शशिकरानुषङ्गनिष्यन्दिनामिन्दुकान्तदलविरचितच्छादकानां निम्नाध्वयायिना रसेनेव निर्मलतमेनाम्भसा पूरितगर्भगम्भीरैरङ्गणकवापीविशेषैर्भूषिताभिरमरमन्दिरश्रेणिभिरभिरामचत्वरोद्देशम्, उपरितिर्यक्पतितपृथुतरकिरणच्छटाग्रकैतवादातपत्राणाय शिरसि दत्तेनोत्तरीयवसनाञ्चलेन सततमर्थिजनागमनं प्रतिपालयन्तीभिरिव बहिःस्थिताभिः सत्रशालामणिमण्डपश्रीभिरुद्भासमानं, मणिभित्तिसङ्क्रान्ताभिः प्रसारकनिविष्टानां तुन्दिलशरीरिणां वणिजां प्रतिमूर्त्तिभिरन्तर्दृश्यमानविश्रान्तधनदैरिव निरन्तरमापणैः सारीकृतक्रोडं, कृतकनकप्रसारकैः सौवर्णिकैरपावृतं रूपमिव सुमेरोः, पतिमुखविलोकनानिमेषरम्याभिः कुलपुरन्ध्रिभिरनूर्ध्वगतं खण्डमिव स्वर्गस्य, गृहीतसितरत्नादर्शमण्डलाभिः … , स्वर्गसङ्गतं संस्थानमिव चन्द्रलोकस्य, सकलशास्त्रानुकूलवाणिना … न साक्षात् स्थानमिव सरस्वत्याः, सुनेपथ्यभूषणवता प्रकृतिवर्गेण

वरयात्राडम्बरमिव कुबेरस्य, स्फुरत्किरणालोकशालिना प्रासादपुष्पकभरेण कटकमिव दिवसराजस्य, प्राकारवलयवर्तुलं मुखमिव जम्बूद्वीपस्य, लसद्गो-पुरपताकांशुकं नेपथ्यमिव भारतवर्षस्य, पीवरायतकलशस्तनं यौवनमिव वसु-न्धरायाः, मणिभवनभानूज्ज्वलं लावण्यमिव भुवनश्रियो, मर्त्यलोकनटेन निजा-ननप्रोतं प्रतिमुखमिवाखण्डलपुरस्य, दक्षिणापथेन लिङ्गिना परिगृहीतं व्रतवेष-चिह्नमिव विद्याधरलोकस्य, तलभूमिकुट्टिममिव त्रिदिवहर्म्यस्य, मुकुटमण्डल-मिव फणिभुवनभूपालस्य, जगत्त्रयाभोगभूषणं निकामरमणीयमस्ति मलयमु-द्रितायां दिशि कुन्तलेषु तटे गोदावरीतिमहासरितः प्रतिष्ठानं नाम नगरम् ।

लीलामण्डपरत्नभित्तिषु सितस्वच्छासु भूरिक्रमं
सङ्क्रान्ताखिलसञ्चरत्परिजनप्रत्याकृतीनां छलात् ।
यस्मिन्नीश्वरमन्दिरेषु परितः सन्दर्शयन्ती सदा
छायाखेलनकं न कस्य हरते सौन्दर्यलक्ष्मीर्मनः ॥

अपि च—

विलसदमलमुक्तास्तम्बलग्नेन्द्रनील-
द्युतिदलसरिकालीकर्बुरैः कुन्तलीनाम् ।
सरलतरकटाक्षैः श्वेतकृष्णैककर्त्ता
प्रभुरसमशरोऽभूद्यत्र यूनां जनेषु ॥

यत्र च कवाटवर्तिना विलसदमलमाणिक्यमणिमरीचिपटलेन सततमन्तः-प्रवृत्तलक्ष्मीनिमित्तमाहितेन कौसुम्भेनेव वाससा चिह्नितं द्वारमादधानैरनवरत-मुपस्थितातिथिपदप्रक्षालनजलप्लवेनेव चन्द्रोपलकसोपानकशुनिर्भरेण प्लावि-ताङ्गणकवस्तुभिः सुवर्णभवनैराभरणपदकवन्धैरिव निविष्टनायकैरलङ्कृता शोभते समन्तादाभोगलक्ष्मीः । यत्र च सुवर्णकुट्टिना धातुव्यवहारेण कथी-भूतो वार्तिकेन्द्रविद्यागमः, सङ्क्रान्तनिधानकोटिभिर्भवनैः प्रलीनः खन्यवादः, प्रभूतभव्यगणिकाङ्गनोपभोगलीलाभिः व्यशीर्यन्त विटप्रवेशवार्ताः, मन्दिरद-लीकृताशेषविषहरोपलशिलाप्रभावेण भस्मीकृतपन्नगतया समुच्छिन्नो गारु-डव्यतिकरः । यत्र च प्रतिपथमतिप्रांशुतरमन्दिरशिखरशृङ्गप्रपाटितादिवानु नभस्तलचारिणश्चन्द्रमसो मण्डलाद्गलितैरनल्पसंपातिभिरमृतरसैरिव सुस्वादु-शीतलविनिर्मलैः पयोभिर्भरितगर्भाः कमलकुवलयामोदसङ्गिनो हृदयमानन्द-यन्ति कोटिशो जलाशयविशेषाः । यत्र च प्रतिहर्म्यशिखरमखिलगगनापगाम-णिशिखासङ्गमसमाकुलैरपनतनयणिभिरम्बुधरवाजिविधुरं प्रवर्तयन्ति सारथी

दिग्यात्राप्रस्थितासु प्रतिपथमभितो यस्य सेनासु मन्ये
नो राज्ञामेव लक्ष्मीर्झटिति विघटिता वक्षसः शार्ङ्गिणोऽपि ।
क्रामत्कुम्भीन्द्रचक्रक्रमनमितमहीगोलदोलायिताब्धि-
क्षुब्धोर्मिस्तोमफालप्रसरवशविपर्यस्तशय्योरगस्य ॥

अपि च ।

श्यामा समीकभुवि यस्य सुवृत्तमुष्टि-
मूलेन्दुरत्नफलकोपरि खड्गयष्टिः ।
दृष्टा परैः प्रलयशङ्किभिरुल्लसन्ती
शीतांशुबिम्बविलयादिव धूमवर्तिः ॥

यस्य च निजावसरवर्त्तिनं नीराजनोपहारमातन्वतस्तत्कालमिलितसकलबलभरनमितमेदिनीपीठपृष्ठस्य कमठपतेर्वल्गदविरलविलोलवाजिविन्यस्तखुरनिष्ठुरखटत्कारनिविडारवच्छलेन भज्यमानपृथुकटाहकर्परध्वनिरभूतपूर्वो भारतसमरसङ्कटेऽपि विसङ्कटाभोगमुल्ललास । यस्य च समरसंहृतारातिकुलकुटुम्बिनीभ्यः कुङ्कुमालेपमादाय शक्तिमान् पादलेपसिद्ध इव मनुष्यजनागोचरेषु सञ्चचार परितः प्रदेशेषु प्रतापः । यस्य च निकामवृद्धा वृद्धोचितं चरितमादृत्य त्रिपथगामिन्या गीर्वाणसरितः स्रोतसां त्रयेऽपि स्नातुमभिलषन्तीव बभ्राम भुवनत्रयं कीर्तिः । यस्य च महापङ्कमग्नाऽऽदिकूर्मपृष्ठावस्थानलग्नमम्भसा धारागतेन क्षालयितुमिवात्मनः पङ्कमावासिता कृपाणे काश्यपी । यस्य च स्वर्भानुभयस्थानं चन्द्रमसो मण्डलमपहाय तदनुकारहारिणि हारप्रभावलयमण्डलिते वक्षसि बभूव सुस्थिता लक्ष्मीः ।

किञ्च—

वक्षसि निवेश्य लक्ष्मीमुपरि च कविजीवितेन मुखकमले ।
विन्यस्यासनमुचितं गौरविता भारती येन ॥

यः खलु निखिलनरपालचूडामणिक्ष्मापलपरित्यागनिश्चयार्थमिव कृतकोशया प्रसादितो लक्ष्म्या, निजोचिताचरणव्यभिचारनिरासार्थमिवोत्क्षिप्तकन्यया प्रत्यायितः कीर्त्या, त्रिनयनविनाशितानङ्गसङ्गनिवृत्त्यर्थमिव कृतशरीरसर्गो रूपेण, जलाधिपत्यपरिपालनार्थमिव गृहीतो वात्सल्येन, समरविजयाधिकारस्वीकारार्थमिव जनितदक्षिणकरग्रहो विजयेन, निसर्गोन्नतदुर्नयानतिनिर्मात्यर्थमिव स्पृष्टचरणः प्रणतारिपार्थिवशिरःश्रिया । यो हि तेजसामाश्रयो न सूर इव सहस्रशः करैर्मण्डलमुत्तापयामास, न शीतांशुरिवापरोदये वक्रता-

मधत्त, न सप्तार्चिरिव दाहकृता व्यापारेण भूतिमुत्पादयाञ्चक्रे, न प्रदीप इव पात्रोपरि ज्वलितवान् , न माणिक्यमणिरिव सुवर्णबन्धेषु नायकत्वमालम्बते स्म। किं बहुना।

ग्रीष्मस्तीव्रतमैः प्रतापविहृतैर्वर्षा रिपुस्त्रीदृशा-
मासारैः शिशिरश्च सान्द्रतुहिनच्छायैर्यशोराशिभिः।
इत्येवं विहितक्रमेण भरिते कालैस्त्रिभिर्भारते
वर्षे यो व्यसृजत्कृपाणमवनेः स्वामी भुजा मेचकम् ॥

स राजा शिशुरेव सुकृतसेनासमग्रे विशेषजिगीषयेव गते लोकान्तरं पितरि स्वयं भुजबलेनाऽऽहृत्य दिग्विजयं, विजयनिशितेनासिना विलूय मूलतः शात्रवं वंशम् ,आज्ञया प्रवेश्य द्वारेण राजन्यकं, प्रतापेनाक्रम्य समस्तान्याशामुखानि,यशोभिरावृत्य त्रीण्यपि भुवनानि, धर्मेण निरस्य प्रबलं कलिकालं, गुणैरनुरञ्य सकलं साधुलोकं, विनयेन सन्मान्य गुरुजनं, सत्कारेण संवर्ग्य बन्धुजातं, हृदयेनावर्ज्य परितः प्रणयिवर्गं, प्रसादेनाऽभिनन्द्य क्रमागतमनुजीविसामन्तचक्रम् ,अनुरक्तप्रकृतिकमनीयामनेकशः प्रजावतीं ककुप्करिकुम्भसिन्दूरभरितसीमन्तरेखोपशोभितामवैधव्यचिह्नमिव चतुरम्भोधिवलयालङ्कारमादधानां वंशपत्नीमिवानन्यभोग्यां विधाय वसुमतीमेकातपत्रशेखरं साम्राज्यसिंहासनं भेजे। भुवः सम्बन्धेषु च स्वामिकृत्येषु चरितार्थतया सुस्थितान्तःकरणवृत्तिरनुभवितुमशेषाणि संसारसुखानि, कर्तुं यौवनोचितान्विलासान् , विधातुमभिमताभिलाषपरिपूर्त्तिभिः कृतार्थजन्म,समग्रगृहपरिग्रहादिचिन्तापरं राज्यमभितोऽपि धीमतां धुरन्धरे मन्त्रिणि समस्तमारोपयामास। मन्त्री च तस्य कटकाश्रयो दक्षिण इव भुजस्तम्भः, स्वमतिसंहृतारातिरमणीशृङ्गाररसप्रशोषको मूर्त्त इव प्रतापः, परिगतो मन्त्रविक्रमाभ्यामखिलविद्यावतारपात्रं, खन्यवादी वैरिवंशमूलस्य, वशीकरणकोविदो लक्ष्म्याः, कृतजलस्तम्भो व्यवहारेषु, दर्शिताग्निस्तम्भः प्रजोपतापेषु, सततमवनतानेकराजकललाटतिलकपङ्कलेपादिव भर्तृभिक्षागतारिकुलकुटुम्बिनीबाष्पजलधाराधौतचरणः, शरणमाससमागराया भुवो, भूषणं द्विजातिवंशस्य, पुङ्गवः पुंसां विभूतिवर्द्धनो नाम। यो नूनमनिर्मथितसमुद्रमनिरस्तसत्त्वमपीडितभोगीश्वरमक्षपितविबुधलोकममन्दरागप्रपञ्चमेकेनैव प्रज्ञागुणेनाकृष्य लक्ष्मीं निजस्वामिनः सततमुरःस्थलनिवाससुस्थितामकरोत्। यश्च महीभृतामाञ्जनेय इवोन्मूलने, नल इव प्रतिष्ठापने, पयोधि- [illegible], राम इवोपयोगविधाने प्रभुरभूत्। किं बहुना।

यः शीतलैर्मृदुतरैश्च करैः प्रजानां लोकं निशाकरमणिप्रतिमाभमच्छैः ।
प्रासङ्कमं तुहिनरोचिरिवानिपीड्य निष्यन्दयन्न वनितापहरो बभूव ॥
अपि च ।

स एव मन्त्रिणामाद्यो यस्य मन्त्रबलात्तदा ।
ननर्त्त जलता भर्त्तुश्चलितं तु पदं द्विषाम् ॥

स तेन मन्त्रिणा परिगृहीतसकलराज्यचिन्ताभरो निराकुलः कदाचिदास्थानमण्डपगतः प्रणामदोलायितानेकनरपालमुकुटमुक्ताफलकिरणनिकुरुम्बैश्चामरैरिव वीज्यमानः श्रिया, कदाचित्कविसभामधिष्ठितो विचारयन्काव्यजातमुल्लसन्तीभिरमलदशनांशुराजिभिस्तत्प्रसादादिव दीयमानरत्नावलीभिराभूष्यमाणवदनाङ्गणः सरस्वत्या, कदाचित् तुरगवाहनविलासमनुसरन् वाह्यमानविविधहरिखुरखटत्कारकैतवेन कटिति वर्णनाक्षरैः पदे पदे प्रशस्यमानः पृथिव्या, कदाचिन्मृगयामुपेतो मृगवधाकूतचकितेन रजनिमासाद्य तं हरिणमात्मनो मित्रमुरसि धृत्वा दिवि पलायमानेन परार्पणेनात्मीयरक्षणमितीव दर्श्यमानस्नुकरश्चन्द्रेण, कदाचिद्विभ्रमोद्यानवर्त्ती सुरभिमुखश्वासदर्शनाय बन्धुप्रेमागतेनेव शिशिरेणानुगम्यमानः समीरणेन, कदाचिज्जलक्रीडामाचरन्नुभयपार्श्वगतेन चतुरसीमन्तिनीकलितकनकशृङ्गकोशोज्झितस्याम्भसश्छटायुगेन सरभसमभ्यागताभीष्टवत्सलतया प्रसारितेनेव भुजलताद्वयेन परिरभ्यमाणो वरुणेन, कदाचित् शृङ्गाररसरसां गोष्टीमनुतिष्ठन् समन्तात्पतद्भिरमलगङ्गाम्बुधवलैर्विलासिनीकटाक्षैः रूपेण सगोत्र इति स्वराज्य इवाभिषिच्यमानो मनोभवेन, कदाचिदचिन्त्यपयं प्रेक्षणकमालोकयन्नुपरिमण्डपतुलाफलकसङ्क्रान्तया प्रतिमूर्त्त्या त्रिदिवनगरागतेनेव दृश्यमानविलासोत्सवः पुरन्दरेणेत्यादि, सदैव देवैरनुकूल्यमानाभिकमनीयकेलिः कालमतिवाहयाञ्चक्रे ।

एवमस्य बहुशो विपक्ष्यमाणैर्धनैकस्वामिना कुबेरेणाप्रार्थितैः श्रियो नाथेन विष्णुनाप्यदृष्टैस्त्रिभुवनाधिपत्यपरमेश्वरेण मघवनाऽप्यननुभूतैरभिनवोद्भूतप्रभृतभङ्गिभिर्विलासैः सारीकृत्य सकलं संसारसुखचक्रवालमनुभवतः कदाचित्क्रमेण कालपरिपाटिरुपपन्नः प्रोषितवधूवदनचन्द्रस्य, बन्धयोगः पानरीसम्मदरसस्य, कवाटोद्घाटः पथिकनिर्गमस्य, पञ्जरकभङ्गश्चण्डभानुपञ्चाननस्य, कुसुमितसप्तच्छदपरिमलेन मदागम इव नवर्त्तुवारणस्य, विमुक्तबन्धूकवनालोहितद्युतिभिः सिन्दूरमुद्राविष्कार इव पुष्पपुराजस्य, प्रस्तायमाणजिगीषुनृपातपत्रैः कुसुमकाल इव नरेन्द्रपर्याणाम्, उत्तेज्यमानविविधायुधालोकैर्दिवस इ

अन्तःश्वेतशिखाकणाङ्कितसटै रापाण्डुभिः केसरै-
राकीर्णोन्नतकर्णिकं विकसति क्रीडातडागेऽम्बुजम् ॥

अपि च ।

वापीषु स्फुटितारविन्दविवरक्रोडे कडाराकृतिः
कोशः केसरशृङ्गशुभ्रकणिकाचक्रेण पर्यञ्चितः ।
लक्ष्म्याः कर्णविभूषणस्य परितः प्रान्तेषु मुक्तामणि-
श्रेणिस्वीकृतहेमपत्रवलयस्यालङ्कृतेर्विभ्रमम् ॥

एवमन्यतोऽपि निभालितानेकनूतनोन्मिषितमुकुरकुसुमामुग्धचक्षुषे[illegible] [illegible]पयित्रीमुद्यानसंपदमुदञ्चितप्रीतिः कृतकृत्य इवान्यत्र परिशिष्टे [illegible] निरीक्ष्य तं कर्मकराग्रण्यमानन्दितेन चेतसा ततो निर्गत्य समागन्तुम[illegible] [illegible]नस्मि । अथ तथाऽहमेकाकी निश्चिन्ततया समन्थरमागच्छन्नेकत्र पु[illegible] [illegible]प्रदेशे पवनपूतातपकदर्थितश्छायार्थी सौगतमवाप्य हृद्यमायतनं [illegible] [illegible] [illegible]मत्तवारणके समुपाविशम् । उपविश्य स्वस्थतामुपेतश्च [illegible] [illegible]तः स्वतन्त्रालोकमक्रमेण देव! यावदग्रे विलोकयामि ताव[illegible] [illegible] सः प्रातरुद्याने गच्छता मया स्फटिकसृष्टिपरिपाण्डुरो [illegible] [illegible] चैत्यमिन्द्रनीलशिलानिर्मितमिवातिहरितवर्णमद्राक्षम् । [illegible] [illegible]! किमेतदद्भुतविजृम्भितमिदानीमेव मया स्फटिकशुभ्रो[illegible] [illegible] दृष्टः कथमियतैव क्षणे हरितमणिनिर्माणनीलतां प्रपन्नः । किमे[illegible] [illegible]नेकवर्णतः कोऽपि मणिदलविशेषः, किमन्योऽयं देवता[illegible] [illegible] [illegible] शिलाकान्तमयीं सृष्टिमिन्द्रनीलेन घटितः, कि[illegible] [illegible] तं पुरातनं चैत्यमुत्थितो रसातलात् । किमेत[illegible] [illegible] [illegible] सकलमालोकते मदीया दृष्टिः, [illegible] [illegible] [illegible] चक्षुर्भ्रान्त्यादि विकल्पयन्नेव [illegible] [illegible] ।

[illegible] ।
[illegible] ॥

[illegible]

शशिकान्तधवलामाकृतिं चैत्यमानयन्नतिहरितया देहत्विषा सिक्त इव नीलीरसेन छुरित इव दलितेन्द्रनीलधूलिभिश्छादित इवारविन्दिनीदलैर्नीलपक्षपटावगुण्ठितः सङ्केतवानिव शरल्लक्ष्मीमभिसृतो हरितांशुकावरणो नीलपट इव मुख्यं रागमावहन् शरदागमकृतः करसंपुट इव भुवनश्रियो नीलमणिविनिर्मितः शुक्तिपुट इव रतेर्हंसो विनोदयितुमागतः कृतापूर्वरूपो वेषकार इव शिरसि विस्फुरन्त्या विभूषितः शिखया शकुन्तराजस्य वज्रेण विरचिता चञ्चूरिति सङ्घर्षेण पद्मरागमणिसृष्टयेव पाटलया चञ्च्वा विराजमानो विजित्य जलदागमाद्गृहीतं शरत्कालेन प्रदत्तमात्मीयं विजयवेषमाखण्डलं धनुरिवानेकवर्णधरं कण्ठेन रेखावलयमादधानो गगनाध्वगमनसङ्गातवानितीव रविरथतुरङ्गकान्तिभिः कृतपक्षपरिग्रहः परितोऽपि मसृणघनपिच्छसञ्चिताकृतिरभिरामदर्शनः शुको निर्जगाम। निर्गत्य च तस्यैव शिखरमारुरोह। तं तथा विलोक्य सपल्लवितकौतुकमहो क एष शुकः, कतमजातिरसौ, कोऽयमद्भुतरसानुबन्धी विलक्षणोऽस्य मूर्द्धन्युद्गमः शिखायाः, कथमेकखण्डेन्दुकान्तशिलानिर्माणतया नीरन्ध्रसन्धिगर्भेऽत्र चैत्ये प्रवेशनिर्गमावस्य। सा चेयमासीदन्तर्निवि[illegible]स्यास्य प्रभानुभावाद्गीलना चैत्ये। स्वहृदि भावितेन च प्रगल्भया [illegible] गम्भीरस्तुभगसन्तःकरण एव निसृष्टार्थं पठितमपि नूनमनेनैव। [illegible] तिर्यग्जातावप्येवमनुज्ञासस्तुस्थितः पतङ्गत्वेप्यलोललोचनः पठति [illegible] लभ्यवानेव शिखा चेयमाश्चर्यकारिणी शिरसि तथा [illegible] केनाऽपि वस्तुभूतेन भाव्यम्। भविष्यति च महतो भूमिग[illegible] विधृत्य पार्श्वीकृतः परमविनोदार्थमुपकरणं भवितुमर्हत्येव [illegible] पभूवलयनिराकुलस्य राज्ञः। किन्तु कथं मे करगोचरी[illegible] नेऽप्यदृष्टमश्रुतं च कौतुकरसैकपात्रममुं समर्प्य प्र[illegible] मदीयचिन्तानन्तरमेवाऽसौ ततः शिखरादधो निर्गत्य [illegible] त्रैव मूलमणिपीठकुट्टिमे समं धरिमविभ्रमं भ्रमितु[illegible] भसमुद्भूताङ्गेन ग्रहाय मया नस्य दृशोरविषयं [illegible] तगात्रमलक्षितपदप्रचारं च गत्वा झगित्येवोपरि [illegible] मानो झटित्युड्डीनवानुड्डीय च पुरस्तात्सो[illegible] कटस्य पदशाखिनः शिरसि। अथाऽहमु[illegible] नितान्ततः! कथमिदं पक्षि[illegible] एवमेव पुरस्तात्ततः गङ्गन्तोऽस्यानिदानीं [illegible]

धूतोऽप्युड्डीय गतवानिति हा धिङ्मे पापस्य पुरुषव्रतमवश्यमेतस्य पृष्ठानुलग्नस्तत्र यामि यत्रासौ व्रजति। यदि तावदिहैव वटशाखिन्यास्थितो धृतस्तदा धृत एव न चेदितोऽप्युत्पत्य यास्यति ततो नाम निरालम्बने व्योमनि वहन्नेव वासरमशेषं नेष्यति। तथाऽपि स्वप्रतिभासात्सङ्गतिरसाचारलोभात्परिश्रमाद्वा क्वचिदवस्थास्यति। तदित्थमविषण्णेन मनसा कृतानुबन्धे ग्रहीष्यामि निश्चितममुं विहङ्गसारमित्यवधार्य धावितस्तं प्रति पादपं न्यग्रोधम्। न च यावदेकस्य पदस्यान्तरेण तं तरुतिलकमासादयामि तावत्ततो झगित्यसावुड्डीय नभसि वोढुमारब्धवान्। अहमपि वस्तुलोभाल्लङ्घितविवेकस्तस्मिन्नेवाधाय दृष्टिमाविष्टेन चेतसा मार्गामार्गमगणयन्सवेगमत्रोपविशत्यत्रोपविशतीत्याशया प्रधावितुमुर्वीपथेन लग्नः। सोऽपि तथा व्रजन् क्वचिदुपविशत्येव न क्वचित् चरणस्पर्शमात्रमुपविशति क्वचिदुपविष्टमात्र एवोत्पतति, क्वचिन्मे निकटीभूतस्य सञ्चलनमाकलय्य चकितः पलायते, क्वचित्करसङ्ग्रहं यावदागतोऽपि विच्यवते इत्येवममुना क्रमेण तेन पक्षिणा कदर्थ्यमानस्य प्रधावतो मे झगित्येकत्र दुरन्तारण्ये गहने घनतरुशिखरशाखान्तरशतैरन्तर्यमाणः स खलु दृष्टेरगोचरो बभूव। अथाऽहं तथाप्याशया विडम्बितः सर्वतो विलोकयन्नग्रतो दृष्टामरुणकुसुमकलिकामपि तच्चञ्चुरिति सरभसमनुसरामि, हरितफलगुलिकामालोक्य तन्मौलिधिया धृतिं बध्नामि, प्रचलति विनीलतरुदलेपि तत्पक्षतिप्रतीतिमाचरामि, विकटार्कफलकोशदर्शनात्तदङ्गमेतदिति विकल्पयामि, झटित्युड्डीनान्यशकुनिपक्षपुटफटत्कारेण तस्योत्पतनमाशङ्क्य चात्मानमनेकशो नटयामीत्येवमदृश्यमानेऽपि तस्मिन् सदृक्षदर्शनोद्भूतभ्रमेण धावन् भूयसीं भूमिमतिक्रान्तवान्। अनन्तरमन्ते च विपिनस्य प्रकाशमागतेषु ककुभां मुखेषु खण्डिताशो गतः स तावत्पत्री, तदितो वलामि पुनरग्रतो वा यामि, किमन्यमन्वेषणोपायमास्त्रयामीति समुचितानुष्ठानमूढो मनाङ्न्यञ्चितेन चेतसा समत्सरमितस्ततः सलवलन्नेकहेलयैव पुरस्तान्नातिदूरमविरलतरुसरलवेणिकान्तरितमनेकारावबहलं विहङ्गकोलाहलमश्रृणवम्। तदाकर्ण्य पुनरुन्मीलिताशो नन्विमामेतावतीं भूमिमतिश्रमार्तोऽपि व्रजामि। मा पुनरिह विहङ्गसङ्गतिरसादवस्थितोऽसौ भविष्यतीति सञ्चिन्त्य सत्वरस्खलितो यावत्तां तरुश्रेणिमासादयामि तावदग्रे तेनैव पुलिनतलमिलितसकलजलशकुन्तकेलिकूजितरवेण निवेद्यमानां गरिमगणनोपस्थितस्य प्रथमरेखामिव पश्चिमसमुद्रस्य, समुद्रमथनोत्थितस्य निस्सारसरणिमिवामृतरसस्य, सलिलसञ्चारसारणीमिव भारतक्षेत्रस्य,

विलासपट्टिकामिव दक्षिणदिशोऽञ्चलस्य, लावण्यपद्धतिमिव धरायाः, तीरच-रसमीरणारणितसणवीजकोशिकाचक्रवालवाचालपालिभिः क्षेत्रैरुभयतोरम्या-मसमशरनिवासनिर्भराविरलतरुनिकुञ्जराजिभिरभिरामरोधसमसीमप्रसरां भगवतस्तिग्मत्विषो दुहितरं तामतिप्रसिद्धनामवतीं तापीतिमहासरितमद्राक्षम् ।

देवी भानुमतः सुतेयमनया मुक्तामणिस्वच्छया
कृत्वा तं प्रतिबोध्य चण्डमहसं कूर्मैः स्वरक्षामिति ।
ध्वान्तैर्या पुलिनोपरूढविटपानम्रप्रवालस्फुट-
त्पुष्पामोदमधुव्रताकृतिधरैः क्लृप्ता समासेव्यते ॥

अपि च ।

या महासिन्धुरुष्णांशुप्रसूताप्येतदद्भुतम् ।
सदृशी हन्त शीतांशोः शैत्येन पयसामभूत् ॥

दृष्ट्वा च तां सविस्मयं आः! सुदूरमागतोऽस्मि नन्दावटपुरादियं भगवती दशभिर्योजनैराख्यायते सिन्धुरहो मे प्रवृत्तिराग्रहस्य भवतु किमनेन प्रस्तुतं तमेव गवेषयामि तावदित्युभयतीरवर्तिषु तत्र घनपत्रिणां पेटकेषु निपुणं निक्षिप्य चक्षुरालोक्यमानोऽपि समन्तान्नसन्क्वापि दृष्टः शकुनिरितश्च भगवान्भुवनैकचक्षुरादित्यः संवृत्य दिवसविस्तारमपरस्यां दिशि प्रयातवान् । अथ तथा वृथागते क्लेशेऽहमुन्मुच्य सरलं विषादसूत्कारमन्तःकरण एवं भावितवान् । हा! कष्टमविमृष्टेन पथाऽद्य मया क्लेशितोऽयमात्मा । यद्वा साध्यमसाध्यं च विषयमनालोच्य विचरतां विफलीभवत्येव पुंसां प्रयासस्तदेतदतिमहीयसो मोहस्य विलसितं यस्मादेवमुत्पद्यते विवेकिनामप्येकहेलयैव परिभ्रंशो मतेः ।

अन्यथा किमयमीदृशी न मे संवित्तिर्यत्किलासौ पक्षी, पक्षिणस्तु खेचरीभवन्ति, खेचरा हि न कुतश्चिदुपायादृते क्षितिचराणामगोचरा एव, तावत्सन्दिग्धसिद्धिः प्रथममेव पाशकादिसदुपायः परिहृतः । पुनश्चैत्यान्तिकादुड्डीय निर्गते तस्मिन् किमिति मे पृष्ठलग्नस्यामुना संरम्भेण कुतश्चिन्निष्फलतया लोकेषु कथ्यमानोऽप्यसौ व्रीडाकरो व्यतिकरः । किमन्यदात्मनोऽपि लज्जितोऽस्मि । तदस्तु यद्वृत्तं वृत्तमेव । ततः संप्रत्यपरमालोच्यते यन्न तावदिह मन्ये ग्रामटिका नेदीयसी काचिदन्तिमश्चायमञ्चलो दिनस्य । निशाप्यन्धकारवती । बाढमविदितश्चैव विभागो मार्गस्य । निस्सखश्चाहम् । अवेला च पान्थजनोपलब्धेस्तदत्रैव क्वापि सवासरशेषामिमां निशामतिवाहयामीति निश्चित्य सर्वतो भालयन्स-

मन्थरप्रचारमुच्चलितस्तस्यैव रोधसः शिरसि प्रवृत्तं पन्थानमनुसृत्य वामतो
नातिदूरवर्तिन्येकत्र नवदलविनीलयवनकपट्टिकावलयमण्डलिते विलूय पुञ्जित
व्रीहिणि क्षेत्रखलके झटिति दृष्टमुत्कृष्टं कुटीरमपत्रपेण चेतसा सहर्षमाश्रितोऽ
स्मि। तच्चान्तरमानुषमेकत्र कृतपलालसंस्तारमन्यत्र विवृतकालिङ्गपुञ्जमपरत्र च
खण्डभाण्डकोद्भासितैः चुल्लकमालोक्य नन्वेवमिह संवृत्तिश्चेदवश्यमास्ते कश्चि-
दतः स यावदायाति तावद्बहिरेव तिष्ठामीति चिन्तासमसमयमाजगाम परमे-
कतो मानुषाकृतिः श्वापदपशुरश्मश्रुपुच्छोऽनड्वान् दिवसदृश्यो भूतविशेषश्चैत-
न्यवानुपलपुत्रकः परुषहलमुखविपाटितया पृथिव्या प्रदत्तशाप इव स्फुटिताग्रच-
रणस्तृणकुलानि गोरूपकैश्चारयत्यविरतमश्नाविति क्रोधान्मारुतविलग्नैः शालिम-
लनोच्छलितपलालदलशकलकैर्गृहीत इव कूर्चकेशेषु हरिद्राफलाष्ठीलगुलि-
काभिरिव लाङ्गलकुशकुठारीकलनकिणग्रन्थिभिः स्थपुटितकठोरकरतलो मस्त-
काहितचारिभारकः स्थूलया च दर्भवलितया रज्ज्वा वनद्धपरिधानः स्कन्धीकृत-
जरत्कम्बलीखण्डो दण्डपाणिः पामरः। पश्यामि च तदन्तिके वामकरगृहीतम-
विपुलपलाशनखवल्कचारिकयावनद्धचरणं तमेव परमुत्तमं पतत्रिणां कीरम्।
आलोकिते च तस्मिन् मृतोज्जीवित इवाहमानन्देन विकसितविलोचनो विशा-
लया पुलकसम्पदा परीतमूर्तिरन्य एव संभूतवान्। अथासौ पामरः प्राङ्गणक-
एकान्ते प्रवेश्य चान्तश्चारिभारकं तत्रैव बन्धनरज्जुवलये तमप्यावध्य विहङ्ग-
पुङ्गवमागत्य मत्समीपे स्कन्धादाकृष्य कम्बलिकामुपाविशत्। क्रमश्च मदन्तनिष्फलौ
हस्ताभ्यामपि कराभ्यां शिरः कण्डूयितुं तथा भ्रान्तः! कुतो ग्रामादागतोऽसीति मां
पृष्टवानन्तरं शिरःकण्डूयनमुखासिकामीत्कारमुन्मुच्य तदन्तरा क्षेत्रे विशन्ति
गोरूपकाणि हक्कयन्नन्तरं पुनरपि वृत्तान्तमुक्तवान् वचसा तमेव प्रश्नार्थं निर्वा-
हयन्निव तदनन्तरं ग्रामेयकस्य भावनया वा मन्मनः कदर्थितवान्। अहमप्यहो
स्वेच्छयास्तु पामरवार्तिका नाम भवतु। स्वर्णपरिणामया किमस्य वा स्वरूप-
चिन्तया, नावज्ञावद्यापि स्वकीयं कार्यमनुपश्यन्ननेकगम्या ग्राम्यजातिर्गिरि-
स्थानापहरणनापूर्वमनुकूलाभिरुक्तिभिरमुं प्रसाद्य सुभगमात्राभिनाभिल-
षति करोति, तथाभिमितश्च पश्चादभिनवत्रीणि किमयमालपनानि
स्वानि, दृष्टानि च शुकस्य नामान्यमस्य च नर्तानि, गृहाणि वैनमे-
तस्माद्गृहादेवैतोदृगेव दृश्यं शुकरूपमिति विचिन्त्य तथाहमपग-
निविष्टमनुकूलवचनैर्वचोभिरद्यावदालाप तं प्रवर्तितवानस्मि। सोऽपि
मे तत्कालानुकूलवाग्भिर्दत्त्वा संभूतानां ग्रामवार्तानामनवधिभिर्वर्णि-

त्यनुपदर्शयन्नुपकोणवर्तिनीं प्रस्तरपलालपिण्डितामाकृष्य च स्थालीमाग्रहाद्धा-लितान्निकया करम्बितेन यवनलकमहोदनेन तत्समयेन भृष्टेन चोष्णेन का-लिङ्गशकलिकाशाकेन कृतगौरवमातिथ्यमकरोत्। दिनबुभुक्षितश्चाहं त-द्धि गोपालहालिकीयं भोज्यममृतमयाहारनिर्विशिष्टमिवोपभुज्य मृदुनि नव-कलमपलालतल्पे तेनोक्तः स्थितिमकार्षम्। पामरोऽपि तथैव स्वयमुपभुज्य मदासन्नविरचितान्यसंस्तरे सलीलमुपविष्टः शुककृते कर्तुं पञ्जरकमारेभे। मया हि लब्धावसरेण सानुबन्धमसावभिधातुमारब्धो यथा। भोः! चातुर्धु-रिक! कमभिनिवससि ग्रामम्?, किमभिधानोऽसि?, क्वाऽसौ कथं च भवता शुको धृतः सङ्गृहीतश्च किमर्थं?, किञ्च श्रीमतामुपकरणेनामुना किं करिष्यति भवान्?। यदि न कुप्यसि कुलप्रधान! ततो भणाम्युपकारेण महता प्रयच्छ मे शुकमिमं राज्ञो दर्शयामि। तेन च कृत्वा तवावश्यमनल्पं दापयामि प्रसादं कारयामि च भवन्तमखिलस्यापि मान्यमिति मद्वचो निशम्य पञ्जरकसृष्टौ निविष्टदृष्टिरपश्यन्नेव मां पामरः प्रत्युवाच।

श्रूयतामिहास्ति परतो धान्यसारनामा ग्रामः। तस्मिन्नधिवसति गोप-तिर्नाम कुटुम्बिकस्तस्याहमात्मज इव संवरको नाम हालिकः कलमशालिमल-नाय जनितमहाखलोऽत्र क्षेत्रे वसामि। वारिग्रहणाय चाद्य नातिदूरमितोऽर्द्ध-विलूनशालिमतः केदारस्य तीरं गतेन मया शालिकणिशस्योपरि निविष्टो दृष्टः शुकोऽयमालोक्य च सहर्षमहो साधु चिरादृष्टोऽयमिति यष्टिकाग्रयोगिन्यायासिकया परुषतुषपुटकोडात्तण्डुलविकर्षणासक्तिपरतन्त्रो झटित्यसौ संवृत्य स्वीकृतः। न चात्र त्वयाऽनुबन्धो विधेयः। मम हि प्राणाधिकाऽस्ति कुलशील-सौरूप्यवती कान्ता। सा च संप्रत्यमितोपयाचितशतैः प्रथमगर्भेणान्तर्वत्नी जाता। गता चात्मनः कुलगृहे प्रसवितुमपरं मेखलिकानामग्रामम्। तस्याः शुकामिषोत्पन्नदोहदायाः कृते सङ्गृहीतः शुकोऽयम्। अतो मे प्रेयसा कलत्रेणैव विभूतिमतः किमनेन त्रैलोक्यराज्यमपि तृणकल्पमेवैतत्तदलमनुप्रार्थनयेत्यभि-धाय निष्पाद्य च तं तृणलतामयं पञ्जरकं विधाय च तदन्तःप्रवेशेन सुस्थितं कीरमुत्पन्नतोषः कृतकृत्य इव शयनसन्निवेशेन स्थितवान्। तथा स्थिते च तस्मिन्नुद्भूतभूरिचिन्तोऽहमाः! कमुपायमिदानीमाकूतयामि किमन्यमर्थनो-परोधविशेषमुपदर्शयामि, किमितो हठादुल्लङ्घ्य च गृह्णामि आहोस्विदकथ-यन्नेवास्य सुतस्यापहृत्य यामीत्यादि नितान्तमुत्ताम्यता चित्तेन चिन्तयन्

१ उदयदः

यावन्मुहूर्तं तिष्ठामि तावज्झगित्येवाऽसौ शुकः साट्टहासं विहस्य प्रस्तुतेनार्थेन युगलमार्यायाः पपाठ—

एकेन ध्रियमाणः पलायितोऽन्यस्य गोचरे पतितः ।
गतोऽन्यस्य मुखे किल यदहमहो बलवती नियतिः ॥

अथवा—

जीवितविषयान्मृत्युं मृत्युमुखाज्जीवितं च नियमेन ।
जनमानयति नयत्यपि विरमति न क्वाप्यसौ नियतिः ॥

अथाऽसौ निशम्य परमेकहेलयैव तयोद्धर्षितरोमा पामरो विमुच्य महतीमारादिमुत्थाय पलायितुमारब्धः । मा भैर्मा भैरित्युद्भूतहासेन च मया ध्रियमाणः साकुलमहो विमुञ्च विमुञ्च मां त्वमपि सत्वरमितो भ्रातरपसर्प स्वाश्रमे न यावदेतेन पक्षिणा यतो न मया क्वचिदियन्तं कालमेते हसन्तो वदन्तश्च शकुनयो दृष्टाः । तदेष यास्यामि । चारभटस्तु तिष्ठतु भवानिति भयार्तिविधुरेण चेतसा प्रलपन्नुन्मोच्य मदन्तिकादात्मानं पलाय्य गतवान् । अहमप्यनुकूलवर्तिनो विधेरनुभावात्फलितप्रयोजनो ननु सिद्धमभिमतं साध्यमिदानीं प्रत्यूष एवोत्थाय शुकसनाथो व्रजामि मन्दिरमिति महता प्रहर्षेण तथा भाषितनत्वस्य पक्षिणो विस्मयेन तेन च तस्य हास्यरसेन हालिकस्य विनोद्यमानहृदयो निद्रामलभमानश्च किल तत्कालमेव जल्पयिष्यामि तं शुकं तावन्नैनं सानुरागमाभाषितोऽस्मि भो महात्मन् ! अवधानमभ्यर्थ्यसे, ब्रवीमि किञ्चिन्नावहितः पामरमहाग्रहाक्रियुतोऽहमिदानीं पृच्छामि भवतोऽपि कीदृशी प्रवृत्तिः । त्वं हि महात्मस्वरूपः, महात्मा हि प्रोच्यमानः शृणोति ? उपरुध्यमानः वेत्ति, तथाऽर्थ्यमानो ददाति च । तदेतदुच्यसे भ्रातः ! अमुष्या-

ततस्त्वं विमुञ्च मां धीमन्नव मां वाचा च शुद्धोऽसि चेन्मा विघटय विहङ्गमकुटुम्बात् । मा दूरीकुरु निकुञ्जतरुकोटरकुटीरवासात् । मा वियोजय यदृच्छारामफलरसोपभोगात् । मा विश्लेषय विविधवनसरणिसञ्चारसौख्यात् । मा समुत्सारय नभस्तलोत्पतनविलासविभवादनाथमार्तं पतत्रिमात्रमित्युपरोधबन्धुरमभिधाय व्यरंसीत् । अनन्तरमुत्पन्नविकल्पोऽहं अहो ! कोऽप्यसावित्थं प्रगल्भः शुकविशेष इति न जाने । किन्तु यथाऽहममुना स्वार्थमनुसन्दधानेन सप्रबोधसंरम्भमभिहितस्तथाऽहमपि करोमि यदि हृदयं दयार्द्रं मनसा च प्रवृत्तिप्रश्नगर्भेण गिरां विस्तरेणोत्तरं कल्पयामि । ततोऽयमुक्तिप्रकारचतुरस्तथा कथञ्चिदालापचर्चां विपञ्चयिष्यति येन मे झगिति भविष्यत्येव मोक्तव्यस्तदस्तु स्वामिनः समर्पणीयोऽयमित्यादावेव सूत्रितं प्रयोजनमनाशयेन यत्किञ्चिदुक्त्वा गृहीत्वा च याम्येनमन्वयादिस्वरूपमेतस्य स्वामिनैव पृच्छ्यमानमवगमिष्यामीति संप्रधार्य तथा प्रत्युत्तराभासमात्रकेण तमनुवर्त्य तूष्णीमतिष्ठम् । अथ तथैव मे जाग्रत एव शुकवचोऽवत्रासस्खलिताच्छलयितुं हालिकानुपृष्ठलग्ना प्रकीर्णतिमिरकेशा पिशाचीव गता सा नाम यामिनी । प्रविष्टश्च कर्णयोर्निशोपान्तमुक्तस्य चरितुमायातवतो द्विपीकदम्बकस्य कण्ठावलम्बितो नाम नवग्रहीभूतः शुकोऽयमादाय गम्यतामित्यदृष्टोपदेश इव क्वणत्काष्ठघण्टावलीनानारवः । तमाकर्ण्य नन्वसावेव समयः प्रयातुमिति प्रतोषसत्वरमुत्थाय गृहीत्वा च तं शुकं निर्गतोऽस्मि तस्मादागतश्च सकलेनाह्ना तदेव नगरम् । नगरप्रवेशे च मदन्वेषणविमूढस्य झटित्युद्भूतदर्शनप्रहर्षेणागत्य मिलितस्य परिजनस्य हस्ते समर्प्य पञ्जरकमाख्यातवृत्तान्तः सद्मनि प्राविशम् । तत्र च स्वामिनो दर्शयितुमाश्चर्यकरं शकुन्तमुत्सुकोऽहमन्यस्मिन्मणिफलकपञ्जरे कृत्वा तमतिवाह्य तां निशामायातवान् । अवाप्तोऽस्मि चाद्य न खल्विदमीदृशं विहङ्गरत्नमवनिमण्डलाभरणस्य राज्ञो निधानीकृतं शोभते इति भवनमगच्छन्नेवात्र तमादाय समागतस्तदेष बहिरानीतो दारकस्य करे तिष्ठतीति विज्ञप्ते देवस्य मनः प्रमाणमित्युक्त्वा व्यरमत् । राजा च सविस्मयोत्सेकमुत्सुकेन मनसा ननु त्वरितमानीयतां, दृश्यतामसौ शकुन्त इत्युक्तवान् । उक्ते च भूभृता कौतुकतरङ्गितं मनः प्रभोराकलय्य वसन्तशीलः स्वयमुत्थाय जवादानीतमग्रतो रत्नपञ्जरमधिष्ठितं शुकममुञ्चत् । अथाऽसौ सरभससमुन्नमितकन्धरः प्रसन्नया दृशा निरूप्य

देव ! हरनयनहुताशनशिखाभिराघ्रातेन कुसुमधन्वना समुज्झितं रूपमहल्याभिशरणवाच्यताविषण्णेन शतमन्युना शिथिलितं विलासमुरगतल्पाधारचारिणि पयोनिधौ शयनसुखव्यसनलङ्घितेन च मुरारिणा निरस्तं व्यापारमपौरुषया गत्या गृहीतमिवाधिष्ठितस्य ते किमङ्ग ! किल स्तौमि । तद्भवतु । किमत्रोपश्लोकनक्लेशेन । किन्तु किमप्युच्यसे न चेत्कुप्यसीति भूमीन्द्रमवादीत् ।

वृत्तिः संप्रति कार्पणी च किमपि त्यागप्रवीरे दृढं
विश्रान्ता त्वयि नाथ येन भवता ब्रह्माण्डनामा घटः ।
सद्यः सद्गुणरत्नराशिभिरसौ भृत्वा निधानीकृतः
काऽन्यत्रोपरि विस्फुरत्यनिभृतं ज्योतिःप्रतापस्तव ॥

राजा तु सविस्मयस्मेरमारोप्य समीपवर्तामाननेषु नलिनदलविशालां दृशं अहो ! पश्यत वर्णनार्थैकगर्भि भणितिभङ्गिवैदग्ध्यप्रागल्भ्यमस्येति निभृतमभिधाय तं शुकं शकुन्तपुङ्गवमवोचत् । हंहो ! विहङ्गमप्रवर ! प्रथय कः किल भवान्, कतमजातिरसि ? । कथं च वस्तुविवेचनावच्छिन्ने चेतसि वर्णशून्याविस्पष्टशब्दमात्रोच्चारकारिण्यस्मिन्विहङ्गमत्वे तवाऽयमीदृग्विधोऽवगमः समग्रस्य भारतीपरिस्यन्दस्य तावन्न च स्वजातिलक्षणां शिखामावहतः स्वल्पमेवाश्चर्यकारि, पुनरियमपरा च प्रस्तुतोपश्लोकनालापवैदग्धी । कथं नु तव तादृशि निस्सन्धिरन्ध्रोदरे प्रवेशो निर्गमश्च चैत्ये किमर्थमधिविष्टोऽसि ! । तद्गतेन च भवता किमित्येतदापठितम् ? । कथं च पलायितो वसन्तशीलादशक्यबन्धनश्छलितो हालिकेनेत्यादि पृष्टो नरेश्वरेण सोऽब्रवीत् । देव ! किल येन चेतसा देवः पृच्छति न स कश्चित्तवेह महाहिदुर्गमायां सह्यगिरितटान्तर्वर्तिन्यामजनप्रचारदारुणायामरण्यभुवि पुराणस्य न्यग्रोधविटपिनः कोटरे वसन्त्यामुद्भूतप्रभूतापन्नसंपत्तया (सत्त्वया ?) प्रसवनिर्विण्णायां शुकपतत्रिण्यां पश्चिमे वयसि संभूतवान् । पिच्छोद्भेदकाले च शुकान्वयविरोधिनी न जाने कुतोऽपि हेतोर्झगिति परमुद्गता शिखेयम् । इमामुदीक्ष्य शिरस्युद्भिद्यमानां विलक्षणतया स्वरूपस्य परिहृतोऽहमम्बयाऽपि शकुन्तकुटुम्बेन च पुराकृतैः कर्मभिरनुभावितश्च भूयांसं क्लेशमिति तत्रैव विपिने वसन्ती स्वीचकार कृपावशेन मां शारदी नाम वनदेवता । तया च प्रतिदिनमनुपाल्यमानोऽहमुद्भूतपक्षतया समर्थीभूतश्चलितुम् । इयं च शिखा दिवसैर्यथा समुच्छ्रयमापद्यते तथा क्रमेण तादृक्चैतन्यमुन्मीलितं येन स्वयमाविर्भूतप्रबोधः समस्तवस्तुतत्त्वोपनिर्णयेषु सर्वेषु शास्त्रेषु

विविधामृकाव्यप्रकल्पनासु पुराणकथोत्कीर्तनादिषु वैदग्ध्यमधुरासु च विस्रम्भालापगोष्ठीषु मनुष्यशेमुष्यङ्गनया परमं प्रागल्भ्यमासादितवानस्मि । प्राप्तप्रमाणं च मां शारदी वत्स विहर स्वेच्छया मद्वचःप्रभावादगम्येषु विषयेषु प्रचारसामर्थ्यमरन्ध्रसन्धिषु स्थानेषु च प्रवेशशक्तिरखण्डिता भवतो भविष्यतीति वरं दत्वा कृत्वा च चित्रशिख इति सुललितं नाम स्वतन्त्रचारेण विमुच्य निवृत्ता बभूव । अथ ततःप्रभृत्यनया विलक्षणया मूर्त्या द्वेषीव दृष्टमात्रोऽपि प्रहारास्पदीभूतः शुकानामलब्धस्वजातिसङ्गतिरेकाकी सर्वतो वनान्तरेषु वृक्षान्तरेषु कोटरान्तरेषु च विचरन्नियन्तं कालमतिष्ठम् । सत्यप्येवमेतावति सकलतत्त्वनिर्णयोन्मेषशालिनि विवेके न खलु क्षणमपि सजातित्वानुज्झितुं पारयामि शुकानां सङ्गमं दर्शनमात्रपदं चेति प्रातरेवाद्य प्रत्यग्रशरत्समयसन्मदोल्लसितचेतसां क्वापि गगने गन्तुमारब्धवतां शुकविहङ्गमानां पृष्ठलग्नस्तां तावतीं भूमिमायातवानस्मि । तत्र च कथञ्चन मुनिवेशेन पश्चाद्वलितनेत्रतया झटिति दृष्टोऽहं तैरतिघनया क्रुधा प्रधावितैरुच्चण्डचञ्चुपुटकोटिपातमाहन्यमानत्रासेन सहसा पलाय्य तस्मिन् सन्धिरन्ध्रोदरेऽपि चैत्यप्रवेशतरलितस्तेन शारदीवचःप्रभावेण सङ्क्रान्तवानस्मि । तथा समुपस्थितापदृशानुत्पन्नमनोव्यथः विभावयन्नात्मन्यमुं समग्रगुणाविर्भावजनकं शिखोन्मेषमिमं श्लोकमपठम् ।

गतेषु च तदन्तः प्रवेष्टुमशक्तेषु यथागतं तेषु यथाऽहमुत्त्रासितोऽपि तद्दर्शनवियोगजं दुःखमसहमानो ननु कियद्दूरे ते किल वर्तन्त इति विलोकनाय निर्गत्य तस्यैव शिखरमारूढोऽस्मि । अदृष्टशुकावलिश्च हा क्व पुनस्तां स्वजातिमालोकयिष्यामीत्यनया तिरस्कृतविवेकश्चिन्तया मूले विमलमणिपीठकुट्टिमतलैकसङ्क्रान्तमालोक्य निजं प्रतिबिम्बमये मज्जातिरपरः कोऽप्यसावत्र शुक इति भ्रान्त्या झगिति कृतझम्पमवतीर्य तदनुगामी भ्रमन्नमुना ध्रियमाणः पलायितवान् । अनुपृष्ठलग्नेन च खेद्यमानोदितबुभुक्षितः क्षेत्रं शालेयमासाद्य क्षुधान्वितेन चक्षुषा चेतसा च विधुरीभूतश्चरन्नधिमासो महतीं पामरकरग्रहापदं प्रवेशितश्चात्र वार्त्ताभिरेव श्रूयमाणस्य मध्ये पञ्जरकस्य, दैवेन पामराकृतेः कृतान्तदूतादाकृष्य त्वत्समीपमानीतः । इदानीमुदीक्ष्य दूरादनन्यतुल्याकृतिं भवन्तमये स एष मानवः स्वामी यः किल सौराज्यरञ्जितेन शारदीप्रमुखेण वनदेवताजनेन प्रतिदिवसमाशीर्वाद्यमानो मया श्रुत इति प्रमोदरसमिश्रितं भवद्दर्शनामृतमवाप्य स्वस्थतेयमेवं शरीरकस्य । तन्मे स्वामिन्नसमक्लेशपरि-

पाटिघटनापटीयानेष परिणामः कर्मणां, यतः सुदूरमम्बरपथप्रचारिणः पवनतरलितनिजाङ्गपिच्छशिखरेऽपि विस्फुरति । बाढमविश्रम्भशीलाः पक्षिणः कथमुपगच्छन्ति गोचरं भूधरकरग्रहाणाम् । तदङ्ग ! कर्मस्वामिनाध्यासितेऽस्मिन् संसारनगरे नियतमात्मानमेव प्रस्खलितस्य मनसोऽनुशासकमपहाय न खलु कोऽपि केनाऽपि बध्यते । तथा हि—

आत्मा शुभाशुभमयं धनमेष हृत्वा
योन्यन्तरेष्वपि निविश्य तिरोदधातु ।
अन्विष्य नूनमचिरादनुमार्गलग्नै-
राबध्यतेऽत्र सुखदुःखशतैस्तथाऽपि ॥

किन्त्वेतदेव मे किमप्याविर्बभूव शुभकृतं कर्म येन स्वामिन्नशेषनरलोकतिलको विवेकिनामग्रणीरालोकितो भवानिति प्रगल्भभणितिभङ्गीमनुत्तरामभिधाय तूष्णीमभूत् ।

राजाप्यहो ! साधु साध्वद्भुतं पक्षिरत्नमासादितमित्यत्यन्तमेव प्रहृष्य भोः पतत्रिणां पुङ्गव ! कस्य मनस्येवं न संवसति यत्किल शकुन्तजन्म नाम सावमानसङ्गमो विप्रयोगः स्वजातेरिच्छासंचरणरतिहरेयमवस्थितिः पञ्जरस्य, स्वभिलापप्रवर्तनोच्छेदकं चेदमपरैः प्रदानमाहारादेः प्रकामं क्लेशयत्येव चेतसि, किन्तु नापरपतत्रितुल्यस्तादृशो भवान् । भवतो हि दुष्कृतेन कर्मणा जन्मैव केवलमिह विहङ्गजातावभूत् । अनेन पुनः सकलसंस्कारवता चैतन्येन किमुच्यते मनुष्याणां मरुतामपि शेमुषीमतिक्रामसि । तत्किमेवं धीमन्नुत्ताम्यसि । मा विषीद, पूरयिष्यामि यथाऽवसरमवश्यं भवतो वाञ्छितं सुखम् । असावपि विडालादिव्यपायपरिहारार्थमित्थमेवाऽस्तु निवासः । पञ्जरके वसतश्च तवाऽत्र कालेन भविष्यत्यस्मदीयाऽपि संगतिरित्यादिभिरनेकधा प्रबोध्य तं चित्रशिखं तत्रैव सुस्थितस्वान्तमकरोत् । समर्पयामास च वसन्तशीलस्य । भो वनपालपुङ्गव ! त्वयैव प्रतिदिनमुद्यानमणिमण्डपस्थो यथोचिताहारपानादिभिरसौ पालनीयः । सरसगोष्ठीप्रसङ्गेषु चाऽस्माकमनुज्झितासन्नवृत्तिश्चित्रशिखो विधेय इति यावद् वसन्तशीलमादिशन्नास्ते तावज्झगित्युदयास्तभूभृतोरन्तरालभूमेराघाटकल्पनाचिह्नमिव रविबिम्बमम्बरस्य मध्ये सम्परूढमिति प्रतीतिहुङ्कारमिव मुखमुदञ्चितेन ध्वनिना ननाद मध्याह्नसमयशंसी शङ्खः ।

तमाकर्ण्य यथोपस्थितं पालयितुमवसरमुचितवेदी परमपारितोषिक-

प्रदानेन सन्मान्य वसन्तशीलं तेन च हस्तीकृतरत्नपञ्जरकं चित्रशिखं विसृज्य विसर्जिताशेषनरपाललोकः स्नानादिकर्म पौर्वाह्णिकं कर्तुमुदस्थादास्थानसिंहासनान्नृपतिः।

अथोत्थिते तस्मिन्नवनीश्वरे युगपदहंप्रथमिकाक्षेपेण प्रणम्य निर्गच्छतो नरेन्द्रसन्दोहस्य महीयसा गात्रसङ्घट्टेन हठादन्योन्यमिलितमुकुटमकरीतटोच्छलितैरनेकशो मणिभिः सरत्नोद्गारो वेलाप्रसर इव सागरस्य, विस्रस्तशेखरोड्डीयमानमधुकरस्तैः श्यामलो हलधराकृष्यमाणः प्रवाह इव यमुनाजलस्य, त्रुटितहारदण्डाग्रपातिभिर्मुक्ताफलैरुन्मुक्तजलविन्दुशिरःप्रचार इव स्वात्यम्भोदपटलस्य, प्रसर्पतो विलासिनीकदम्बकस्य क्वणत्किङ्किणीचक्रवालकलकलैरुत्थितजनारवः पुरक्षोभ इवानङ्गनगरस्य, प्रधावतो निरन्तरमासनदानाधिकारिणो वर्गस्य विपुलभुजलतोत्क्षिप्तवृत्तवेत्रासनैरुदस्तशैलः संरम्भ इव सेतुवन्धस्य, वहुशो मणिस्तम्भेषु सम्मर्दवशादास्फालता विलासिनीजनेन प्रतिविम्बभावादनूत्थिताया मण्डपश्रियो दीयमानसमालिङ्गनविशेष इव, समन्तादन्तरपसर्पतां सेवकानामुपरितले च मणिपट्टसंचारिभिः प्रतिविम्बैर्जगत्त्रयमपि सेवाप्रतिष्ठमिवाचक्षाणः, क्षरता श्रवणदवतंसमञ्जरीरजःपूरेण पांसुलीक्रियमाणमणिभूमिरुल्लसिता प्रेङ्खदखिलनेपथ्यपटपल्लवसमीरणेन समुत्थाप्यमानाशत्रकवती शिरःसिन्दूरपांसुर्भूलता मन्त्रिचोलाञ्चलसमाजेन भज्यमानरङ्गावलिः, विलसता स्खलद्वारनारीकरचमरदण्डपातेन विघट्यमानस्फटिकवेदिकोपकोणमाणिक्यभङ्गिः, सभामण्डपादतिनिकुरुम्बतरेण निस्सरत्सु लोकेषु ब्रह्माण्डपुटपिधानमिव विघटितं, पातालमुखमिव मुकुलीभूतं, सृष्टिशालाद्वारमिवोद्घाटितं, त्रिभुवनोदरमिव स्फुटितं, दिग्भित्तिफलकमिवापनीतमिति वहिस्तिष्ठता जनेन पदे पदे सन्दिह्यमानो गृह्यमाणः स्वयं कुर्वता चित्तेन प्रेक्षकाणां प्रतीहाररक्षास्तवकितेन च वन्दितेनोदीर्यमाणजयजयालापकोलाहलकलापेन संभृतो वभूव भूयसा विस्तरेण महानास्थानसंक्षोभः।

निर्गत्य च नरपतिरास्थानमण्डपादखण्डितावसरवृत्तिरनुत्सुकेन मनसा क्रमशः स्नानादिसमस्तमुचितोपरूढप्रक्रियाविभूतिभिरभ्यवहरणमर्यादमवश्यकरणीयं व्यापारमकार्षीत्। ततश्च—

निर्वर्त्याखिलमस्खलत्परिकरं तत्कर्म पौर्वाह्णिकं
लीलातल्पतले स्थितः परिगतो गोष्ठीसुहृद्भिर्जनैः।

प्रस्तावोपनतं शुकान्वयमणिं तं शास्त्रजैः शीलयन्
सूक्तैश्चित्रशिखं सुखेन गमयाञ्चक्रे कृती वासरम् ॥

मनुजपतिरथैवं सुस्थितस्वान्तवृत्ति-
र्विविधसुखसमाजं सेवमानो दिनानि ।
नयति कृतविनोदः पत्त्रिणा तेन शश्व-
ज्जयति वचसि वश्या यस्य सारस्वतश्रीः ॥

इति कायस्थकविसोड्ढलविनिर्मितायामुदयसुन्दरीकथायां
शुकलाभो नाम सारस्वतपदाङ्को
द्वितीयोच्छ्वासकः ।

तृतीयोच्छ्वासः ।

एवं च यथासमयमनुभूयमानविविधविभ्रमोपभोगादिसुखसम्मदक्रमेण कालमतिवाहयन्नेकदा विलासमणिभवनवातायनस्थः परिगतः समन्तादरविन्दकर्णिकाकोश इव केसरैः, आभरणनायक इव पर्यन्तरत्नैः, इन्दुरिव तारकैरवनिपालपुत्रैः कविभिः प्रसादचिन्तकजनैश्च लीलयावतिष्ठमानः पुरः पञ्जरोदरसरिकासनोपविष्टमास्पदं प्रणयस्य विविधरसमहिष्ठगोष्ठीविनोदसहचरं सम्भाव्य तरलितारविन्दसोदरया दृशा तं शकुन्तकुलभूषणेन्द्रनीलं चित्रशिखमुवाच । सखे ! स्वमतिगुणगरिमप्राग्भारनमितबृहस्पतिप्रज्ञेन नियतमेवाऽर्येण मन्त्रिणा विभूतिवर्द्धनेन मतिकरेणुकवलिताङ्कुरो निरुत्थानीभूतः परिपन्थिनां वंशः, प्रभूतगुणगुम्फितमिच्छया वर्तते भूपालवृन्दं, नयनपथप्रवर्तितमविसंष्ठुलं वहति वसुमतीचक्रं, उपक्रान्तमन्त्राविकृष्टा वशीभूता लक्ष्मीः, राजधर्मपरिपालिनया तया निराकुलीभूतं च मे राज्यम् । एवं च निर्वृत्ताखिलविधेयार्थसुस्थतया कोशान्तः प्रविश्य तिष्ठति कृपाणे रणकेलिदुःस्थितेवास्मिन्भुजदण्डे कथय कमङ्ग ! किल व्यापारमुपशीलयामि, कैर्वा विनोदविभ्रमैरतिवाहयामि दिवसान्, कतमं च व्यासङ्गमनुगम्य हृदयमनुकूलयामीति पृष्टो नृपेण चित्रशिखः स्वामिनोऽनुवर्तयन्नाशयं जगाद ।

देव ! अत्र मनुष्यजन्मनि कल्याणवतामखिलसुखोपभोग एव पर्यवसायो व्यापारः, तदास्पदं च घटयन्ती हृदयवाञ्छितमसौ राज्यलक्ष्मीर्मूलम-

ब मतार्णवतरङ्गमालाभरणेयमुर्वी ।

हेतुरप्यमुष्याः स्फुरितनिशितासिकणिशनिर्मितनरमुण्डताण्डवोड्डामरसमीकच्छेदः प्रक्षेपिवंशस्य। तदेतत्किं न कृतं देवेन। भूवलयमधुपटले राज्यसुखरसाय कृत एवायमुच्छेदः क्षुद्राणाम्, अपनीता हि विलसदसिदण्डदलितवीरकवचकालायसोल्लसितविपुलविस्फुलिङ्गशिखिस्वेदेन भुजयोरूढाः कदनकेलिकण्डूतयः, क्षुरप्रमुखविखण्डितेभदन्तमुसलैरुन्मूलितविरोधिवंशाङ्कुरैरिव छादिताः सङ्ग्रामभूमयः, निशितनिस्त्रिंशधारोत्तारितारिशिरःशङ्खवलयैः प्रसादिता वीरलक्ष्मीः, असिदण्डपीडितैरहितकुलैरुच्छ्वासिता वसुमती, वैधव्यविधुरितारिसीमन्तिनीनेत्रसलिलधाराभिः खेलितो मधूत्सवः, विपाटितविपक्षवंशादाकृष्य यशोमुक्ताफलमाभरणीकृतं त्रिभुवनश्रियः। तत्किल किमत्रोच्यते।

कुर्वन्नुद्धतमेकदैव तरणिस्तोमं प्रतापक्रमैः
शत्रुस्त्रीनयनाश्रुभिर्विरचयन्सप्तार्णवैकाप्लवम्।
नृत्यत्येष घनारवेण यशसा मुक्ताट्टहासः समि-
त्संहारेषु तवासिरत्र नृशिरःस्रग्भूषणो भैरवः॥

अपि च—

देव क्षत्रियपुङ्गव! प्रहरतः सङ्ख्येष्वसङ्ख्यं मद-
प्रस्यन्दप्रसरान्धसिन्धुरशिरःस्कन्धं कृपाणस्य ते।
धारासङ्गतमौक्तिकद्युतिपरीवेषच्छलाद्दन्तिके
दत्तः काण्डपटो झटित्यभिसृताराातिश्रियः सङ्गमे॥

त्वदभिभयपलायनादरण्येषु शृणु श्रीमतामीश! शात्रवीमवस्थाम्
तथाहि।

वर्षास्वद्य कुटीकृतेऽप्यनुचिते देवि! प्रदेशे मया
नास्मिन्नेति वनापगाभर इति ब्रूते तवारिः प्रियाम्।
यावत्तावदरण्यवासविषयावस्थोग्रदुःखस्पृशः
सा तस्याः स्ववदीक्षणाश्रुपयसामुन्मथ्य नीताऽऽप्लवैः॥

किं बहुना—

स्वामिन्नवेक्ष्य निखिलप्रतिपक्षभूभृ-
दुन्मूलनैकविषमानलमुद्यतं त्वाम्।
वंशो नतः सपदि सर्वनरेश्वराणां
तेनाङ्गसन्धिषु न स क्वचनापि भग्नः॥

तदेवं निर्वैरिवंशीकृतेऽस्मिन् भूवलये वृत्तोऽयमायोधनविनोदानां व्यापारः। सर्वतः पुनरेष हरचरणसरोजपूजाप्रपञ्चनेषु निष्पद्यमानानेकसुरसदनसत्रप्रपारामसरःकूपवापिकादिप्रतिष्ठाध्वजलग्नेषु अनवरतमहायज्ञेषू(ज्ञयू ?)पोत्तम्भनेषु विप्रपरिगृह्यमाणभूमिदानोदकग्रहेषु सुकविकाव्यार्थभावनाप्रतोषपूजासु शरणसमागताभयप्रदानकरणेषु प्रणयपरिणद्धबन्धुवर्गालिङ्गनेषु तुरगकरिवाहनविलासकलितकुशलतोपलालनेषु सकलार्थिकृतार्थीकरणकर्मसु च व्याप्रियमाणः सततं विनोदयन्नेव हृदयमास्ते भुजस्तम्भो देवस्य ।

किन्त्वेकमस्ति ।

निर्वैरिणि क्षितितले रणदुःस्थितानामुर्वीभुजां भुजविनोदमहोत्सवाय ।
स्यादेष रोपवलितेषु वराहकेषु कोदण्डकेलिसुभगो मृगयाप्रसङ्गः ॥

अत्रान्तरे च कोऽपि मृगयाकौलेयककुटीरवर्त्ती पापर्द्धिकयुवा सह केनापि किमपि जल्पन्निमं श्लोकमपठत् ।

कुम्भैरुच्चतरस्तनी करटिनां नेत्रैर्मृगीणां लस-
दृक्पाता घनकुन्तलप्रणयिनी बर्हच्छदैः केकिनाम् ।
दंष्ट्राकान्तिकदम्बकैरपि कृतक्री(ब्री?)डास्मि(स्मि?)ता पोत्रिणां
नाद्यन्यैरनुसेव्यते मृगवनश्रीरद्य रूपोद्धुरा ॥

राजाऽप्येतन्निशम्य रभसेनाविरूढः साधु भोश्चित्रशिख ! साधु स्मृतं समर्थितं चैतदमुना श्लोकार्थेन प्रवर्त्तितश्चाहमस्मिन्नेव समये पापर्द्धिकस्य श्लोकपाठेषियं प्रवर्त्तयन्तीभिर्मृगयाधिदेवताभिस्तदद्यैव क्रियते मृगवनगमनाय सामग्रीति प्रतीहारमुखेन प्रगुणीकर्तुमुचितपाशवागुरासारमेयाद्युपकरणानि मृगयापरिवारमादिदेश । स्वयं तु यथाक्रमोपसेव्यमानप्रस्तुतविधेयलीलादिभिस्तामेव सवासरदोषामतिवाह्य रजनीमुत्थाय प्रातरभ्यर्च्य निखिलनित्योपहारपरिकरोपचारप्रपञ्चैर्भगवन्तमिन्दुमौलिमुचितं च वेषमादाय पर्याणनिहितनवमणिमरीचिमण्डलालोकमसेनं तुरङ्गमाखण्डल इव कुलिशकिरणचक्रसङ्क्रान्तिदीप्रमुच्चैःश्रवसमधिरूढः पार्श्वतश्चटुलखुरपुटविपाटितविव(?)त्तटेषु वाजिषु समारूढैः करगतः समरलीलादिव्यापारसहचरेण मन्त्रिसूनुना विजयवर्द्धनेनाधिष्ठितैः प्रणयिभिरवनीश्वरकुमारैः पुरःप्रसर्पदाखेटखेलकपदातिपरिवारो मृगयावनपालदर्शितेनाध्वना तदभिमुखमुदचलत् ।

क्रमाच्च प्रवर्त्तितुरगवेगः ससंतान(?) रसितैरनेकशकुनिकुलकूजितैरवि

रलनगनिस्तं(ई?)रप्रवाहझात्कारैरनिलचारोच्चर(त्कीच?)करवैरापूर्णगर्भां कुसुममधुमदारणितषट्चरणचक्रझङ्कारैरुन्मीलितघनकाकमण्डलीकोलाहलामङ्गलमिव कोलेषुज्ञापयन्तीं, सञ्चरत्पतङ्गनखविकीर्णकुसुमकिञ्जल्कपूरैरनल्परजोवृष्टिभीषणमिव चित्रकेषु सूचयन्तीं, वहद्गिरिनिर्झरतरङ्गताडितशिलातटोच्छलितजलबिन्दुसन्दोहैरकालकरकोपलासारदुरितमिव सैरभेषु सूत्रयन्तीं, अनिलतरलितलतावनप्रसूनपतनैर्नक्षत्रपातारिष्टमिव मृगेषु दर्शयन्तीं, तरुशिखरशाखान्तरोड्डीयमानवानरभरत्रुटितनागचम्पककुसुमपरिभ्रंशैरद्भुतोल्कानिपातव्यापदमिव शार्दूलशशकसंवरादिसकलसत्त्वेषु संवेदयन्तीं, अनेकतरुलताङ्कुरविराजितां मृगयाटवीमवाप ।

अवाप्य च तदुत्सङ्ग एव त्वरितमविरतं च पापर्द्धिकैरावेद्यमानकरणीयः समुचितारम्भाय तत्रोचितानादिदेश । क्षणाच्च तैः परितः प्रसारितोदग्रवागुरावलयमन्तरान्तरनिवेशिताश्ववारमवहितधनुर्धरावरुद्धमार्गं प्रगुणितसारमेयं यथास्थानमुपस्थापितमहोक्षं निक्षिप्तदीपमृगकदम्बकं काननमावृत्य, रूपाविष्करणकृते सरभसमुल्लासितः, श्वापदविलोकनार्थमिव प्रविष्टः कन्दरदरीषु, भ्रान्तो गह्वरेषु, प्रधावितः पल्वलतटेषु, गतो निर्झरतरङ्गिणीषु, समन्तादुड्डीनजीवमि(वैरि?)व सहनिवासभूरुहैरुज्झ्यमानपार्श्वोविहङ्गमैः,झगिति पलाय्य घनतृणस्तम्भान्तरनिलीनैः कर्णपुटावरणविवरविन्यस्तवीक्षणं शशकैः, तत्समयगृहीतमुक्तार्द्धललत्कवलदर्भैरभितो विकीर्यमाणतरललोचनं कुरङ्गैः, सद्योनिर्दलितवल्मीकमृत्पिण्डपिहितविषाणकोटिभिस्तिर्यग्वलितकन्धरं सैरभैः, सपदि सकसेरुभूतलाकर्षितवलितवदनाग्रविस्फुरत्पोत्रप्रत्रैर्मुहुरुद्घुष्टघुरुत्कारमृदुरवं वराहैः, मुखार्द्धनिहितसल्लकीप्रवालवलयितकैरंसदेशपातितकर्णतालैरपाङ्गमिलितनेत्रतारकमिभानां यूथपतिभिः, सुदूरमुच्चलितपुच्छच्छटास्फाटितमहीतलैर्विघटमानसृक्कपुटप्रकटितोरुदशनं शार्दूलैः, ससंभ्रमं विभाव्यमानो मृगयाकोलाहलः सहसैव समुज्झितशिशूनि विघटितयूथबन्धविधुराणि श्वापदकुलान्याकुलयाञ्चकार ।

यत्र—

वामं कुम्भतटेऽग्रपादमपरं सङ्कोचयित्वाचतं
शून्याधारमुरस्तटीमपि तिरश्चीनां दधानो हरिः ।
सावज्ञं च मि(वलि?)तो मुखेन विलिहन् सासृक्कणेसृक्कणी-
निर्मुक्तेभविदारणो मृगवनव्याकृतमालोकते ॥

ततश्च लुब्धकारब्धमधुरगीतरसाह्रियमाणहरिणः पुरःप्रदर्शितोक्षनिश्वासानीयमानशम्बरो दीपहरिणीविलोचनाकृष्यमाणकृष्णसारः समुच्छ्रितरूपदर्शनोन्मुच्यमानसारमेयसंहतिरन्तःप्रतिष्ठशशकचीच्छ(क्ष?)कजनावेष्ट्यमानकण्ठी(रवः)त(र)लसुरसनाकरालकौलेयकारभ्यमाणपोत्रियूथपः प्रसरदश्ववारमण्डलीपिण्ड्यमानश्वापदगणः प्रगुणितशरपातधावितधनुर्धरनिरुध्यमाननिश्वसन्महिषयूथः सर्वथाऽप्यश्रुतपूर्वोवनदेवताभिरदृष्टपूर्वैःश्वापदैरननुभूतपूर्वोवनेन बभूव महानद्भुतसमारम्भो मृगयासंरम्भः ।

अत्रान्तरे—

चापेनिवेशितशरं पुरतो नृपेन्द्रमालोक्य सृकविवरेषु वराहकानाम् ।
दंष्ट्रामिषेण दृढपाल(पत्रि?)निपातभीतान्यस्थीनि निष्क्रमितुमाकुलमारभन्त॥

अपि च—

शशकस्य क्षणं मूर्ध्नि लग्नं काण्डमशोभत ।
तत्कालरिष्टसंभूतं विषाणमिव मृत्यवे ॥

अन्यच्च—

उड्डीयमानः सहसैव दूरान्त्रिकोटितीव्रेण शिलीमुखेन ।
विद्धोऽन्तरालप्रणयी मयूरो मुहूर्त्तमन्धासुरतां प्रपेदे ॥

अपरं च ।

शाखामृगेण चपलप्रकृतिप्रसिद्धमन्तेऽपि तत्सहजमाविरकारि शीलम् ।
यः कीलितोऽपि विशिखेन झगित्यगच्छद्दुर्वीरुहाद्ध्रुवमथास्य गुहां यमस्य ॥

किञ्च—

विमुच्य नादं निशितेषुविद्धो राजा मृगाणां पतितस्तथा वा(थैव?) ।
दिक्षु प्रतिध्वानमिषादभूवन्नकालगर्जाडमराद्भुतानि ॥

सर्वतश्च—

महिषाः काननस्याधिदेव्या इव निवेदिताः ।
पेतुः क्षतास्रधारूथ(रोत?) रक्तपुष्पावमालिताः ॥

अथैवमनुबध्नता पापर्द्धिविस्तरेण प्रथमरवपलायितैः कैश्चिद्दिगन्तमाश्रितैर्ज्याघातघोषोन्मिषितकर्णैः कैश्चिद्वनान्तरमुपगतैरुड्डीयमानघनबाणवीक्षणशङ्कितैः कैश्चिद्गिरिगुहागर्भमभिलीनैर्दूरशरशिथिलघातसंवेदितैः कैश्चन गह्वरान्तस्तिरोभूतैरन्यैश्च बहुविधप्रहारापहृतजीवितैः पतितमृगसम्बरवराहादिरूपैः कैश्चित्सारमेयकुलैरालुप्यमानैः पापर्द्धिकैरुत्क्षिप्समाणैः प्रसादेन दीयमानै-

रौचित्येन च प्रस्थाप्यमानैः श्वापदगणैर्विरलतां गते मृगवने गगनशिरोऽधिरूढमालोक्य चण्डरोचिषमुचितमवसरे विजयवर्धनः सविनयमुवाच—"देव! कृतमतिकुतूहलेन वृत्तोऽयमवसरः पापर्द्धेः यदेते समुच्छिन्नसकलसत्वं काननमवेत्य वामकरकलितलम्बमानबाणासना निवर्त्तन्ते धनुर्धरा, वलाद्रयनियन्त्रणस्तिमितवरवाजिनो मिलन्त्यन्योऽन्यमश्ववाराः, हेलानिवेशितदृष्टयः शून्यमवलोकयन्ति दिग्वीक्षजनाः, अहमहमिकया सश्वसनेन तरलितललदलघुजिह्वलता निरुत्साहसौम्यमाकारं वहन्ति च श्वानः, किञ्च तेजसा सधर्मा देवस्य भगवानुष्णकिरणोऽपि गगनगर्भमागत्य तीव्रशरशिखरखण्डितमृगामिषस्य पाकार्थमग्निमिव प्रगुणयन्नुदग्रदाहमातपं चकार।

तथाहि—

पूत्कारेण तरङ्गितं पदतलैरुद्धर्त्तमुत्प्रेरितं
जङ्घोरुक्रमणैर्द्विभागितमुरोभित्या च वारि क्रमात्।
घर्मार्त्तः परिशीलयन्नधिविशत्येष स्रवन्ती ह्रदं
भृङ्गैस्तसमदाहतैरविधुरैरुन्मुक्तगण्डो द्विपः॥

इतश्च—

यदर्कांशुक्रान्तः स्फुरदरुणपुष्पोदरधिया
प्रविष्टो नामातः (सान्तः?)क्वणितमलिडिम्भः प्रकुरुते।
कपिः स्थित्वा स्थित्वा तदिदमनुशृण्वन्विचकितो
धुनोत्यास्यं रौति प्रचलति चलत्युल्ललति च॥

किञ्च—

स्वेदाम्भश्छुरितं कपोलफलकं नेत्रे मनाङ्मीलिते
वैधुर्यालसनिस्सहं वपुरपच्छायं च वक्त्राम्बुजम्।
सद्यः सम्मिलितोज्ज्वदीधितिकरस्पर्शादसौ बिभ्रती
भावेनेव मनोभवस्य शबरी संवर्गिता लज्जते॥

अपि च—

सर्वतो विजृम्भमाणेनामुना मध्याह्नतरणेरातपेन शिशिरपत्रपटलान्तरनिविशमानशकुनिचरणचूर्णिताविरलकिसलयरसेन प्लाविनाः प्रस्विन्ना इव द्रुमाः, मध्याह्नपवनदोलितानामतिचला प्रकामतप्तार्वानलगता वेल्लनीव शाखिनां छाया, करिकुलविगाहनोड्डीनषट्पदपटलेनोपरिक्षिप्तेन नीलातपत्रेणेव तरुणोष्णकदर्थिता निर्वाप्यते कमलकाननश्रीः, उत्तप्तपुलिन्दमज्जनोन्मिषितगुरुतरङ्ग-

तरलानि क्वथन्तीव निर्झरजलानि, घर्मांशुकरशोषितरसश्लथीभूतवृन्तविगलितैरालोहितलताप्रसूनमुकुलैरुत्पन्नास्फोटकेव दृश्यते क्षितिः, कन्दरदरीप्रवेशधावितानामरण्यचराणां परुषखुरशिखरलिखितगिरितटोच्छलदनच्छगैरिकारजःपूरपाटलाः स्फुटमिवाताम्रीभूता दिशः, हृदान्तः क्रीडता यूथपेन लीलाक्षिप्तकरदण्डपुष्करविकीर्णाभिरम्भश्छटाभिरातपधिमूर्च्छितमिवाभिषिच्यते नभः । तदेव नियतमितो हृदयमपवार्य गम्यत इति समुचितमुदीरितं विजयवर्द्धनेन वचनमभ्युपगम्य राजा त्वरितमेव संवृताखेटकरसप्रसङ्गो निर्जगाम ततो मृगवनात् ।

निर्गत्य गच्छन्कियन्तमध्वानमुच्चुरमहातपोत्तापविधुरितपरिवारः कुत्रापि रविकरप्रवेशपरिशीतले प्रदेशे दुःसहमध्याह्नमतिवाहयितुमुत्पन्नमानसः पुरस्तान्नातिदूरे हरितमणिमरीचिमेचकाभोगं दिग्विजययात्राप्रस्थानमिव [illegible], छायाडम्बरमिव नन्दनारामस्य, श्मश्रुस्थानमिव जम्बूद्वीपस्य, [illegible]मिव वसुन्धरायाः, य(ग?)मनिकामूर्च्छनमिव दिशां, इन्द्रनील[illegible]मिव ब्रह्माण्डनिधानकलशस्य, हरिताम्बरमयं नेपथ्यमिव नरलोक[illegible], शाद्वलाभोगमयं गर्भनिर्माणमिव भारतक्षेत्रस्य, सर्वतोऽपि प्रकाम[illegible] शोणिम्ना बालातपेनेव रविप्रवेशार्थ[illegible], [illegible] क्वचिन्नील[illegible]पल्लवैः प्रवल[illegible], क्वचिच्छिन्न[illegible], [illegible], क्वचिदनल्प[illegible] [illegible]स्थानं, मन्द[illegible] मयूरैः [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

रान्तराहरितपृथुपलाशमांसलैश्च कदलीख(का?)ण्डैरखण्डिताभोगशोभं, विविधफलपाकविशेषास्वादमुदितद्विजकृतकोलाहलोपलक्ष्यमाणमध्यं सत्रमिव वैदेशिकानां, अनङ्गजनकेन सौरभेणाध्यासितं श्वशुरकुलमिव रतेः, प्रथितपत्ररथसनाथं राजभवनमिव रामणीयकस्य, बहिर्निवेशितस्नुहिबदरनिर्गुण्डीझाटकृतरक्षं प्रसवास्पदमिव वनश्रियः, समुपविष्टानेकजरत्कीरपरिगतमन्तःपुराधिष्ठानमिव मन्मथस्य, क्रीडानिकुञ्जमिव शृंगारमृगेन्द्रस्य, दुर्गमिव सर्वर्तुकिरातानां, ऐश्वर्यमिव वसन्तस्य, चलितमिव मलयानिलस्य, निकामरमणीयं स्थानमिन्द्रियाणां कुसुमसुन्दरं नाम विलासोद्यानं ददर्श ।

तच्च सकलसमयसमीहितानामास्पदमुदीक्ष्य समन्तादपनेतुमातपक्लान्तिमवेक्षितुं च कौतुकरसेन वनश्रियः शोभामशिश्रियत् । अथ तत्र विश्रामरसोत्सुकीभूतहृदयेषु त्वरितमुत्तीर्य केषुचिदुत्पर्याणयत्सु, केषुचित्पांसुलायां भुवि लोठयत्सु, केषुचित्सङ्कलय्य दूर्वास्थले विमुञ्चत्सु, केषुचिद्गण्डशैलनिर्झरे स्नापयत्सु, केषुचित्पयः पाययत्सु, केषुचिच्छायासु चालयत्सु तुरङ्गमानश्ववारेषु, पत्तिषु च केषुचिदुत्तार्य कूर्पासकान्पवनमाददानेषु, केषुचिदुन्मोच्य बन्धनं केशान् विकिरत्सु, केषुचिदास्तृत्योत्तरीयं लतामण्डपमधिशयानेषु, केषुचिच्छायासूपविश्यात्मानमुपवीजयत्सु, केषुचित्प्रविश्य दीर्घिकास्वङ्गानि क्षालयत्सु, केषुचिदवेक्ष्य रम्यतामितस्ततो भ्रमत्सु, केषुचिन्निपतितानि भुवि खादत्सु फलानि, गृह्णत्सु कुसुमानीत(रेषु,?)यथायथं निषीदति परिजने, त्वरितमेव सम्मुखमुपागतं दशनक्षतैरनल्पपरिपाटलद्युतिभिः फलैरापूर्णगर्भं पात्रमुद्वहता दारकेणानुगम्यमानं कृतप्रणाममतिप्रसादस्निग्धया दृशा गिरा सन्मान्य वनपालं वसन्तशीलमवनीश्वरः सरभसमभीक्षिताभ्यन्तरमनोज्ञताकृष्टमानसः प्रवेश एवावतीर्य तुरङ्गपृष्ठादधिष्ठितः कतिभिरवसरोचितैः सखिभिरन्तः प्रविश्य विजयवर्द्धनस्कन्धविन्यस्तपाणिः समन्थरक्रममनुप्रधावता वसन्तशीलेन निवेद्यमानेषु विविधतरुवल्लिवीरुधां वलयेषु विसरदमृताम्बुसारणीमिव धवलायतां निवेशयन् दृष्टिमस्तोकतोषः स्तोकान्तरमगच्छत् । अच्छिन्नकौतुकश्च तथा गच्छन्पादय(?)देकाभिरुल्लसदशोकतरुताडनोत्पातचरणारणितमणिनूपुराभिः,(काभिश्चित्) केसरोपचारमदिरागण्डूषसौरभाकृष्टषट्चरणझङ्कारिणीभिः, काभिश्च कुरवकालिङ्गनविलोलभुजलतोच्छलद्वलयकलरवाभिरावर्ज्यमानपादपदृष्टिपातः समदसीमन्तिनीभिः, सलीलमशेषतः पश्यन् पुरस्तात्कारागृहमशेषरत्नानां, यज्ञावासकमसमसायकरसस्य, रामणीयकलोभस्थितैर्मधुसमयखेलनोच्छलितजलबिन्दु-

भिरिव मुक्ताफलैरलङ्कृताभोगं, स्वर्गाभिरामतां द्रष्टुमागतैर्लग्नचिरकालकुपितेन्द्रशापशिलीकृतैरिव मणिमयैर्मालाविद्याधरैरुपेतं, प्रोषितमधूत्सवविरहविरचितवेणिलतयेव ग्रीवाभरणवन्धनग्रन्थिमणिमेचकांशुच्छटया परिरथ(गत?) पृष्ठाभिरधिष्ठितं रत्नपुत्रिकाभिः, अमलमणिशिलाफलकनिर्मितमवाप मण्डपं वसन्तमहोत्सवास्थानस्य। तत्र च स्थित्वा यथाक्रियमधिकारिभिरादावेव प्रगुणितं निर्वर्त्य निखिलमेव माध्याह्निकं कर्म समुत्थाय तस्यैव चाङ्गणोत्सङ्गभुवि सरोजवनसुन्दरे(र?)विलाससरसि तदाऽन्तर्व(सीतटोपान्तव?)र्त्तिनः प्रसरदुरुपत्रपल्लवोपरूढविस्तरस्य सहकारशाखिनश्छायायां शिशिरजलसमीरसङ्गमसुखानुभोगमभिलषन्नुपाविशत्।

तत्रापि समुपविष्टश्च पुनरविश्रान्तोद्यानलक्ष्मीसमीक्षणरसप्रसक्तिरितस्ततो यथाऽभिकमनीयोद्देशमुपसर्पयन्नवसुखोपशालितां दृशमवसरज्ञेन भर्तृचित्तानुकूलनकलावता विजयवर्द्धनेन " देव! प्रणयकुपितया रत्या चरणतलेन ताडितोरःस्थलस्य कुसुमपत्रिणस्त्रुटितहारच्छटाविकीर्णैरलक्तकारक्तमौक्तिकैरिव परुषशुकमुखशिखरजर्जरितपरिणतफलनिपतदाताम्रदाडिमीबीजैरभितो दन्तुरितसुन्दरमवधार्यतामेतदेतस्य तलं तरूणां षण्डस्य, इतश्च पाकभरभिद्यमानमेदुरालम्बिफलविगलदविरलरसस्तबकपातादाकथं(कंपि?)शिखरैः सस्वादूपलम्भमाधूनमूर्द्धभिरिवावर्ण्यमानो मूलविटपैराह्लादयति हृदयमेष मण्डपो द्राक्षालतायाः, परितोऽप्युपरि तरुलताकुसुमसंक्षरदपारमधुरसभरेणार्द्रीकृततला तीर्थजलमङ्गलाप्लवनेन प्लाविता मदनराज्याभिषेकवेदिकेव दृश्यतामियं मालिनी, शिलागण्डशैलतटे चन्द्रकान्तस्य लसच्चन्द्रकान्तिचित्रितकलापैः केकिभिः सोपानकैश्च किमपि शोभतेऽत्र मणिमण्डपाङ्गणतले वापी, पुरस्ताद्बद्धपूगैः क्रमुकतरुभिः क्रीडाकुरङ्गैश्च लोचनयोः प्रीतिमुत्पादयत्येषा स्थली देवागमभूधरस्य, विसारितमालेन जलयन्त्रेण तरूणां वलयेन च सेव्योऽयमेष वामनो वाल्मानुलिङ्गवनप्रान्ते कूपः, प्रोल्लसत्कल्हारवीचिरमणीयया जलार्द्रेनया मरालमण्डलिकया च निर्वापिकेयमन्तःकरणस्य दक्षिणा कुरवकनिकुञ्जगर्भे दीर्घिका " इत्यादि साकूतनिर्देशमुपदर्श्यमानमालोकमानः सहसैव कुतश्चिदकस्मान्निर्गतोत्थानमंथयमुच्चार्यमाणं श्लोकमशृणोत् ।

हे चन्द्रोपलगौरि ! हे मरकतश्यामाऽभिरामाकृते !
हे चामीकरभिन्नवर्णसुभगे ! हे पद्मरागाम्बरे ! ।
एषा पश्यत हन्त चक्रवर्तिना दूरं फलं वाञ्छितं
दत्ते नोत्तरमात्रमप्यतिशठा चाटूक्तिर्दानस्य मे ॥

श्रुत्वा च तं झगिति सर्वतो भ्रमितदृष्टिरुद्दिश्य वसन्तशीलं (प्रोवाच) अहो! क्वचिदिहैव कोऽपि नूनमवधीरितो वल्लभया सोपालम्भमिव सखीषु प्रतिपादयन्नेष ब्रूते इति प्रोक्ते नृपेण वसन्तशीलः कृत्वा स्मितमुवाच। स्वामिन्! न कश्चिदयमवज्ञातः प्रियया, न चैष जनः प्रतिपाद्यते सखीनां, यदेतत्तदाकर्णयतु स्वामी। देव! यः किल देवेन मनोहरंविनोदोपकरणमर्पितो मे पालयितुमनल्पगुणश्चित्रशिखो नाम शुकस्तमहमद्य समागते स्वामिनि निकामव्यग्रतया विस्मृतो वराकमभ्यवहारेण संभावयितुं, स एष स्वामिन्नमुना मरकतस्तम्भेनान्तरितपञ्जरोऽत्र गर्भे मण्डपस्य क्षुधान्धीभूतमानसः प्रतीय साक्षादिवैतस्या वज्रोपलशालभञ्जिकायाः करे कमलरागदाडिममिदं मुहुर्याचितमनासाद्य सखीभ्रमादिमास्वभ्यर्णवर्त्तिनीषु विविधमणिपुत्रिकासु ज्ञापयन्नेतदेवमालपति। इति विज्ञप्ते पृथिवीपतिरुक्तवान्। अहो! तथाविधस्याप्येतस्य सकलतत्वाववोधबुद्धिमतश्चित्रशिखस्य सुदूरमिह विपर्यस्तं चैतन्यममुना कृत्रिमफलाभिलाषेण, तत्त्वलु दृश्यतां कियत्किल विगलितविवेकोऽयमात्मानं नटयति। इत्युक्त्वा पश्यति नरेश्वरे निस्सरणसमुद्यमैकरोषिणस्तस्य प्रखरचञ्चुसन्दंशग्रहेण मुहुर्मुहुराकृष्यमाणा तुसिल(पेशल?)त्वात्पाषाणजातेस्तनीयस्त्वात्स्वरूपस्य कथञ्चन सा नाम विद्रुमशलाकामयी पञ्जरद्वारान्तरालसरिका झटित्येव परं भग्ना। तेन च पथा लघुनिर्गमो नन्वेष निःसृतशिखो म्रियतामिति न यावदुच्छलितः कलकलस्तावदसौ झगिति निर्गतः पञ्जरक्रोडसङ्कटा(द)वकाशविस्तरायां भुवि निरवग्रहं प्रचारमासाद्य तदावेशप्रधावितस्त्वरितमेव सिंहासनस्थानवेदिकामध्यरोहत्। आरुह्य च सन्निधीभूतमुपकोणतलवर्त्तिरत्नपुत्रिकाकरगतं तत्पद्मरागदाडिमं सुदूरमुदञ्चिताघातचण्डया चञ्च्वा जघान। तेन च झटिति दृढमणिशिलास्फालेन विदलिता चञ्चुः। चञ्चुभङ्गसमकालमेकहेलयैव तस्यां शुकशकुन्तमूर्त्तौविभेन्द्रकरपीवरोरुरायतभुजः परिघवक्षःस्थलो विसङ्कटललाटपट्टः स्पष्टाकृतिरष्टादशवर्षदेशीयः पुरुषो वभूव।

राजाऽपि विस्मयोत्क्षिप्तपक्ष्मपालिः अहो! किम्! किम्! किमेतदाश्चर्यमियत्येवान्तरे कां दशामुपेतश्चित्रशिखः?" इति ससंभ्रमं सह पार्श्वगैर्द्रष्टुमारब्धवान्। सोऽपि कुतश्चिद्विच्युतंकायात्कुट्टिमैकदेशनिपतितमादाय करेण किमपि संवृतं वस्तु विचिन्त्य च किञ्चिदुन्मीलितस्मितः समन्तान्मणिकर्मरमणीयं तं मण्डपमुद्वीक्ष्य वहिः प्रहिणोति लोचने यावत्तावज्झगित्येवाग्रे

कुसुमसायकमिवानेकनवशरग्रहणाय प्रविष्टं, पुरन्दरमिव नन्दनभ्रमादावासितं हरिमिव कमलकुलभवनवासिनीं श्रियमानेतुमागतम्, ऐश्वर्यसुस्थितं कुवेरमिव विलासोद्यानिकायामुपेतम्, अन्तर्निवासनिर्विण्णं वरुणमिव क्रीडासरोवरान्निःसृतं, सेवाप्रवेशितेन सकलराजचक्रेण मुक्तस्य महीयसो दर्पतिमिरस्य राशाविव मरकतनिर्माणमेचकाभोगभासिनि रत्नपीठे प्रदत्तपादपङ्केरुहम्, अहितनरपालशिरसि स्थापनोत्थितेन मुकुटमणिमकरिकाप्रतिविम्वकेनेव रेखामयेन चक्रवर्तिलक्षणमकरेणलाञ्छितातिकोमलतलाभ्यां चरणपल्लवाभ्यामुद्भासमानं, नमद्भूपालचूडामणीनां किरणकूर्चकैरनवरतमुन्माज्यमानेनेव विमलकान्तिना जङ्घायुगेन विराजमानं, भद्रजातेर्मतङ्गजादपहृत्य हस्तश्रियं सृष्टमितीव भद्रमिति सर्वतः प्रसिद्धमूरुद्वितयमुद्वहन्तं, गुरोरन्तिकेनेव नितम्वस्य सुवृत्तीभूतं नाभिविम्वं, सदा प्रसङ्गेनेव नाभिश्रियः कृशीभूतं मध्यं, महता दारिद्र्येणेव मध्यस्यतनुभूतां च रोमावलीं विभ्राणं, राज्यश्रियाधिष्ठितस्य वक्षसो देशस्य समन्तादाघाटचिह्नेन महाह्रदमण्डलेनेव हारवलयेन विपश्चिताभरणशोभं, महता प्रेम्णा श्रियस्सकाशमुत्कण्ठागतया श्रीगन्धि(क्षीराब्धि?)वेलयेव हारप्रभया प्लाव्यमानोरःस्थलं, दशानामपि दिशां वशीकरणतिलकैरिव दशभिराताम्रविमलनखरत्नवलयैरलङ्कृताङ्गुलिदलेन भुजद्वयेन भूष्यमाणं, सकलरिपुराजकश्रीसमाकृष्टिलग्न कुङ्कुमरसारुणेनेव ताम्ररुचा करतलेन लीलागुञ्जं कलयन्तं, चन्द्रमसो द्वेषिणी पद्मजातिरिति सहोदरपक्षभुवा शङ्खेन मुखकमलनिग्रहाय प्रहितेनेव निजाङ्गभूतेन रेखालयेण प्रसाधितस्य कण्ठदेशस्य शोभां भजन्तं, सरस्वतीसद्मनो मुखस्य द्वारि विद्रुमदेहलीपट्टमिव पाटलप्रभमधरमादधानं, सुदृढकार्मुकविकृष्टये भुजवलाभिवृद्धिमभ्यस्यतो मन्मथस्याकर्षरज्जुमार्गयोरिव कमनीयकर्णपाशयोः श्रिया सारीकृताकारं, त्रिभुवनसीमन्तिनीहृदयग्रहाय रतिस्मरयोः सिन्दूरमुद्रितैकदेशं राजादेशद्वयमिवोपात्तलोहितं सुलक्षणमीक्षणयोर्युगलमितस्ततो व्यापारयन्तं, वदनखलकप्रविष्टयोः सुवीर(स्वीय?)नेत्राङ्कयोरन्तर्मन्मथनिहितेन निषेधदण्डकेनेव चारुणा नासावंशेन शोभमानम्, उद्धृताशेषभूभृद्गणगरीयसः शिखारूढशासनस्य भरादिव वक्रतामुपेताभ्यां भ्रूलताभ्यामलङ्कृतं, तृतीयं चक्षुराच्छादयितुमाहितेन शिखण्डशशिखण्डकेनेव ललाटपट्टेन गोपिताकारं हरमिव नरलोकावतीर्णमुपलक्ष्यमाणम्, एकतो द्युतिमता मुखेनान्यतो घनस्निग्धेन कुन्तलकलापवन्धेन सुमेरुमिव चन्द्रान्धतमसाभ्यामुभयतो भ्राजमानं, सुदूरमुल्लसन्तीभिराभरणमणीनामरुणपिञ्जरप्रभाभिः सद्यः सपल्लवमुक्त-

रलक्ष्मीकमिव निजाश्रयप्रभावादाम्रद्रुमं कुर्वन्तं, शिरसि विस्फुरता चूडामणे-र्ज्योतिषा निधानमिव गुणानां, अस्वल्परूपमप्रमितकान्तिकमनीयमनन्तलावण्य-ललितं, मध्यतनस्य जगतः प्रभुत्वे एकमपि परिगतमशेषराजन्यलक्ष्मीभिः, सर्व-नरलोकजुषामुपरि वर्त्तमानमपि तले एकातपत्रस्य(विराजमानम्?) नवखण्डभूम-ण्डलाधिराज्यसिंहासने निविष्टमपि लीलासरस्तटे ससुपविष्टं राजानमद्राक्षीत्।

दृष्ट्वा च सप्रत्यभिज्ञमिवान्तरुल्लसता सम्मदेन सपदि प्रहसितेक्षण-कपोलपालिः सरभसमतिसत्वरैः पदैरागत्य भुवं प्रतीहारस्य सह तेन च किञ्चि-दाभाषमाणः क्षणं तस्थौ। स तत्र तिष्ठन् ज्ञापितानन्तरमवनिपाज्ञानुवर्त्तनप-रेण प्रतीहारेण सगौरवाह्वानसन्मानितः प्रविश्य कृतोचितप्रणामः प्रतीहारद-र्शितं यथार्हमासनं भेजे। उपविश्य च सप्रतोषमात्मनः कृत्या राजानमुप-श्लोकयाञ्चकार।

ये दानोत्कुरगन्धसिन्धुरघटाकुम्भान्भृशं भिन्दतो
लग्नाः संयति वर्त्तुलोज्ज्वलरुचो राजन्! कृपाणे तव।
लोकस्तान्प्रतिवक्ति मौक्तिकमणीन्मिथ्यैव सत्यं पुन-
स्ते धाराजलमज्जदूर्जितरिपुव्रातोल्लसद्बुद्बुदाः॥

अपि च—

त्वत्खड्गाघातवेगोच्चलितमुरुमणिश्रेणिभास्वत्किरीट-
त्विड्गाढोपप्रदीप्तं गतमहितशिरःसङ्गरे दूरमूर्ध्वम्।
तस्यैवाशु प्रवृत्ते त्रिदशवनितया सार्द्धमूढे विवाहे
यागान्ति(?)स्तम्भशोभामनुभवति नभोवर्हिं राजन्! मुहूर्त्तम्॥

अनन्तरमादाय वामकरतलाद्दक्षिणपाणिना तत्र वस्तुनि व्यक्तीकृतं कुण्डलितमेकं पटमग्रतो भूत्वा देव! जगत्त्रयस्वामिना सुरेन्द्रेणाप्यनासाद्य-मिदं मेलकस्थानमशेषजननयनपरिषदां वस्तु। पश्यतु पशुपतेः प्रसादसर्वस्व-हरो देव इति राज्ञः समर्पयाञ्चक्रे। राजाऽप्यन्तरएव वसन्तशीलेनाच्छिद्य समर्पितमादाय किमेतदिति च प्रसार्य रभसा निवेशितोदारदृष्टिरर्द्ध एव चित्र-प्रपञ्चितामात्मनो मूर्त्तिमपश्यत्। उपजातविस्मयश्च हंहो! केन किल कथमह-मिहालिखित इति नेदीयसां कौतुकमुपजनयति जनेश्वरे मिलितात्महृदय-त्वादतिहर्षेण विकसिताक्षिरध्यक्षः सकलसैन्यानां सिद्धलाङ्गदो जगाद। देव! देवपूजाक्षणे यत्र गतां युष्मन्मूर्त्तिमनुध्यायति स खल्वेष ध्यानपटः सेनापतेः

पञ्चालसिंहस्य। तदा हि दिग्जयप्रवृत्तः पञ्चालसिंहः स्थलपथपरिमाणं धरणि-पीठमुपसाध्य जलनिवेशदुर्गमाणि द्वीपान्तराणि प्रसाधयितुमम्भोऽध्वना पोतयानैः विचरितुमारब्धवान्। तथा पर्यटंश्च कदाचिदेकत्र क्वचन विगलदुप-कूलकेसरतरुकुसुमसुरभितोदन्वदम्भसा धौतसितसैकतायां रमणीये खेचरवि-श्रमसद्मन्यन्तरद्वीपकेऽवतीर्य निर्वर्त्य च पौर्वाह्णिकं कर्म क्षणं विशश्राम। ततश्च लब्धाऽनुकूलपवनतया त्वर्यमाणो निर्यामकैः सत्वरमुत्थाय पोतमारूढवान्। तत्रैष त्वरया व्याकुलितहृदयेन देवपूजोपकरणाधिकारिणा द्विजेन विस्मृतः। क्षणेन च योजनशतप्रमाणमध्वानमुल्लङ्घ्य वहता पोतेन तत्किल स्थानमुज्झित-(मिद)मितिकोऽवैति पदे पदे तादृशानेकदृश्यमानान्तरद्वीपसहस्रधारिणि पयो-निधौ येन पुनर्निवर्त्य गृह्येत। इत्यभिधाय तस्थौ।

राजा तु भवत्वनेन तावदन्यदिह किमास्त इति पश्यन्नग्रे सन्धानरेखया मेलित इवापरोऽयमुपलक्ष्यते पट इति कुतूहलात्सर्वमुद्वेल्य सहसैव पुरस्तादा-क्षेपशिल्परचनामिव पितामहस्य, चित्रशालिकारम्भचर्चामिव रतेः, परिज्ञान-त(प?)ट्टिकामिव मनोभवाह्वस्य, रणव्यूहकल्पनामिव शृङ्गारसुभटस्य, त्रिभु-वनाङ्गनारूपमपहृत्य नियमितनिश्वसितशब्दगुप्तां तस्करीमिवावृत्यपटमवस्थि-ताम्, उद्यतहरललाटलोचनानलभयपलायितामसमशरशरीरश्रियमिव निभृ-तीभूय संलीनां, शक्रशापसंपातितामुर्वशीमिव चित्रवपुषा परिणतां, वर्त्तित-नवनाभिमण्डलाभोगभूमिमिवसौभाग्यक्षेत्रपालस्य, लिखितस्तनचक्रवर्तीं वशीकरणविद्यामिव त्रिभुवनस्य, भरितकपोलपलस्वस्तिकामभिषेकवेदिकामिव यौवनावनीश्वरस्य, प्रदर्शितरूपसारां केवलिकामिव युवजनमनोविकारज्ञानस्य, पक्ष्मसम्पुटास्पन्दनैरनिमिषविलोचनां देवीमिव विभाव्यमानां, निश्चलाङ्गलता-वयवभावेन मदनदाहमूर्च्छितां रतिमिवानुमीयमानाम्, अनालापतया तपश्च-रणाचरितमौनां गौरीमिव लक्ष्यमाणां, सितप्रभासंभारशालिनि पटे लक्ष्मी-मिव क्षीरोदवारिणि, उदन्वतीमिव जाह्नवीपुलिने, सावित्रीमिव द्रुहिणहंसपक्षा-सने, सरस्वतीमिव आसनसरोजपत्रे, रोहिणीमिव हिमांशुवक्षसि, महीमिव द्वीपकरणकल्के, केदारीमिव पट्टाभिषेकपाटे निविष्टां, रतिसङ्गनिःसहानङ्गचाप-लतामिव लिखितां, प्रतिपदिन्दुमूर्त्तिमिव रेखामयीं, परमेष्ठिसृष्टिक्रियामिव प्रसञ्जितानेकवर्णां, सूत्रसंहतिमिवाधिष्ठितपटाम्, अभिरामदर्शनवर्तीं चित्रगतां युवतिमद्राक्षीत्।

आलोक्य च तां सहर्षं, अहो! रूपमेतस्याः।
शृङ्गारस्य जगज्जयध्वजपटालङ्कारचिह्नं नवं
छायालग्नमनल्परूपरमणीगर्वस्य यात्रावृतम्।
गात्रत्राणविनिर्मितं च कवचं देवस्य चेतोभुवः
केनैतल्लिखितं वरेण सुधियामस्याः सुरेखं वपुः॥

अथवा—

सत्यं पटो धवलितः कलया हिमांशोरालोडितोऽमृतरसेन च वर्णकौघः।
पुष्पेषुरात्मशरतूलिकया लिलेख तेनैतदित्थमतिनिर्वृतिहेतुचित्रम्॥

यद्वा केवलमियं वज्रलेपेनैव लिखिता प्रकृतिरनुमीयते। कथमन्यथा पक्षिणीव मे लग्ना प्रगाढमितो न विघटते दृष्टिरस्याश्च चित्रकर्मणि विपश्चिता। नियतमसावेवरेखा चक्रवर्त्तिलक्षणमङ्गगतं मदनराजस्य; ललाटपत्रके चास्मिन्नमलमषीलिखितेयं कुरुलसंहतिः स्फुरन्मन्त्राक्षरश्रेणिरिवरूपवतीनां योषितामवश्यं दर्पज्वरमपहरत्येव; किञ्चैतद्दर्शनं सद्य एव पुंसां मनो विकारयतीत्यविश्वासादिव रतिरनङ्गेन सर्वतः सहैव परिभ्रमति, रोहिण्यरुन्धत्यौ शशिवसिष्ठयोरुदयानुदयेष्वपि पार्श्वं न मुञ्चतः,श्रीः सोदरेण मणिना कौस्तुभेन लक्ष्यमाणाप्यजस्रमसुरद्विषं (आश्लिष्यन्ती?) चात्र(स्ते,?) शची सततमनिमिषेण चक्षुषा शक्रमालोकयन्ती तिष्ठति, उमाऽपि परिगृह्य कायार्द्धमन्धकरिपोरङ्गमिलितैवास्ते। तत्खलु रूपसर्वस्वकलशी का पुनरियं भविष्यतीति सञ्चिन्त्य चित्रादपवर्त्य कौतुकोन्नतेन चक्षुषा ससंभ्रमं संभाव्य तं निवृत्तशुकशरीरं पुरुषमप्राक्षीत्। "हंहो! महात्मन्! कथय, को भवान्?, कुत्र कुले जातवान्?, अवासश्च किं नाम कमनीयं नाम?, जन्मदेशे च कस्मिन्नपि पत्तनविशेषे स्थितवानसि?, विद्याभ्यासेन केन वा प्रकर्षमागतोऽसि? क्व चास्मिन्मूर्त्तिभृता पदेन घटितास्पदेयमीदृशी मृगीदृशः प्रतिकृतिरालादिना, का चेयम्? किमर्थमिह प्रपञ्चिता चित्रेण? त्वमपि कथममुं शुकशकुन्तभावमापन्नः? को वा पुनरात्मलाभे हेतुः?" इत्यभिहितो नरेश्वरेण "स्वामिन्! महत्कुतूहलवती च खल्वियं कथा नितान्तमवहितैः श्रूयताम्" इति सोऽब्रवीत्।

अत्रान्तरे च समुचितार्थवेदी विलोक्य सर्वतो वसन्तशीलः सादरं व्यजिज्ञपत् "देव! श्रोतुमिमां नवरसानुषङ्गिणीं कथामस्थानमयं प्रदेशः। तद्वरमिह सेव्यमणिमण्डपान्तर्निविश्य विलब्धैः श्रूयते (श्रोतुं?) व्यतिकरोऽयम्

अत्र तु प्रतीहारहुङ्कृतेन मूकतां गतेऽपि परिजने समन्ताद्दुर्निवारैरेभिरासन्नैरधिमुकुरमञ्जरीकुसुममलिझङ्कारैः, अधिफलमुच्छृङ्खलशुकादिशकुनिकलकलैः, अधिचूतशिखरमुल्लपत्पिककुटुम्बकूजितैः, अधितमालषण्डमुन्नादमयूरकेकारवैः, अधिदीर्घिकापुलिनमतिकलमरालकोलाहलैः, इतस्ततो विकृष्यमाणं मनो नावधानसखं भवितुमीश्वरम्" इति प्रोक्तो महीपतिरेवमेतदिति सत्वरमुदस्थात्। ततस्तदाकर्णनकौतुकत्वराभरेण पट्सप्तपदेऽपि वर्त्मनि स तत्र गव्यूतिशतायिते कथंकथञ्चिदुर्वीपतिराप मण्डपम्।

विमलमणिमहिष्ठे मण्डपे तत्र सार्द्धं
प्रणयिभिरुपविष्टश्चिन्तयन्नेतदेवम्।
भवतु तदिह यन्मे वाञ्छितं सूचयन्ती
स्फुरति हरनियोगादस्य सारस्वतश्रीः॥

इति कायस्थकविसोड्ढलविरचितायामुदयसुन्दरीकथायां
चित्रसन्दर्शनो नाम सारस्वतश्रीपदाङ्क-
स्तृतीय उच्छ्वासकः॥

॥ चतुर्थोच्छ्वासकः ॥

अथ तथोपविश्य सान्तःप्रतोपमवहितीभूते भूभृति साद्भुतकथाकर्णनरसोत्सुकेषु च तत्परमुपेतेषु प्रोक्ते हृदयवेदिना वसन्तशीलेन स खलु शुकशरीरनिर्मुक्तो महात्मा कथयितुमारेभे। "श्रीमन्! निशम्यताम्। अस्ति भुवनेषु प्रसिद्धा विविधसौधसुधैकधवला कीर्त्तिरिव मर्त्यलोकस्य, प्रोन्नतायतनध्वजविराजिनी जयश्रीरिव जम्बूद्वीपस्य, विमलहर्म्यनिर्माणमणिमयी विभूतिरिव भारतवर्षस्य, प्रभूतारामरमणीया वृत्तिरिवोत्तरापथस्य, भूचक्रवलयिनो महार्णवस्य दृष्टान्तेनेव गभीरजलदुर्गमेण परिखावलयेन विराजमानपरिसरा, शिखरसम्मिलितैः स्खलितरविरथतुरगतुण्डडिण्डीरपिण्डैरिव चन्द्रकान्तकपिशीर्षकैर्दन्तुरेण मरकतशिलाप्राकारेण परिगतोपान्तभूमिः, अनेकशः श्रिया गर्भवतीभिरिव महोदराभिश्चित्रशालिकाभिरलङ्कृतान्तःपरिकरा, प्रथितपरिशुद्धाचरणचारित्रवता जनेन सर्वतो वस(ह?)न्ती त्रैलोक्यभूषणम्, अखिललोकोपकीर्त्यमानाभिरामनामवती मथुरा नाम नगरी।

यस्यामुपेन्द्रविदलितस्य कंसासुरस्य सर्वतो रुदतीनामन्तःपुरपुरन्ध्रिकाणामनणुकज्जलकलापकालीकृतैरश्रुवारिभिरापूरितेव द्रावितेन्द्रनीलसप्रभं प्रवा-

त्र्यमानोऽपि वृद्धैर्बलवतः पुराणस्य कर्मणा विपाकेन बलाद्बाल एव मलिनवृत्तौ द्यूते परां प्रसक्तिमुपजनयन्नुद्वेजकः पित्रोरभूवम् ।

एवमनुदिवसमुपचीयमानप्रवृत्तितया प्रौढिमधिरूढेन तेनैव च रसेन वासितान्तःकरणस्य क्रमेण निष्ठितनिजाशेषद्रव्यतया कदाचिदाक्रम्य बन्धुभ्यः, कदाचिद्बन्दीगृहीत्वा श्रीमद्भ्यः, कदाचिच्च विधाय राजोपाधिं जनपदेभ्यः समाहृतेन समन्तादर्थेन द्यूतमस्खलितखेलनविलासमनुशीलयतः प्रयान्ति मे दिवसाः॥

अथाहमेकदा प्रतिक्षणमक्षीणखेलनव्यसनः शीलयन्नान्धिकादिबहुप्रभेदपरिगतं द्यूतमिदानीं जयामि तदानीं जयामीति प्रत्याशया सुदूरमन्धीभूतेन मनसा हारयन्ननवरतमकिञ्चनतया क्वचिद्द्यूतकारैरापणचतुष्पथेषु विधृतमात्मनो धनेन जनन्या मोच्यमानं, क्वचिद्विलासिनीपाटकेष्वातपोपवेशितं जनकेनोत्थाप्यमानं, क्वचिद्देवभवनाङ्गणेषु निखातं भ्रातृभिराकृष्यमाणमात्मानमवधार्य चिन्तितवानस्मि । ननु किमेवमत्राहमन्यैरनुचिन्त्यमानो लघूकृतेनात्मना तिष्ठामि। धनाधीना हि वाञ्छितरसोपभोगसम्प्राप्तिः; धनस्य च कृते कियान्नाम न मया वराकःकदर्थितो लोकः, तावदादौ श्रीमतामीशः पितैव पुत्रतया प्रतिक्षणमपकृष्यमाणेन रिक्तीकृतः कोशेन, जननी च बालदुर्ललिततया शून्यीकृता भूषणकलापेन, बन्धुजनो हि सौदर्यवशितया वियोजितो विभवेन, जनपदोऽपि राजसूनुतया निष्किञ्चनीकृतो धनेन, वीरवृत्त्या च बलाद्बन्दिग्रहेण गृहीत्वा श्रियमसारीकृतः सकलोऽपि सीमान्तर्वर्त्ती सामन्तलोकः। तत्तेभ्यो गृहीतमर्थजातं कियत्किल भविष्यति। अपीडया परेषामपरं तावन्तमर्थं कुतश्चिदर्जयामि। यमाजन्म नाम खेलतस्त्रुट्यति। नवाऽन्यत्किमपि मन्मनोऽध्यवसायगरिमानुरूपमस्ति विना महार्णवरत्नजातमृते रोहणाद्रिमणिवर्गात्, किन्त्वगस्त्यपरिपीतोद्वान्तस्य वारिधेरत्नान्युच्छिष्टंधनमित्यस्पृश्यानि । निक्षिप्य भूमावुपर्युपविष्टस्य कृपणस्य वित्तमिति रोहणस्य च मणिचक्रमनादेयमन्यथा भुजबलेनोन्मथ्य रोहणनगेन्द्रं, प्रतापेन प्रशोष्य च पाथसां नाथं किं नामनगृह्णामि दुरन्तसन्तानमनयो रत्नसर्वस्वं, यतः किमसाध्यमभिमतार्थसिद्धावनुबन्धिनो वीरस्य । तथाहि—

गर्जत्येष रसं तरङ्गमुखरो दुर्गाध इत्यम्बुधि-
स्तावत्तावदसावलङ्घ्य इति च स्तब्धो हिरण्याचलः।
यावन्न प्रलयोपरूढतरणिस्तोमातपस्पर्द्धिना-
माधारो महसामशेषविजयी वीरः करोत्यादरम् ॥

अथास्तु वा किमनेन तावदन्यतो विभावयामि, तत्किलान्यत्किमत्रभूवलये सुभटभुजपञ्जरोपसाध्यनये। साधु स्मृतम् अस्त्येव सकलसुवर्णमयागारप्राकारपरिकरा रक्षसां निवासनगरी लङ्का। सा च पूर्वं स्त्रीहृदयेन रामेणाऽपि साधिता, किं पुनरशेषभुवनैकवीरस्य न मे साध्या भविष्यति। अतस्तस्यां गत्वा हठादाक्रम्य गृहीतमखिलमामूलतः सुवर्णशिलासंभारं विभीषणस्य च कुबेरकालात्सञ्चितं कोशजातमारोप्य वलयोपनतानां स्कन्धेषु रक्षसामिहानीयते। न हि यावदित्थं पूरयामि मनसो द्यूतकेलिषु व्यसनमित्येवं चेतसि विनिश्चित्य दिगन्तयात्रोचितं मुहूर्त्तमनालोचयन्नविमृशन्नेव च द्यूतव्यसनलङ्घितः परिणतिं कार्यस्य दूराध्वलङ्घनोपयोगिनीं प्रक्रियामाधाय मध्याह्नादुपरि षट्कर्णो भिद्यते मन्त्र इति वञ्चयित्वा समस्तमात्मनोऽनुजीविवर्गं निर्गतोऽहमेकाकी निकेतनात्।

ततश्च गृहप्रतोलीद्वारेण निर्गच्छन्नये! नियतमेवंवृताध्वगाकारपरिकरमालोक्य मा कोऽपि मां देशान्तरोच्चलितमम्बा पिता बन्धुजनो वा ज्ञास्यति, ज्ञात्वा च हृदयवात्सल्येन मा कोऽपि स्खलिष्यति, मा कोऽपि प्रेम्णा पृष्ठे लगिष्यति तद्यथा न खल्वेवंविधोऽयमनेकविधोऽन्तरायः सम्पद्यते तथा निभृतमन्यैरज्ञायमानस्त्यजामि जनपदानुपङ्गिणीं भुवमिति विचिन्त्य तथैवालक्षितक्रमेण झगिति निर्गत्य पुरीपरिसरादनार्त्तेन चेतसा दक्षिणां ककुभमधिकृत्य प्रवृत्तोऽस्मि। गन्तुमनां च (नाश्च ?) तमुल्लङ्घयन् प्रथमप्रवासरभसाङ्गयसागतिजवेन प्रस्तुतं पन्थानमस्तंगते भगवति सहस्रभानौ योजनशयितकेति नाम्ना प्रसिद्धं ग्राममासादितवानस्मि।

तत्र च प्रवेश एव दृक्पथमुपागते ग्रामसरसि निर्वर्त्य सायन्तनं सन्ध्याविधिमनुक्कुरेण तमसा किमप्यस्फुटतामुपेतवत्यालोके लोकैरनवलक्ष्यमाणः पुरा परिचितस्य पुराणवयसो मधुरान्तर्विख्यातस्य सदैव तद्ग्रामवासिनः पिप्पलक-नाम्नो घृतकारस्य मन्दिरमापृच्छय प्राविशम्। तेनाप्ययमागत इति राजसूनुरिति धृतमित्रमिति च ससंरम्भमभ्युत्थानपूर्वं कृतादरगौरवेण यथोचितैः स्वागतप्रश्नासनदानादिभिरशेषतोऽपि सत्कारैः प्रीणितोऽस्मि निर्वर्तितपूर्वापरकरणीयस्य च शय्यागतस्य ममान्तिके प्रेम्णा समुपविश्य "कुमार! सुदूरयायिनैवामुना स्वरूपेण क्व नाम गन्ताऽसि, कतमं च नगरं नाद्यामनन्यगोचरप्रयोजनं येनैवमेकाकी चलितवानसी"त्युक्तवान्। मयाप्यवे मदीयमिदं सुदूरदेशानुसर्पणरहस्यमवेत्य मां कदाचिदिह नगरान्निर्यायिनि

ग्रामे स्थितोऽयं मत्प्रवासमसहमानो वराकः स्वयं प्रचलितुमक्षमः क्षणेनैव तातस्य ज्ञापयित्वा निवर्त्तयिष्यति, निजकुटुम्बमपहाय वार्द्धकविधुरोऽपि प्रेम्णा समं चलिष्यति। तदलमत्र विश्वासेन। छन्नार्थकथनेन प्रतारयाम्येनमिति सम्प्रधार्य, "भोः पिप्पलक! श्रूयताम्। इतो दक्षिणेन सिन्धुरस्ति। ततः परं पारमुत्तीर्य क्वचिदेकस्मिन्नमानुपप्रचारिणि प्रदेशे किमपि सुमनसामसाध्ये धनं मयैव साध्यमास्ते। तत्राहमेवमुच्चलित" इति प्रोक्ते पुनस्तेन न किञ्चिदुक्तोऽस्मि। किमेतच्चेतसि विभावितं यदयमतिप्रसिद्धो द्यूतरसिकः सदैव वन्दिग्रहोपार्जितेनार्थेन व्यसनं सारयति तदेष तत्र कुत्रापि चलितवान्। अतः किमिति दुर्वारप्रसरमविशृङ्खलमनयदुर्ललितं राजपुत्रमर्थाभिव्यञ्जनपरेण प्रश्नादरेण पीडयामीति प्रायोऽनुचिन्त्य परमसौ तूष्णीमकरोत्। केवलं सेवकाचारमनुसरन्नुपविश्य द्वारि दत्ताङ्घ्रयामको जाग्रदेव गृहीतायुधस्तस्थौ। अहं च प्रथमाध्वसञ्चरणश्रमेण बलादायातया निद्रया सुखप्रसुप्तस्त्रिभागशेषायां रात्रावतिस्पष्टपरिकरं स्वप्नमद्राक्षम्। किलैकत्र कानने वनश्रीरिति(व ?) प्रसन्नमधुराकृतिरेका स्त्री पयोधरे बद्धकरं कण्ठीरवमवादीत्।

"त्वं विक्रमेण करिवृन्दविदारणैक-
मल्लो मृगेन्द्र जगतीह सदा बलिष्ठः।
अद्यत्वसौ तव पयोभृतिकल्पितोरु-
फालस्य पौरुषमपास्य विधिर्बलीयान्॥

इति श्रुत्वा तेन च स्वप्नसम्भ्रमेण झगिति प्रबुद्धोऽहम्। अये स्वप्नोऽयम्। एवं दृष्टवानस्मि। तत्काचिदस्माकमन्वयदेवतेयमीदृशाध्यवसायेन पयोभृति समुद्रे बद्धफालस्य ममाग्रे पौरुषादितो बलवान्विधिरवधित्वेन प्रभविष्यतीति सिंहशिक्षापदेशेन प्रायः कथयति। अथवा किमेवममुना कापुरुषविकल्पेनोत्साहमपहस्तयामि मृषा परिणामः सर्वो हि स्वप्नसंरम्भः किमिति स्वप्नस्यैव पृष्ठे लगामि। तावदितः प्रबोधमासाद्य समुत्थितोऽहमिदानीम्। एष एव समयः प्रयातुमस्ति। जगत्यपरो बलीयान्विधेर्भण्यते। एकोऽपि यो ममापि विपक्षीभूय पुरो भविष्यत्यादौ तमेव परिपन्थितयोपस्थितं निर्मथ्य यास्यामीति दर्पोत्सेकतरलितस्त्वरितमुत्थाय, "हंहो पिप्पलक! तिष्ठतु भवान्। यामो वयमिति प्रणयादनुव्रजितुमुद्यतं तमचिरस्खलनपूर्वमापृच्छ्य निर्गत्य च ततो ग्रामादमन्दया गत्या गन्तुमारब्धवानस्मि।

ततश्च(को)नाथ(म ?)दुर्व्यसनविनटितो महात्माऽपि हास्यानुसदृश(शं?)

नाचरति । यतोऽहं तथा शश्वद्वहता प्रयाणकेन स्वमादौ देशमतिक्रामन् यस्मिन्नेव नगरे ग्रामे वा यस्यैव गृहे प्रविशामि तेनैव द्यूतकारोऽयमस्मद्गृहात्किमप्यपहृत्य यास्यतीति सुप्रसिद्धत्वान्निकामशङ्कितेन नेत्रनिक्षिप्तो भोजयित्वा प्रेष्यमाणो जनेन दूरादवलक्षितत्वात्समानविधैरालिङ्ग्यमानो निमन्त्र्यमाणश्च द्यूतकारैरालोक्य च द्यूतमानन्देन विस्मरामि प्रस्तुतं प्रयोजनम् । उपरि तस्यैव गत्वा भवामि । तत्र च जयता कितवलोकेन दीयमानामनेकशो रेखामासाद्य तेनैव च रमणेन स्वयमुपविश्य खेलामि न चैतत्किमपि चेतयामि यत्किल लङ्कां प्रति प्रस्थितः पथि स्थितश्चाहं (हमिति ?) । पश्चान्निष्किञ्चनीभूतश्च किमधुना खेलनाय सारयामीति चिन्तया कार्यं स्मरामि । तथैवचात्मानमात्मनैवोपहस्य ततोऽपहस्य (सृत्य ?) निस्म(स्स ?) रामि । इत्येवममुना क्रमेण गमितबहुवासरया कालसम्पदा प्रथीयसीमुत्तरदक्षिणयोरन्योन्यमवनिमण्डलानुभागकलहादङ्गमि(भिग ?)तयोर्दिशोर्निवारयितुमन्तरप्रवेशितां भुजलतामिव महोदधेः,अनिलतरलितोर्मिशिखरशीकरप्रकरैर्मदावस्थामिव वरुणकुञ्जरस्य, तीरविरचितानल्पतापसकुटीरकैर्निवासनगरीमिव धर्मस्य, प्रचारवीथीमिव निर्वाणनगरस्य, महासरितमत्रभवतीमवाप्तोऽस्मि रेवेत्यपरनामवतीं नर्मदाम् ।

या रेवेति निषन्तयातु(मिषात्पुनाति ?) विशदापारप्रवाहश्रिया
साक्षात्सा क्षितिमाजगाम गगनादुत्तीर्य मन्दाकिनी ।
कुत्रान्यत्र समीरसङ्गमसमुड्डीनोदबिन्दुव्रज–
व्याजात्तीरशिलातलेषु मिलितस्तारागणो दृश्यते ॥
या शाश्वतपदा देवी तरङ्गसरिकास्रजं ।
बिभर्त्ति वृत्तकल्पान्तसङ्ख्या रेखावलीमिव ॥

ततश्च सरभसमभिनन्द्य वन्दितजलोऽहमुत्तीर्य सुखावतारेण वर्त्मनातामतिनिम्नोदरां सरितमेनया मेकलकन्यया पूरितं प्रविष्टोऽस्मि दक्षिणं देशम् । इतःपाथोधिपरिखावती लङ्केव(गन्तुं) प(व?)रमित्युदञ्चितोत्साहमुदग्रवेगं च प्रचलितस्तस्मात् ।

अथ क्रमेण सन्त्यजन् समदशबरीकटाक्षकल्लो(ल्लोल ?)कदम्बदुस्त्यजानि भिल्लपल्लीवनानि, लङ्घयन्नुद्दामपामरकुटुम्बिनीकुचशैलदुर्लङ्घ्यान् ग्रामान्, अतिक्रामन्नपारपौराङ्गनालावण्यजलदुर्गदुरतिक्रमाणि नगराणि, अतिगच्छन्नतुच्छतरुसुन्दरोद्यानवलयान्धकारदुरतिगन्यानि मलयमण्डलानि, निस्तरन्नसमशीतातपाद्यसंवरणायासदुस्सहं क्लेशम्, अविश्रान्तगमनो भानुरिव, भुवनलङ्घनोत्त्रा

तक्रमस्त्रिविक्रम इव, पृष्ठीकृतमहीतलः कूर्मराज इव, स्वेदाम्बुसंपर्केन जलाकृतिर्वरुण इव, त्वरापरिक्रमेण च प्रचलत्पादः पवमान इव, संवृत्तवानस्मि।

एवमहमनेकगिरिकूटतटिनीमहाज्वटैरारोहावरोहविषमम्, अपारहरिणिचक्रादिक्रूरतरसत्वसञ्चारेण प्राणप्रणाशदारुणम्, अनीरभूकान्तारालविस्तरेण च तृष्णातपक्लान्तिदुस्तरं पन्थानमतिक्रम्य गच्छन्नेकत्र परमेकहेल्यैव निजप्रसरसंरुद्धाशेषदिग्भागभोगिनि, प्रखरहरिकरजकोटिकुट्टितानेककरिकरोटिकूटाद्रिमति, प्रचण्डदवदहनधूमान्धकारपुञ्जकनिकुञ्जक(निबिड ?) निकुञ्जवति, प्रभञ्जनप्रहतपक्वकपिकच्छुगुच्छकोषगलितकेसरपरमाणुरुग्यारजस्विनि, प्रजरदजगरमुखोदरस्फुरत्फूत्कारभरसमीरिणि, हरिशरभप्रायवनजन्तुनि, खदिरशाकशाखोटप्रायतरुणि, दर्भसूचीप्रायतृणजातिनि, वल्मीकप्रायभूमिनि, भीषणतया प्रकर्षमापन्ने, दृषदसञ्चारवर्त्मनि महावने पतितोऽस्मि।

तत्रैव चान्तर्गच्छतो मे तिग्मांशुरस्तं जगाम पश्चादग्रेऽपि भूरितया वनाभोगस्य भग्नलङ्घनोत्साहः क्व नाम निरापदि प्रदेशे गमयामि यामिनीम्; किमस्य तरोः स्कन्धमधिश्रयामि; किमिदमद्रिदरीमध्यमविविशामि; किमत्र घनलताजालिनि गुल्मवलये वसामि; किमग्रे क्वचिदितोऽप्येवंरूपमपरमुत्कृष्टं वसतिस्थानमासादयिष्यामीति वितर्कपरतन्त्रेण चेतसा शून्य इव प्रसर्पन् सहसैव परमस्तरविबन्धनोत्सर्गविगलितैरिव ध्वान्तपटलैराच्छादितोऽस्मि।

तथैव च यावदन्धकारेऽपि लब्धाश्रयपरित्यागानुतापात्कृतयथोपस्थितावस्थितिविनिश्चयो व्रजामि तावत्सुदूरमतिघनान्धतमसगर्भे मुरद्विपो वक्षसि कौस्तुभशलाकामिव प्रदीपभ्रान्तिमुत्पादयन्तीमुल्लसन्तीं च कुतश्चित्कान्तिकलिकामपश्यम्। दर्शनेन च तस्याः ससंशयमम्हे! किमिदमेवमुद्योतते; किमेष क्वचिदाश्रये वितीर्णो दीपः प्रज्वलति; उत स्फुरन्तीभूतदहनार्चिषः शिखेयम्; अथवा निधानं ज्योतिषां वह्निः; आहोस्विद्दिव्यौषधीप्रभेदः कश्चन। भवतु वा किमपि। अस्तु तावदनुसरामि परतस्तु दृष्टे सत्यस्मिन्नुचितमाचरिष्यामीति निश्चित्य तथाप्रवृत्तः कियत्यापि कालकलया तमुद्देशमासादितो झगित्यग्रे तयैव कान्तिशिखया द्योतिताभ्यन्तरमभित्तिकेन च बहिर्मण्डपेन मण्डिताङ्गणमुग्रतमस्य तमसः श्यामिकया कज्जलकूटायमानमत्यन्तजीर्णतया च खण्डस्फुटितमायतनमद्राक्षम्।

सहर्षवेगं च गत्वा समीपमन्तः प्रहितेन चक्षुषा विलोक्य भगवतीं दुर्गामन्तिके च त्रुटितेष्टकायां भित्तावतिचिरविपन्नपन्नगस्यास्थिशेषे शिरसि वि-

योनमानं दिव्यरत्नम्. अये शून्यं चण्डिकायतनमेतत्; एषा न सा भुजगसफे-
रस्य प्रदीपस्तंजयन्ती कान्तिकलिका । तत्साधु संवृत्तम् । इदानीं यदि नाम कुतश्चिद्द्विजानः(पां ?)स्थानमासादयेत तदहमङ्घ्रिकरमुखप्रक्षालनात्समनशुचितामाधाय देवीं नमस्करोमीति संप्रधार्य तथा कुर्वन् कथञ्चिनाद्दृशो नमसि दृष्टायामर्जुनच्छायामल्पविरलास्म्भसि पुष्करिण्यां तद्वि सकलं विधाय त्वरितमेवान्तः प्रविष्टो जय जय त्रिभुवनजनाप्यायिनि कात्यायनीति भक्तिप्रयुक्तं वचः प्रस्तूय स्तुतवानस्मि ।

स्वामिन्यार्ये भुजङ्गाभरणवलयिनि स्थूलशूलास्त्रदण्डे-
चामुण्डे चण्डि चञ्चत्त्रिविडनरशिरःस्रक्परीताङ्गि दुर्गे ।
देवि स्वर्नाथचूडामणिकिरणकणश्रेणिधौताग्रपाद-
द्वन्द्वे वन्द्येऽभिनन्द्ये जननि जय जय श्रीमहाकालि दिव्ये ॥

कृतस्तुतिश्च क्षितितलमिलितालिकेन शिरसा प्रणम्य समुत्थितः स्थितान्यपथिकजनोपलम्भाय वहिर्मण्डपमगच्छम् । सोऽपि शून्य एव केवलमन्तः प्रतिष्ठितं क्षेत्रपालमालोक्य तस्यापि वाक्योपहारमकरवम् ।

धूत्यावेशप्रसक्तैर्ज्वलदनलमुखोन्मुक्तफेत्कारघोरैः-
क्रूरैरुत्तालतालव्यतिकरमुखरीभूतभूपास्थिमालैः ।
क्रीडन्तं प्रेतरङ्कैः कुणपभुवि महाजङ्गलग्रासलोभ-
भ्राम्यद्घूल्लूकभू(घू ?)कप्रकरपरिगतं क्षेत्रपालं नमामि ॥

ततश्च तत्रैव मुहूर्त्तमुपविष्टः स्वान्त एव भावितात्मा सविस्मयमहो ! साधु, विधिना दुर्धरापदि महावनेऽत्र पातितो रत्नज्योतिरिदमुपस्थाप्य निर्वाहितोऽस्मि । कथमन्यथा समस्तालोकविजयिन्येवंविधे तमसि दृशोर्गोचरीभवत्येतदायतनम् । तथा च मन्ये नक्षत्रमात्रकेणाप्यालोकशून्यं भविष्यतीति सञ्चिन्त्य किल करोमि यावदुन्मेषे चक्षुषी तावदेकं झणिति मणिकिङ्किणीरणत्कारझङ्कारिताद्म्बरतलादवतरन्तम्, अन्तिकेषु विस्फुरन्तीभिरात्मप्रभाभिरदभ्रेऽपि तमसि दूरादाविर्भवन्तं, चरणनूपुरा(रा ?)वधावितया गगनगङ्गामरालवालकश्रेण्येव धवलनरकरोटिमालया कृतोत्तरासङ्गं, नवाङ्गशिरःप्रणयिना कपालेन संसारफलाष्ठी(ष्ठी ?)लकमिव दर्शयन्तं, भस्मनः प्रोद्धूलनेन चिताङ्गधूलिधूसरितं निर्वाणदेशाध्वनीनमिवानुमीयमानं, सततो गृहीतैर्भूपालिप्तैरिभिराच्छोटिताशेषतारकधनं नभोनगरलुण्टाकमिवानन्द्यमाणं, वानरकपिशितया शुक्लकपालशुक्त्या सम्पूरणाय गृहीतेन शशिबिम्बस्यार्द्धेन

तिमिरमिव प्रतीयमानं, प्रमाणातिरिक्तमनुष्यशिरःकर्परकरङ्कया स्रजा संगमितजटाक-लापं कापालिकमपश्यम् ।

स चावतीर्य कृताभिवन्दनो देव्या निःस्मित इव समान्तिकमाजगाम । कृताभ्युत्थानपूर्वोपचारनिनतप्रणामेन च मया दर्शितोचितप्रश्रयः समुपविश्य वत्स ! कुतोऽत्र दुरतिक्रमापायभूरिण्यरण्यविधुरे निपतितोऽसि, कतमः किमर्थमिति ससंरम्भमुवाच । अहमप्यादितः समस्तमात्मनो स्व(न्व?)यनिवेदनादारभ्य दुर्विनयविस्तृताध्यवसायपरिकराङ्कं लङ्कां प्रति प्रस्थानमाख्यातवान् । ततश्चासौ मुनिः सशिरःकम्पमेकाग्रतया क्षणं सन्मुखमुदीक्ष्य झटिति घटितपर्यङ्कबन्धः स्थिरीभूय नभसि निक्षिप्तचक्षुरस्थात् । अथ क्षणेन कुतोऽप्यागत्य नचाभ्रपट ?[1] ....

....

र्येगजदशनमुसलायमानं भुजद्वयमेवास्ते ।

दंष्ट्रयोरादिकोलस्य यत्र न प्रौढिरिष्यते ।
तत्रैतदायताभोगमास्ते धीरस्य दोर्युगम् ॥

अपिच—

त्रैलोक्यश्रीरसौ दासी तावदुच्छृङ्खलायते ।
यावद्वीरः कृतास्कन्दो न दोर्दण्डमुदञ्चति ॥

तदेषाऽद्यतनी वृत्तवृत्तिरल्पेन प्रभूतमुत्पादयन्ती लाभवती मे वणिज्या समभूत् अन्तः समारुह्य चेमामिदानीमेव किं न व्रजामि । दिव्यशक्तीनिहि विमानयानान्यारूढिसमकालमेव चिन्तितां दिशमुद्दिश्य नभसि प्रयान्ति । तिमिरमुद्योतश्चेति चर्मदृशामस्माकम् । अमीषां तु देवतासिद्धानां सर्वं प्रभास-विस्पष्टमेवेति सञ्चिन्त्य, प्रणम्य क्षेत्रपालपरिग्रहां च भगवतीमम्बिकामनुगत-समाहितेन चेतसा संभाव्य तद्विमानमारूढवानस्मि ।

तद्धि क्षितिपालशेखरमणे शृणु, प्रचारपाटवेन या(ता?)दृशमारूढे मयि झगित्येवोत्पत्य हरगलगरलकज्जलमलीमसं सुदूरमन्तरशिरोभागमारुरोह । ततः परमुपक्रान्तं प्रयातुम्, अनन्तरमारचितगुरुवेगनिर्गमप्रसरं परितो विस्फु-रन्तीभिरतिधवलवैजयन्तीभिर्ग (ग) नगङ्गाडिण्डीरवल्लरीपटलमिव मरुता नीयमानम्, अनणुमणिकर्मनिर्मलोद्योतडम्बरेण प्रदीपतन्त्रमिव तिमिरविग्रहे-णोच्चलितम्, उच्छलत्किङ्किणीरणत्कारनिःस्वनैर्वेगोज्झितसमीरमिवारब्धविज-

१ अत्र ग्रंथो विगलितो भूयान्

पतितोऽस्मि । कथमीदृशमद्भुतमनन्तगभीरो महार्णवः । किन्नु मत्तोऽस्मि । किन्नाम मत्तोऽपि नाहम् । किमंभोभिरनन्यानि करोऽपि नाऽयं । किमहमपि म त्स्य न भवामि । किमङ्ग (सुतुङ्ग?) तरङ्गतरङ्गाकृतया सर्वमीदृगेव दृश्यम् । किमंभोजन्मजनितवैधुर्यस्य भ्रमोऽयमन्तःकरणस्य । किमिदमीदृशमंभो-विभीषणाद्भुतस्वरूपमिन्द्रजालं वा किंचित् । किमिति न नन्वेतद्विमानम् । तदे-तन्निश्चिन्त्यमचिन्त्यापातदुर्धरं किन्तु पुराकृतमुपस्थितं कर्म । किं विकल्पाद्ये नेदानीमनुस्मृतं स एव स्फुटीभूतः स्वप्नो यो मया तत्र योजनशतिका-ग्रामे सूतकारपिप्पलकस्य सद्मनि सुखेन दृष्टः । यथा किल तया स्त्रिया मृगेन्द्रशि-क्षाक्षैरस्तवाग्रे पौरुषं निरस्य विनिर्वर्तितोऽयानिति प्रोक्तोऽहमतस्तदेतद्दुर्लीयसां विधेर्विजृंभितम् । अथ भवतु किमेभिरयान्तरवितर्कैः । प्राकारान्तरमधिविशामि पुरस्तात्तु यथा तत्तथैव स्वयमाविर्भूयमानमवगमिष्यामीति संचिन्त्य चंद्र-मणिघटितकवाटवल्गुना द्वारेण प्रविष्टोऽस्मि । तत्र च मसृणमणिधूलिपांसुलेन पथा स्तोकान्तरमुपसर्पन्नर्द्धपथ एव दूरतोऽपि रत्नाश्रयात्समीरसारितान्तर-पलाशपटलात्कल्पतरुमञ्जरीभरादिव निस्सरन्तीभिः, आलोकलीलोद्वेल्लन-तरङ्गितादहीन्द्रफणाफलकवलयादिव समुच्चलन्तीभिः, उन्मथितगर्भाद्रोहण-तटादिव विजृम्भमाणाभिरनेकशः प्रसरसंरंभवतीभिः प्रभाभिरग्रेतनं प्रज्वलन्त-मिव प्रदेशमद्राक्षम् । दृष्टमात्रे च तस्मिन्झगित्युद्गतेन भूयसा भयेन कति-चित्पदानि पश्चान्निवृत्य ससम्भ्रममाःकिमहमागत्यान्ततस्तस्यैव पतितो मुखे वाडवस्य । कस्यापरस्य चण्डार्चिषोऽवस्थितिरुदरे महार्णवस्य । निस्सीम-सम्भूतिरसावप्याभोगस्तेजसां । जानामि चायमेभिरेव तेजोभिः शोषिताना-मित्थमिह प्रणाशः पाथसाम् । अथेदमप्यनुमानमितस्समागच्छतोऽस्य वायो-रत्यन्तशीतलतया प्रतिहतमिव भाति । ततश्चान्यदेव वस्त्वन्तरं किमप्येतत् । अस्तु वा किञ्चन । व्रजामि कृत्वा साहसम् । इतरथाऽपि ममेत्थमापन्निमग्नस्य संदिग्धं प्राणितमन्यत्र यत्किल गमिष्याम्यहमतस्तावदपूर्वदर्शनेन सफलयामि चक्षुषी, पश्यामि किमिदमीदृग्विधम्, अनन्तरन्तु भवतु यद्भाव्यमिति कृत्वा विनिश्चयं चलितस्ततोऽस्मि । तथा गच्छन्समंदसञ्चारमाशङ्कितेन चेतसा किय-दभिक्रम्य पुरस्तादुत्सर्पिण्यास्य (णस्व!) प्रभाकलापस्य गर्भे पिण्डितं निर्माण-मिव रविकराणां, स्तम्भितं स्वरूपमिव विद्युतां, पुञ्जितमुत्थानमिव प्रदीपानां, दिनान्तनिष्टि(हि?)तरुचेरुपक्रमस्थानमिव भास्करस्य, क्षुधोपतप्तस्य जठराग्नि-स्तम्बमिव समुद्रस्य, मन्दराघातनिर्गतस्य कुटुम्बालोच(क?)मिव कौस्तुभस्य,

मथनविदूरपलायितानां गिरिदुर्गमिव मणीनाम्, आरब्धमथनेभ्यः सुरेभ्योऽपन्हुतं रत्नसर्वस्वमिव वरुणराजस्य, महाकोलेन रसातलादुद्धृस्यमानायाः सागरोर्मिभिराहत्य पातितं मणिकिरीटमिव वसुन्धरायाः, यादोभिरम्भोधिजलं हरतामम्भोमुचामाच्छिद्य गृहीतभग्नस्येन्द्रधनुषो दलमिव पुञ्जतया विश्रान्तं, प्रलयसमयोपयोगिनामेकत्र मिलितं तेजस्विनां वृन्दमिव कालातिवाहनधिया सङ्कुच्यावतिष्ठमानं, पातालतलवासिनो ज्वलतः कालाग्निरुद्रस्य समुत्थितं ज्योतिरिव स्तम्भाकारेण परिणतं, कुम्भयोनिजनितापकारक्रोधादम्भोधिना तज्जनक इति बलादावध्य कारागृहोपरि कृतेनेव धामवता रत्नकलशेन विभूष्यमाणशिखराग्रविलग्नया जलशायिनो हरेसूली(स्तल्पी?)भूतेन शेषाहिना विमुक्तया निर्मोकलतयेव धवलप्रलम्बया वैजयन्त्या विराजमानं, मद(ध्य?)घटितशालभञ्जिकाश्लेषरोमाञ्चितैरिव निविडकिरणाङ्कुरकण्टकितैरमलमरकतस्तम्भैरुद्भासमानं, माणिक्यमणिभूमिसङ्क्रान्ताभिरुपरि मण्डपनिवेशितानामतनुमुक्तावचूलवलयानां प्रतिबिम्बपरिपाटिभिः सहजरङ्गावलिमनोहरम्, उभयतो द्वारशाखासन्नजनितविद्रुमदलपुत्रिकापाणिप्रणिहितस्य शशिकान्तसृष्टेर्लीलाकमलस्य कर्णिकीकृतया पुष्पराग(कलि)कया सततमनुच्छिन्नदीपकालोकं, सर्वतो निहितरत्नसन्तानैरधनीकृतरत्नाकरं, तलपीठसञ्चिताचरमचामीकरशिलाभिरकिञ्चनीकृतकनकाचलं, निरन्तरनिवेशिताशेषजन्तुरूपैः शून्यीकृतत्रिभुवनम्, अनेकरचनाविन्यासचारुताभिरियतीकृतविश्वकर्मविज्ञानम्, आनन्दकन्दशो-(सा?)रसमकर्मनिर्माणमेदुरम्, अदूरपुष्पकुसुमारामवलयितमपद्मयमुद्दीप्रमणिमयं महिष्ठमायतनम्।

सपद्यपधूताशङ्कमुच्छ्वसितहृदयश्च सम्यगाह्लादनिर्वृतया दृशा सम्भाव्य रभसेन गत्वा प्राविशमपद्मयं च तत्रान्तःप्रतिष्ठितं शब्दनिवार्थप्रतीतेरखिलसंसारसृष्टेरादिभूतं भगवन्तमम्बिकानाथम्। घटितकरकमलसम्पुटस्तु तं प्राणिनामिष्टमभीष्टसिद्धये स्तुतवानस्मि॥

देवः पातु शिवो जगन्ति पटुना स्नेहेन सिद्धाञ्जने-
नेवाभ्यञ्जितया दृशा भगवती यत्र प्रिये पार्वती।
आर्द्रेभत्वचमच्छनेत्रपटवद्वीवोरगं हारव-
द्भूतिं चन्दनधूलिवत्तिलकवद्बालेक्षणं वीक्षते॥ १॥

इति स्तुतिपूर्वमवनितलमिलितजानुमस्तकः प्रणम्योत्थाय विश्रान्तकामः समुपवेष्टुमेकान्ते माणिक्यमणिफलकवेदालं मत्तवारणकमाश्रियम्। अग

१ इलघ०

तस्मिंश्चाविशन्नेव झगित्यङ्गणोत्सङ्गभुवि समुत्सर्पिणा रणन्मणिरत्नझङ्कारमुखरेण ध्वनिना निकृष्टदृष्टिः, एकदेशस्थमेव लीलया चलन्तमनन्तविस्तारं, पुरक्षोभमिव स्त्रीराज्यस्य, व(न ?)न्दनवनमिव शृङ्गारस्य, मेरुमिव सौन्दर्यस्य, सार्थमिव यौवनस्य, काञ्चीमुखावघट्टितेन रत्नमकरेण प्रकटितमकरवाहनं सैन्यमिव मन्मथस्य, स्फुरन्मुक्तासरप्रसृतेन प्रभापटलेन परिणतचन्द्रिकं कुटुम्बमिव चन्द्रमसः, कर्णपाशदोलिन्या कुण्डलश्रिया विलसितान्दोलकं जातिवर्गमिव वसन्तस्य, कराग्रविधुतेन लीलाकुवलयेन गृहीताञ्जनकूपिकं परिग्रहमिव रतेः, अविरलकुवलयकलेन सहोत्थिततिमिरनिकुरम्बं पातालादिव समुत्थितं, मौक्तिकाभरणविभ्रमेण सञ्चलिततारकं नभस इवावतीर्णं, पदतलारुणिमसम्पदा लग्नदिग्गजशिरस्सिन्दूररागमाशाभ्य इव प्रसृतं, सहजशोणाधरबिम्बतया मुखमिलितविद्रुमदलं समुद्रादिव निस्सृतं, श्वसितसौरभविभूत्या घटितपारिजातपरिमलं स्वर्गादिव भ्रष्टम्, एकार्णवं लावण्यवारिभिः, एकारवं किङ्किणिरणितारवैः, एकास्तसन्ध्यं शिरस्सिन्दूरपांसुभिः, एकाभ्रमाभरणप्रभाभिः, त्रिभुवनश्रियः क्रीडापुत्रिकौघरचनायमानं, मुखसमीरसौरभापतन्मधुपच्छलेन गुलिकाधनुर्द्धरेण मनोभुवा मरकतोपलगुलिकाभिरिवानवरतमाहन्यमानम्, आयान्तमनन्ययुवतिसामान्यं, कन्यासमूहमद्राक्षम् ।

मध्ये च तस्यातिधवलवृत्तातपत्रस्य मूले लक्ष्मीरिव चन्द्रमसो मण्डलाङ्कलिता, सावित्रीध्यानपरतन्त्रेण चेतसा सृजतः प्रजापतेस्तदाकारपरिणते च सैवेति प्रतीयमाना, रतिरिति प्रियाप्रत्ययादिव समालिङ्गिता मनोभवेन, रोहिणीति मुखच्छायागतेनाधिष्ठिता चन्द्रेण, सर्वतो विसारिणा कान्तिपरिवेषेण पृथ्वीव परिवृता पयोधिवलयेन, लावण्यजलभरादुत्तीर्य शैशवेन तटे न्यस्तमुङ्कुपदण्डिकातल्पकमिव सुललिताङ्गुलीसञ्चयमुद्वहता चरणयोर्द्वयेन विराजमाना, पुष्पायुधेन प्रहरणीकृताभ्यां कनककेतकीसूति(ना?)भ्यामिव यथोत्तरमाकारवृत्ताभ्यां जङ्घाभ्यामुद्भासमाना, (सुल) क्षणकिङ्किणीगणोपशोभिनो मनोभवस्यन्दनस्य नितम्बस्य युगेनेव पीनोरुयुगलकेन भ्राजमाना, मेखलोपरि जनितमणिपट्टिकावलयप्राकारमनङ्गभूभुजो गिरिदुर्गमिवगरिमरम्यं नितम्बमुद्वहन्ती, नियतमितः परतो भव्यं नास्तीति विधिना प्रदत्तं शून्यमिव सुवृत्तसुन्दरं नाभिबिम्बमाबिभ्रती, जगदेकधन्विना मनसिजेन धनुर्विद्यावलेपादुत्क्षिप्तं सूचीनाराचमिव प्रतनुसरलं रोमावलीदण्डमादधाना, तानवमुपजनयतो विधातुरुदरात्करतलैकपालिकया त्रिवारमधिकमुपादानद्रव्यमुत्सारयतो जाताभिस्तटीभिरिव त्रिसृभिर्लावण्यललिताभिर्वली-

भिस्समन्तान्मानसमाक्षिपन्ती, मन्मथरतिभ्यां विधाय मधुपानमधोमुखन्य- स्तयोरापीनवर्तुलयोः कनकचषकयोर्युग्मेनेव कुचद्वयेन संसारं सफलयन्ती, सुदृढमुभयतोऽप्यंसदेशसंक्रान्तस्य शशिविशदकपोलयुगलस्य कान्तिजलतरङ्ग- सरलि(सङ्ग?)ताभ्यां प्रतिबिम्बच्छटाभ्यामिव भुजलताभ्यां चक्षुराह्लादयन्ती, शङ्खरेखोपहासनिस्सृतं हासप्रसरमिवातिनिर्मलं हारमाबिभ्रता कण्ठेन शोभ- माना, मुखामोदमालूत्रयता पितामहेन व्यापारितात्पारिजातपल्लवात् विघटि- तेन प्रलघुपाटलदलेनेव बन्धूकबन्धुना बिम्बाधरेण मान्मथं रागमुत्पादयन्ती, नेत्राञ्चलोपचर्चितया दुकूलधवलया कपोलयोर्युगिकया मुखश्रियो नेपथ्यमिव सूत्रयन्ती, मणिकनकसृष्टिना मकरकुण्डलेन कन्दर्पवाहनस्य मकरस्य बन्धन- शालायमानमभिरामं कर्णयोर्द्वितयमवतंसकुवलयेन कृतोचितच्छायं दधती, रतेर्विलासमणिदर्पणस्य ललाटफलकस्याधारदण्डकेनेव वरीयसा नासावंशेन शृङ्गारमुद्दीपयन्ती, भुजगरक्षाधिष्ठितोपकण्ठमनृतदीर्घिकाद्वयमिव सुतारसरलं नेत्रयोर्युगलमालीषु प्रेषयन्ती, सौरूपेण रतेर्द्वितीयेयमिति प्रदत्तेन द्विकेनेवा- ङ्केन भ्रूलताभोगेन युवतिसृष्टिमुत्कर्षयन्ती, वर्तुलिमचारुणा तिलकेन मध्योप- रचितमण्डलां यौवनाश्ववारस्य वाह्ली(ला)भुवमिवातिभव्यां भालस्थलीं बिभ्राणा, भ्रूलतां लिखतः प्रजापतेरङ्गस्पर्शकम्पितात्करतलाङ्गलिभाजनस्रस्तेन मषीदलेनेव प्लावितैरत्यन्तमेचकितकान्तिभिः कुन्तलैस्त्रैलोक्यमपि मोहयन्ती, भालाग्रलम्बिना सीमन्तमणिभूषणावचूलमौक्तिकेन नक्षत्राकारया समुत्तीर्य गगनादवन्यत्येव निरूप्यमाणपूर्व(सूर्ध?)सौन्दर्यसंभूतिः, अङ्गनाङ्गच्छायास्वरूप- तया घटितेव सुवर्णसा(रो?)चिषां दलैः, उज्ज्वालितेव माणिक्यमणिमयूख- क्षोदेन, धौतेव मौक्तिकान्तस्सारवारिभिः, पुंसिते(प्रस्पृष्टे?)व शरदिन्दुचन्द्रिको- पान्तकेन, दृष्टिपथमुपेता ताराणुत्रिकेवाविद्या(ह्लादयि?)त्रीलोचनानां, दर्शनाप- क्रान्ता स्वमाङ्गनेवोन्मादयित्री हृदयस्य, लतेव लोचनालोकनकन्दस्य, कल्पपरिग- निरिव शृङ्गाररसस्य, रसभूमिरिव संमदास्वादस्य, स्वादोपलब्धिरिव संसारसु- खस्य, श्वासपरिमलानुसारिणा म[illegible]कदम्बेन कुवलयवनमनुसारयन्ती, कुचलिखितपत्र[illegible]दर्शनलम्पटदिन्दुरिव [illegible] नेत्राण्युन्मीलयन्ती, निर्विषिक्तारिण्या [illegible] कर्णकुवलयावतंसमुल्लासयन्ती, [illegible] ता स्निग्धस्निग्धाग्रवालेन कुन्तलकलापेन शिखण्डिकलापमाच्छादयन्ती, [illegible] म मन्मथपिशुनलोचनविलासेन [illegible] नानुभावयन्ती, [illegible] सत्त्वापि कन्यापरिग्रहस्य स्वामिनी, मनोहराङ्गिनि कुमारी भुवनतिलकान ।

यस्या द्विःशिखरेण मन्दरनगेनेवोच्चपीनस्तनद्वं-
द्वेनाध्युषिते वपुष्यधिलसल्लावण्यवारान्निधौ।
उद्भूतं मुखमिन्दुबिम्बमुदभूद्बिम्बाधरः कौस्तुभः
श्वासामोदभरोप्यसावुदभवद्वाक्पारिजातद्रुमः॥

किं बहुना—

निर्माय यां झगिति दृष्टविशिष्टरूप-
सृष्टेर्विधातुरुदितो हृदि मान्मथाग्निः।
तेनोग्रतापविधुरः शिशिरं स मन्ये
नाभीसरोजमधितिष्ठति चक्रपाणेः॥ ३॥

झगिति च तामहमुदीक्ष्य चिन्तितवान् अहो कतमं कस्येदमीदृशमेवं स्वरूपरूपातिरेकसुन्दरं युवतीरत्नम्। अथवा यद्यसावीदृशीह पयोधिकुक्षावास्ते तल्लीनी(ली?)कमिदं यन्मन्दरगिरिभ्रमादितो विनिर्गता लक्ष्मीः(इति)। निर्गता चेत्तत्कयाचिदन्यया देवष्टकितो वैकुण्ठः। यदि वा नियतमस्मिन्नेकान्तदेशे समागत्य रतिप्रभृतियुवतिरूपातिरेकवर्त्तिना सौन्दर्येण कौतुकाद्धटितेयमन्यैव तरुणी प्रजापतिना। यस्या रूपस्य प्रथमाभ्यासवर्त्तनैर्लक्ष्मीः, उपादानमृद्ग्राही तुरग उच्चैःश्रवाः, स्तनबिम्बकाधारपिण्ड ऐरावतकुम्भौ, श्वासपरिमलोपयोगद्रव्यं पारिजातविटपी, मुखावमार्जनोपान्तकं हिमांशुः, करप्रक्षालनजलममृतं, देहप्रभोद्योतनात्मकलिका कौस्तुभः, इत्यादिभिश्चैतदङ्गनिर्माणोपकरणवस्तुभिः प्रतारिताः स्वर्गिणो रत्नाकरेण। यदि पुनरसौ ज्ञाता तदेकु(भवेत्किलु?)खल्वेकेन मन्दरमर्द्दात्मना सर्वैरपि कुलाद्रिभिः कृत्वा मथनव्यापारमेषा न तैराकृष्यते प्रसभमित्यादि परामृशत्येव मयि सा तत एवायतनप्राङ्गणाद्दक्षिणया वीथ्या सह तेन कन्याकदम्बकेन पुष्पोच्चयाय पुष्पाराममविशत्। एका च छत्रवाहिनी तासां मध्यादागत्य संवृत्य चातपत्रं प्रविश्यायतनस्य कोणे व्यमुञ्चत्। तत्रोपरि च दिव्यांशुकवेष्टितोऽयं विमुक्तः पटः। झटिति च पटं विमुच्य तथैव त्वरया तरलितमनोवृत्तिरन्यतश्चक्षुरक्षिपन्ती मामपश्यन्त्येव निर्गत्य साऽपि तासां मिलितवती। अथाहमतिकौतुकादुत्तरलमानसो ननु यावदागच्छन्ति पुष्पोच्चयव्यासक्तेन व्यग्रता तावत्पश्यामि किमेतदंशुकावेष्टितं वस्त्विति कृत्वा झटित्युत्थाय मायकोणादेकान्तमिति गतः कोणैकदेशं यावदेकमवनुन्नयामि तावदाश्लेषितः पटोऽयं पटं चैनमुद्वेष्ट्य यावदवलोकयामि तावदेकत्रास्ते चैव तत्रैकपार्श्वभागपट्टनिरन्तरश्चेयं तस्याः कुसुमकार्मुकायतनवासिन्यागतनितम्बाङ्गा चित्रमयी मूर्तिरास्ते। अथाहमहो क पुनरस्य संप्रा-

रसागरसंरणेरियमीदृशी शिल्पविधिविशेषसारा सृष्टिरेषा पुनरत्रैव कन्यकावस्तुनि व्यक्तीभूतेति युवयोरपूर्वाकारसुन्दरिमदर्शनोल्लसितविस्मयरसप्लवेन जडीभूत इव निश्चलावयवकायो विकसितेन चक्षुषा प्रत्यङ्गमुभयतः क्रमेण निरीक्षितुं लग्नः।

अत्रान्तरे च कुतोऽपि गर्भगृहोपकोणदेशाद्धवला भस्मनः प्रलेपेन, कपिला जटाभिः, आपाटला जटानामग्रकोटिभिः, आवरणवल्कलेन च हरितकान्तिरित्यनेकवर्णधरा मूर्त्तिरिव गारुडी तत्कालकलितदारुणभया दुरवलोकप्रकृतिरेका भ्रुकुटिबन्धकारितमुखी प्रकामवृद्धा तपस्विनी कोपेन परमुदर्गलं ज्वलन्ती निर्जगाम। निर्गत्य च सहसैव सा कण्टकघटासङ्घट्टितैरिव, ज्वलत्कणकरम्बितैरिव, शृङ्गिविषनिषिक्तैरिव, रोषशाणोत्तेजनतीक्ष्णैर्वचोभिः आः पाप पुरुषरूप प्रपञ्चितपशुभाव त्रुटितपटुविवेकगुणोद्भ्रष्टचैतन्य धिङ्मानुष्याधम त्वया किमेतदाचरितमपवित्रम्। कैतदपवर्गसंविद्विषयनायकजनयोग्यमासनस्थानमारूढोऽसि। मूढ किमिति देवतार्चनवस्तूपकरणमियं भग्ना। तन्नूनमिदानीं त्वमस्यैव कर्मणः फलमनुभव। प्रथमसमुत्थितेन वचसा प्रोक्तः पशुरेव। किन्त्वन्यत्र समुड्डीय पतनेन पतङ्गजातावनेन च माणिक्यशुक्तिकाभङ्गेन तदाकारया चञ्च्वा शुको भूत्वा क्षपय कालम्। अयं च पटः शिरसि शुकजातिविलक्षणं शिखा भविष्यतीति मां शप्तवती। अहमपि तथा शप्यमानस्तया ननु किं मया कृतमिति यावदधस्तात्पश्यामि तावदास्तृततदीयकृष्णाजिनोपरि स्वचरणेन भग्नां माणिक्यमयीं शुक्तिमपश्यम्। दृष्ट्वा च सानुतापमये चित्रविलोकनाक्षेपपरतन्त्रतया हृदयस्य, यावदसावुपमर्दे भिद्यते तावदपि न चेतितं मदङ्घ्रितलेन। तदियमेतस्य कर्मणः सुमुपस्थिता परिणतिः। भवतु स्वीक्रियत एव दैवेन यथा प्रदत्तमेतत्फलम्। यतः।

गात्राणि कांस्यपात्राणि कर्मभिश्छिद्रितान्यसौ।
कांस्यकार इवाजस्रं परिवर्तयते विधिः॥

तन्नमे दुर्विषहशापसन्तापदुस्तरमेतत्। तथाप्यर्थेदमतिदुरन्तसंवादं दुःखमुपनतम्। यत्किल केयं कस्य सुता कतमकुलप्रसूता क्व वसतिः कुतोऽत्र समागता किमभिधाना त्रिभुवनेऽप्यनन्यतुल्याकृतिः कुमारी कमेनमपहस्तितानङ्गरूपं पुरुषपुङ्गवमिह हृदीव पटे लिखितमावहतीति न खलु प्रश्नानवसरेण कथञ्चन परिज्ञेया च दभूवेति चिन्तयति मयि प्रायस्तथा शापकलकलमाकर्ण्य झटित्युन्मुक्तपुष्पापचयकर्तव्या त्वरितमेव द्वित्रिसखीसनाथमूर्तिरसौ कन्यका संभ्रान्तेव ततोऽतिनेदीयसः कुसुमवाटिकोदरादाजगाम।

बुद्धवानस्मि। इदानीं परमेकहेलयैव लघुस्वरूपमग्रे विलोक्य स एवायमिति सादृश्या(स)पूर्णाभिज्ञानहर्षस्त्वरितमागतः प्रतीहारादवगम्य दक्षिणदिगङ्गनाभरणकुण्डलं कुन्तलं देशमध्यासितं प्रतिष्ठाननाम्नो नगरस्य स्वामिनमवन्यासेकनाथमानन्दिनामधेयं भवदवस्थानशोभनं भुवमनुप्रासः। त्रिभुवनैकभूषणमियं च दर्शिता चित्रेण कन्यका। कथितं च यथाऽनुभूतं कुतूहलम्। आलोकितश्च ज्वलत्कन्दर्पहुतवहोत्तप्तसीमन्तिनीमनोविश्रामधारागृहं देवः। प्रमोदाह्लादितं च प्रसन्नदर्शनालापगोष्ठीसुखानुभोगेन सनेत्रश्रवणमन्तःकरणम्। अतश्चाद्य पुरुषधर्मानुबन्धी दिगन्तरानुसरणप्रसङ्गेन युष्मत्सङ्गमान्निवृत्तकृत्योऽयमात्मा। जातश्च ममात्र संसाराम्भोधिपतने भवत्परिचयात्मको रत्नलाभः। प्रत्येतु च मर्त्यलोकमकरध्वजः स्वामी। यस्मादसौ कुमारी यथा चित्रगतेनात्मना सेव्यमानया भवत्प्रतिमूर्त्या सनाथमित्थमेनं पटमावहन्ती भगवन्तमम्बिकादयितमाराधयति तथा नूनमनुरागिणी त्वयि प्रसूनशरसायकशिखाभिः खण्ड्यमानमर्मग्रन्थिरत्यर्थमन्तर्व्यथामनुभवन्ती क्वापि कालं क्षपयति। एतत्तु पुनरित्थमावेद्यते। यत्खलु कुतश्चिदसम्भाव्यमानदर्शनया तया सौन्दर्यसम्पदा भोः क्षितीन्द्र तादृशी सा, न या निखिलविश्वकल्पनाशिल्पनिपुणेनापि वेधसा स्रष्टुं पार्यते, न या निरस्तलोकत्रयवराङ्गनारूपश्रीभिरपि शचीप्रभृतीभिर्विजेतुं शक्यते, न या त्रिभुवनाधिपत्यार्पणसमर्थेनापि तपसा प्राप्तुमर्हतीत्येवमुक्त्वा व्यरंसीत्।

राजाऽपि अहो ! सुमहदेतदाश्चर्यम्, इमं वृत्तान्तमावेद्य कुमारकेसरिणा विस्मायितमाप्यायितं च मे मानसम्। यत्किलात्र संसारमहोदन्वति विष्मक ल्मषोल्लोल (विषमकर्मकल्लोल ?) लीलाभिरन्तरितं क्व दृश्यते कुत्र वाऽऽसाद्यते तादृशं कन्यकारत्नम्। अथवा किमत्रालोच्यते निश्चितमचिन्त्यघटनापटीयानेषविधिर्दुर्घटान्यपि घटयत्यतो विधिरेव मे कदाचिदनुकूलवर्ती कुवल यविलोचनां घटयिष्यते तामित्येवमनुचिन्त्य पुरोयायिनं कुमारकेसरिणमनल्पप्रेमोपचारचारुभिर्वचनैरुपरुध्यावस्थितये कृताभ्युपगममादाय निर्गतो मणि मण्डपाद्विसृज्य च पारितोषिकालंकरणदानैर्जनितसन्मानं वसन्तशीलमारुह्य च तुरङ्गमं सह प्रणयिना सामन्तवर्गेण नगरमधिविवेश।

इतश्च कन्याकृते नरपतिरेष मयि न्यस्तभार इति विधिना प्रहिता तां मृगयितुमिव जगाम दिनसूर्ययोर्युगली। ततश्च—

संध्योन्मेषसमृद्धः पश्चिमदिग्वर्तिभूभृतः शिरसि।

मनसि च मन्मथजन्मा मनुजपतेरुद्गतो रागः ॥
अथ भुवनमभूतालोकपातालमूलो-
दर इव निदधानः प्रोदभूदन्धकारः ।
स खलु मलिनसारं धाम यस्योपमातुं-
प्रसरति न कुतोऽपि क्वापि सारस्वतश्रीः ॥

इति कायस्थकविसोड्ढलविनिर्मितायामुदयसुन्दरीकथायां
कुमारकेसरिसमागमो नाम सारस्वतश्रीपदाङ्क-
श्चतुर्थ उच्छ्वासकः ॥

पञ्चम उच्छ्वासकः ।

ततः क्रमेण प्रस्तुतसायन्तनारालिकसमयसमाहतामन्दमङ्गलमृदङ्गरवकलकलोद्भिन्नो मदच्छटाटोप इव हरित्करिकपोलमण्डलादुच्चलितः पूर्वस्याम्, यामिनीपर्यटनप्रवृत्तानां प्रेतसैन्यानामसितपताकास्तम्ब इव प्रेतपतिपुरान्तरुत्थितत्रिशङ्कुतिलकितायां, शीतलावसरं विहाय निःसृतस्य वरुणास्त्रपाशफणिनो विस्फारः फणापञ्जर इव प्रवितत: प्रतीच्यां, निवेद्वारि प्रथमपालकोपस्थितानामारक्षकर्तॄणां करतलतुलितासिपलप्रभाकलाप इव कुवेरनगरगर्भे संभृतश्चोत्तरस्यां दिशि, समन्तादावृतवियन्मण्डलो गव(र ?)लसम्भार इव द्रवीकरणाद्विस्तृतःप्रवाहेण, यामुनो जलौघ इवोत्क्रू(ङ्ग ?)त्य विलुठितो भरेण, वात्योल्लास इव कज्जलरजसाम्, ईतिपात इव कोकपतत्रिणाम्, असितमुखपटोक्षेप इव दिग्गजानाम्, मृगनाभिपोन्तको (पत्रिको ?) पचार इव भूवेदिकायाः, तमालदलाचार इव गगनमण्डपस्य, मधुकरोत्पात इव ब्रह्माण्डपुण्डरीकस्य, मरकतोद्घाट इव भुवनकोशस्य, कलभकुलतल्पकल्पनाकुलकरिकुटुम्बिनीपाट्यमानाञ्जनगिरीतटीक्षोदसोदरो दिक्पालपुरायतनदेवतायूपवेलोपदह्यमानकालागुरुधूमवल्लरिप्रसार इव नीरन्ध्रमन्धकारो जगदाचचार ।

यत्रालोकविरोधिनि प्रविततध्वान्ते ध्रुवं नेत्रयो-
स्त्रासेन त्वरितं पलाय्य हृदयक्रोडे निलीनं महः ।
तेनात्र स्थलमत्र वारि विटपी वाचाऽत्र पन्था इति
स्वान्तेनैव निरूप्य सर्पति जनो यो यत्र तत्रैव सः ॥

यत्र च—

निभृतचरणन्यासानुक्रमामपनूपुरा—

मसितवसनां नीलाभैरप्यलङ्करणैर्वृताम् ।
कलयति शनैरागच्छन्तीं मुखानिलसम्मिल-
न्मधुपरणितैः सङ्केतस्थो युवा हृदयप्रियाम् ॥

किं बहुना—

अन्धत्वमाहितं मन्ये तमसा दीपकेष्वपि ।
अतो हस्तधृताः स्त्रीभिः सञ्चार्यन्ते गृहेष्वमी ॥

क्षणेन च पौरन्दरीं दिशमनु तादृशतिमिरनिकरेण नीलीकृते नभसि, हरहासराशिरिव दक्षिण (दाक्षायणीमुखे, ?) पाञ्चजन्य इव जनार्दनकरे, निर्मोकपुञ्ज इव कालियफणापञ्जरे, फेनपिण्ड इव यमुनाजले, मृगेन्द्र इव तमालकानने, हंस इव कुवलयवने, बलाक इव नवाम्भोदवृन्दे, झगित्याविर्बभूव तारापतिः ।

ततश्च—

ध्वान्तैकशत्रुरिति निर्भरकोपवह्नि-
संश्लिष्टदृष्टिपतनैरभिसारिकाणाम् ।
चन्द्रः सुवृत्तसितबिम्बनिभेन भस्म-
पुञ्जीकृतः शिरसि पूर्वगिरेर्बभूव ॥

तस्माच्च—

पदं कृत्वा निरालम्बमुपरिष्टाद्विधिच्छिनः ।
पूर्वशैलाक्षरस्येन्दुरनुस्वार इवाबभौ ॥

क्रमेण च—

चान्द्रं महो मण्डलभाजनस्थं
दुग्धं यथा यामवतीमहिष्याः ।
वियोगिनां [illegible]तापे—
स्खलितं व्योमतले लुलोठ ॥

क्षणाच्च—

धामभिः सितकर्पूर[illegible]तुल्यैः [illegible] ॥
[illegible]दुन्निद्रितम् ॥

अथ—

प्राप्य [illegible] ।
[illegible] ॥

अनन्तरं च—

गन्धः समृद्धो नवकैरवाणां प्रदोषवातैरवकीर्यमाणः ।
नासागतो नस्य इव क्षिणोति मानग्रहं मानवतीजनस्य ॥

इतश्च—

ज्योत्स्नासखः कुसुमकार्मुकपाणिरेष निश्चेतनेष्वपि विकारविभुस्तथाहि ।
स्पृष्टाः करेण शशिना स्रवदम्बुभावैः स्विद्यन्ति शीतकिरणोपलशालभञ्ज्यः ॥

अन्यतश्च—

अम्भःकणास्रशतचर्चितपत्रहस्तसंसक्तपङ्कजमुखी कुमुदोत्सवेषु ।
मुद्रावरुद्धमधुपध्वनितैरिवार्कशोकातुरा सरसि नीरजिनी विरौति ॥

किञ्च—

कमलिनी भुवनान्तरिते रवौ व्यपगतालिकलापशिरोरुहा ।
परिदधे विधवेव सुधाकरद्युतिवितानमिषेण सितांशुकम् ॥

अथ तस्मिन्निरस्ततमसि धवलितनभसि विकासितकुमुदसरसि निहतराजीवयशसि स्रावितशशिकान्तपयसि शून्यीकृतसङ्केतसदसि विधुरितविरहिचेतसि विवर्द्धितानङ्गतेजसि जगदाह्लादनपटीयसि विचरति सौधांशवे महसि, कन्दर्पदाहोपताप्यमानः कृतपूर्वरात्रकरणीयो राजा ज्योत्स्नामृतोपशालिते सौधशिरसि हृदयसुखोपचारप्रपञ्चितमनन्यसञ्चारमसमीपद्वारपालकसखमभित्तिकं च विलासपटमण्डपमधिष्ठितः, क्षीराम्बुधौ मधुविरोधीव धवलचीनच्छदांशुकभास्वरे महति हंसतूलतल्पे निषण्णः, हरिणलाञ्छनवतश्चन्द्रस्य दर्शनेन तदाकारसादृश्यादनुस्मृतं चित्रं वनिताङ्कितं पटबिम्बमविरतं चेतसि दधानः, तथाश्रुताद्भुतव्यतिकरपरिभावनोद्भूतभूरित्वराविसारितया ननु कथमसौ कन्यका घटिष्यते क उपायः किं क्रियते क गम्यते कुत्रान्विष्यते कः समादिश्यत इति चिन्तया समनुदन्तिनमनोवृत्तिः,अन्वेषणाय तस्यास्तर्कयन्नवस्थितिं त्रिदिवमन्दिरेषु नगरेषु विद्याधरपुरेषु गुह्यकाश्रयेषु भुजगराजधानीषु च, सर्वतोऽप्यम्बरमुत्पतितुं गिरीनुल्लङ्घयितुमुर्वीमतिक्रमितुमम्बुधिमुत्तरीतुं द्वीपान्तरमनुसर्तुमुरगलोकं प्रवेष्टुमुत्सहमानः, स्पृहयमाणः सर्वगामित्वं पतत्रिणां, सर्वविलोकित्वं जगदेकचक्षुषो विवस्वतः, सर्ववेदित्वं च योगसिद्धानां, मदनरसविमूढो गगनाधिरोहणरज्जुभ्रमेण लसति सितकरकिरणसन्तानेऽप्याललम्बिषुः, अखिलदिङ्मुखाक्रमणवाहनधिया वहति कुमुदवनमारुतेऽप्यारुरुक्षुः, आहिभुवनपथप्रतोल्या च भास्वत्यूर्मिलजलबिम्बितेन्दुप्रतिबिम्बपट्टिकाभोगेऽपि पिपा (थि-
या ?) सुरित्यनेकधा क्लिश्यमानो हृदयेन कियत्समयमवतस्थे ।

तथास्थितस्य हि चिन्तया नभसि निक्षिप्तचक्षुषो राज्ञः सहसैव तावन्तमपि संहृत्य दिगन्तसंभृतं चन्द्रिकाभोगम्, अपाकृत्य च जेतारमपि तमसां चन्द्रमसं, असीमप्रसरः पुनर्निवृत्त्येवागतस्तावदारम्भस्तादृशस्तथैव भुवनमाच्छादयन्नुपस्थितो वियति विस्तारवानन्धकारः। तमालोक्य च राजा सञ्जातविस्मयो मनसि भावितवान्, अहो कोऽयं किं जन्माऽयमेवं महाद्भुतविभूतिरकस्मादन्धकारः। किं नाम स खल्वस्तङ्गतो हिमांशुः। परं तिथिरद्य सा। यस्यां प्रथममेव कियद्धटिका च विध्वान्तमनन्तरमखिलाऽपि यामिनी चन्द्रमसा विभाति। कालोप्यहेमन्तवार्षिकतया निर्मलाम्बर एव न च विना पार्वणं दिवसमिन्दुग्रहणतया सर्वग्रासेन तमोऽपि राहवीयमाशङ्क्यते। तत्किमेतत्। किमेष पुनरुद्भूतपक्षतया समुड्डीयान्तरिक्षशिरस्यारूढवानञ्जनाद्रिः, आहोस्विदकालजलधरः कश्चिदुन्नम्य समागतस्स्यात्, इन्द्रजालं वा केनाप्युपदर्शितमित्येवं विमृशति महीश्वरे क्षणादेव स खल्वन्धकारो निजापसारेण समुद्घाटयन्नैन्दवीं विभूतिमेकत्र पुञ्जीभूय गगनान्नगरपरिसरोत्सङ्गवर्तिनि भूतले पपात। तत्पातसमकालमेव तस्मिन्पातयन्निवाश्रूणि, द्रावयन्निव हृदयं, छिन्दन्निव बन्धनानि, दूरोपसर्पणवशादकलिताक्षरव्यक्तिरत्यन्तमार्तः पूत्कारकरुणो ध्वनिरविश्रान्तमुत्तस्थौ। श्रुत्वा च तं शब्दं करुणारसगर्भमुद्भूतकरुणः क्षोणीश्वरो नन्वसावेकहेलयैव तमोराशिरम्बरमपहाय संवृतेनात्मना कः किल महीमवतीर्णवान्, अत्र च दूरान्तरोत्थानादनारमधुरः कस्यायमाक्रन्दनुवरो ध्वनिः, अथ भवतु यस्य कस्याप्येष पूत्कारः किमनेन, समन्तादार्तपरित्राणं नाम धर्मः सतां विशेषतः क्षितिपालनेष्वधिकारिणां क्षत्रियाणाम्, अतस्तावदविलम्बमेवात्र गत्वा पतितमापदि प्राणिनमाश्वासयामि, प्रसङ्गादस्य च तमसोऽप्यन्वयमवगमिष्यामीति निश्चित्य उत्थाय शय्यातलात् विधाय च वीरचर्योचितां वेषसंपत्तिं आकृष्टखड्गः प्रावृतान्धकारपटप्रभावादलक्ष्यमाणोऽङ्गयामिकैरतरलगमनवेगो मुहूर्तात्तं प्रदेशमाससाद।

झगिति श्मशानपालिन्याश्चण्डिकायाः शून्यायतनस्य नातिदूरवर्तिनो विशालविटपेनाश्वत्थशाखिना सनाथस्य महान्धकूपस्योपकण्ठे तेनान्धकारपटलेन कायकान्तितया व्यक्तिमागतेन मलिनाकृतिम्, अत्यन्तदीर्घतया दीर्घं त्रिविक्रमादपि, प्रयातधूम्रतया धूम्रं नारकपथादपि, करालाञ्जननिर्भिन्नतया लोहास्त्रमिव कालस्य, पृथ्वीकृष्णतया तमालमिव (?) ..., रत्नोपर्यतिनाट्यया गर्भपातमिव मारैः, अनिमिषमिव भुवनभोजिनः कृतान्तस्य, महामयमिव

कल्पान्तचारिणो भैरवस्य, सेनान्यमिवान्धककुचिर(कामुर?)संहारिणश्चण्डिकापरिग्रहस्य, पुम्भावमिव कृत्यायाः, पिण्डबन्धमिव भयानकरसस्य, स्पर्शपरिणाममिव विस्रगन्धस्य, यागोपघातिनामन्तश्चरोऽयमिति क्रुद्धेन शतक्रतुना क्षिप्तदम्भोलिदहनसंदीपितमिव पिङ्गोर्ध्वमूर्धजं शिरो बिभ्राणं, ज्वलद्दीपकयुगं चत्वरमिवातिपिङ्गेक्षणद्वितयदारुणं वदनमुज्जृम्भयन्तं, वक्त्रकुहरान्निःसरन्तीभिः पृथुतराभिरनेकशोऽप्यर्चिषां छटाभिर्मुहुरस्रासवतृष्णया रसनाशतानीव कल्पयन्तं, चैतन्यारोपणक्षणे सपदि विदीर्यमाणमुखदर्शनत्रासात्पलायितेन कृष्णकिरणान्धकारवता वामहस्तेन खण्डेन्दुलाञ्छितां कालरात्रिमिव दर्शयन्तम्। इतरेण च पाणिना मलिनभासि मुष्टौ स्थितां यमस्य (भ्रु)कुटिघटनान्धतमसवर्त्तिनीमापाटलकटाक्षलतिकामिव लोहितालेपरक्तां कर्तिकामुदञ्चयन्तम्, रिक्तान्त्रकूजिताकर्णनवशेन झगिति निक्षिप्ताया दृग्विद्युतः पातादिव निपतितेन सहजशालिना जठरावटेन भ्राजमानं, मेखलीकृताहिफणपंजरमणिव्रजादुल्लसन्तीभिः ज्वलद्बहुलजठरानलज्वालाभिरिव मयूखमालाभिर्नाभिकूपान्तर्दीप्यमानं, सर्वतोप्यङ्गेषु पिशितशोणिताभावत (त्त?) या स्वस्मिन्नुद्धूलकवलनाशङ्कैः प्रसादनाय देहतो विनिःसृत्य चरणलग्नैर्निजास्थिफलकशकलैरिव शुक्लातिरूक्षरुचिभिर्नखैः क्षितिपिण्डमापाण्डुरं कुर्वन्तम्, अशेषतोऽपि कीकसमयत्वादेकधातुनिष्पन्नमिव देहमावहन्तं, पितृवनविहारलग्नाभिश्चिताधूमधोरणीभिः कज्जलितामिव निकामश्यामाङ्गद्युतिं दधानम्, इतस्ततः सलव(संच ?)लद्दूषणसितोरगमिषादामिषेण भरणमलभमानैर्निर्गत्य रभसा निजान्त्रैरप्यवयवेषु मांसाशया सम्भाव्यमानं, भीषणतया विभीषकाणामपि भयमुत्पादयन्तं, वीभत्सतया नारकिणामपि घृणां जनयन्तम्, उग्रतया कृतान्तमप्यभिभवन्तं, हिंस्रतया मृत्युमप्यतिशयानम्, आवृतं भूषणीकृतानेकनरकरोटिभिः, करङ्केण च सनाथवामकक्षं, मुखीकृताद्धुललन्मांसपेशिकं, उपवीतीकृतशिरोमालम्, आलम्बितास्थिहारम्, आकारभासुरं राक्षसं ददर्श।

तेन च निधाय यमदण्डभीषणं भुजदण्डमन्धकूपोदरादाकृष्य प्रसभमवरुद्धाम्, अविरतं च सदीनमाक्रन्दन्तीं, सुत्रासतरलतारकेण चक्षुषा निभालयन्तीमभितोऽपि ककुभः, प्रभूतकर्पासपाण्डुरेषु नक्तश्चराभरणमालाकपालेषु संक्रान्तया प्रतिमूर्त्या तस्यैव शरणमिव प्रविष्टां, जटोरगरक्षितां यौवननिधानका(कल ?)शीमिवान्धकूपगर्तोदरादुत्क्रान्तां, कमलभ्रमादागतं चञ्चरीकचक्रमिव कराग्रमिलितं रुद्राक्षमादधानाम्, आवारकेण लावण्यसलिलशैवलेनेव लतावल्कलेन शोभमानां, तारुण्येन निस्तुषीक्रियमाणस्य कान्ति-

कलापस्योपरि परिस्फुरन्त्या तुषच्छटयेव योगपट्टयाकृतोत्तरासङ्गां, प्रकाशित-रूपमादर्शविम्बमिव भस्मनोद्वर्तितं गात्रमुद्वहन्तीं, चतुरङ्गप्रमाणमास्त्रयतो विधेरङ्गस्पर्शकम्पिताङ्गिच्युतेन कराङ्गुणत्रयशालिना विकर्णमानसूत्रेणेव यज्ञोपवीतेन विराजमानां, पृथुनेत्रकृष्णाजिनरुचा कुचकमण्डलुवाहिन्या त्रिवलिमेखलावन्धभृता धृतव्रतलिङ्गयेव गात्रश्रिया परिगतां, माहेश्वरीं मूर्त्तिमिव शशिखण्डमण्डितां ललाटेन, वैष्णवीं हृदयभूमिमिव कौस्तुभविभूषितामधरेण, पैतामहीमासनस्थितिमिव सरोजमयीं धवलाक्षिविक्षेपेण, वृक्षशिखाशायिभिरार्तरवप्रबोधादुत्कूजद्भिराक्रन्द्यमानामिव पतत्रिभिः, अनिलान्दोलितशिरसा निवार्यमाणकौणपामिव पिप्पलमहीरुहेण, प्रसारितकरेणाकृष्यमाणामिव सुधाकरेण, कृतालिङ्गनेनापसार्यमाणामिव निशीथमारुतेन, प्रशान्ताकारसुन्दरां चतुर्दशवर्षवयसमेकां कन्यातपस्विनीमपश्यत्। दृष्ट्वा च झटिति मा मा भैरिति गृहीतकरुणारसैर्वचोभिरासन्नमरणभयोद्भूतशोषामाश्वासयंस्तपस्विनीमहो भद्रमसृग्भुजा हतकेनास्पृश्यमानायामेवाहमस्यां त्वरितमिह प्राप्त इति प्रतोषोल्लसितमानसः सहेलहुङ्कारवं विमुञ्च विमुञ्चापसर्प रे दुरात्मन् न खलु भाजनमसीदृशानामाहारोपकरणवस्तूनाम्।

तथाहि—

एनां तव प्रकुथदामिषखण्डसाध्ये
भोज्ये यदीत्थमुपयोगवतीं व्यधास्यत्।
वेधास्तदत्र खलु रूपविशेषशिल्प-
सङ्क्लेशमीदृशमसौ वत नाकरिष्यत्॥

तदहो विस्तारिणि पितृवनेऽत्र कुत्रापि निपुणमन्विष्य कालापहृतजीवितासु जन्तुकुटीषु शटितपिशितपिण्डकैः कुरु दुष्पूरणमात्मनो जठरगर्त्तकस्येति तं नक्तञ्चरमवोचत्॥

सोऽपि झगित्यालोक्य राजानम्, अपि नाम सुरसिद्धविद्याधरोरगमनुजगुह्यकानामन्यतमः, क एष युवा, मया हि किल सर्व एव त्रिभुवनोदरविवरसञ्चारिणो वीक्षिताः पुमांसः, पुरुषपुङ्गवस्यास्य तु किमप्यपूर्वमेवाङ्गेषु लावण्यम्, अन्य एव कलापः कान्तेः, अपरैव हि रेखा सौन्दर्यस्य च, आरभटिस्तु किमापृच्छ्यते योऽयमत्यन्तभासुराकारदुर्निरीक्षाणां रक्षसामपि भयङ्करस्य ममाग्रे निर्विशङ्कमुत्खातखड्गयष्टिरेवमात्मानं दर्शयति, तन्न सामान्यो भटमात्रमसावद्भुतः कश्चित्। अथवा किमिष्टार्थपरिपन्थिनमपहस्तनीयं प्रतिभटमुप-

श्लोकनविकल्पेनालोकयन्नेव तिष्ठामि। निर्लोचयामि झटिति चैनमित्येवं विचिन्त्य कृतान्तसद्मनो मुखस्य द्वारि वद्धास्थितोरणस्रजमिव विसृत्वराकारशिखरां विकासयन् दशनसंहतिं, तथैव च विशालधवलया प्रलयजलधरवलाकाच्छन्नमिव भुवनमापादयन्, अखिलदिग्गजकुलावत्रासकेन ध्वनिना सोल्लुण्ठहासं जहास। हेलया चाब्रवीदहो को भवान् किमेवमस्याःकृते त्रिदशैरप्यनभिगम्यविक्रमं वि(नि)ग्रहीतुमागतोऽसि मां। को हि कल्पान्तविस्तृताम्बोधिजलमहाप्लवेन प्लाव्यमानां प्रस्खलितुमिह क्षमः क्षोणीं, को नाम वलवान्मया निगृह्यमाणामिमां विमोचयितुमीश्वरस्तापसीम्। किञ्च किं मे त्वया द्विभुजेन जन्तुना क्रियते। योऽहमयोध्यश्चतुर्भुजस्य विष्णोरपि, दशभुजस्य हरस्यापि, द्वादशभुजस्य स्वामिनोऽपि, अन्येषां तु गणनैव कियती तदेतद्दिष्टोपदेशानुग्रहेणोच्यसे, कल्याणप्रकृतिरसि, किमित्येवमशक्यसङ्गरसमारम्भादात्मानमनर्थसङ्कटे पातयसि, किमिति तारुण्यतरलितो गगनमुत्पतसि, किमिति दर्पान्धः कृतान्तमुखकूपे निपतसि, किमिति वीरव्रतसंयमी मृत्युमाराधयसि, किमिति शौर्यग्रहाविष्टो ज्वलत्यग्नावात्मानं क्षिपसि, किमिति रणरसास्वादप्रवृत्तो विषतरुफलानि खादसि, किमिति सुभटचर्याकुतूहलैकदुर्ललितो दारुणेन फणिना क्रीडसि, किमिति विभुजवलावष्टम्भविनटितो दिग्गजेन कराकृष्टिकेलिं करोषि, किमिति चापन्नपरिरक्षणप्रवणो रणेन विश्वैकवीरं मामुपक्रामसि, व्रज विमुञ्च दुःशिक्षितदुरन्तमिममध्यवसायमायोधनस्य न खलु विमुखेषु रक्षसां प्रवरः प्रहरतीति प्रोक्ते पलभुजा भूभुजामधीशः प्रत्युवाच।

रे रे दुर्जीव किमेवममुना प्रश्नादिनिरर्थकालापकोलाहलेन जनयस्यन्तरायमुपस्थिताहवमहोत्सवस्य। स्वप्रशंसापरो हि यस्त्वं किल वहुभुजानामपि पुंसामयोध्यमावेदयन्नात्मानं द्विभुजनिन्दापरायणो मामवज्ञया जुषे तत्र सा तवैव पिशाचिकोदरकोशकीटकस्य गरीयसी। नरेषु वहुवाहुता नाममात्य(न माहात्म्य ?)स्य। किन्तु न ज्ञातवानसि यत्खलु स्वामी निशाचरचक्रस्य रावणो विंशत्याऽपि भुजानां द्विभुजेन क्षुरनिशितधाराग्रदलितगलकन्दलोच्चलन्मौलिपातमुपसंहृतो रामेण, भार्गवेण च भुजसहस्रविस्तृतः कार्तवीर्यः, तदवधारय भटानां भुजद्वयमेवोपयुज्यते संयुगेषु॥

तथाहि—

उदञ्चचित्तानां त्रिभुवनजये दक्षिणभुजः
कृतारम्भो वामः पुनरभयदानाय चक्रिणे।

क (कु ?)पुंसां तावेव ध्रुवमुदरपूर्त्तिव्यवसिता-
वभूदेकश्चान्यो मलनिगमभूमेः शुचयिता ॥

हरिहरस्वामिनामसाध्योऽहमिति च त्रैलोक्यवन्द्येषु निन्दामातन्वती ;टितैव किन्नते जिह्वा । त्रुटिता न चेदहमिदानीं लुनामि । अपिच रे पाप ;तिपदमुदञ्चितालापैः किमिह विस्तारितेन प्राकृतजनोचितेन कलिना । यस्मा- न्मिथो मर्माविष्कारमेदुरो रण्डाकलिः, आक्रोशमुखराङ्गुलीस्फोटनप्रधानः सप- नीकलिः, असभ्यशपथिकोत्थापनपटीयान्कुट्टनीकलिः, स्वहननोपक्रमप्रवणो ब्राह्मणकलिः, शाखोद्धारपरः प्रहारवन्ध्यो वाणिज्यककलिः, कुटुम्बमेलि- हलकलोद्गलश्चान्त्यजकलिः, अन्यश्च कश्चिदन्योन्याचरणनिन्दापरायणः, को- ऽपि परस्परकृतोपकारप्रकाशनपरः, कोऽपि गर्जितरवमात्रसारः, कोऽपि चात्म- प्रशंसापुरस्सरः कलिः, इत्याद्यनेकधाऽपमानकविषयो विधेयविफलः पर्यन्तनीर- सश्च समन्ताज्ज्ञानपदः कलिः । सुभटकलिस्त्वन्यादृश एव । यत्र प्रहारमिलि- तासिधाराखणत्काररव एव सङ्करालापः, प्रबलकुन्ताग्रताडितोदग्रतरकुञ्जरा- रटितमेव महीयसी हक्का, परशुमुखविखण्डितारिशिरःसुषिरपरिणतपवनो- त्थभाङ्कार एव निर्झरागर्जिः, स्वभुजसंहृतारातिकुलपुरन्ध्रिकानुशोचनपदान्येव परेषु निन्दा, विमुखीकृतकातराभयप्रदानमेव चात्मनि प्रशंसा चारलोकस्य, तदद्य रे समरमूढ तेनैव कलिनाऽनुष्ठीयसे । प्रहर प्रहर पूर्वम् । नाहमग्रप्रहारी रणेषु । येन ते झगित्यसिलतोल्लासलीलयैव विभूय कपिलकुन्तलसटाप्रभो- द्दीप्रहरशरानलकरालितं खण्डमिव त्रिपुरस्य पातयामि धरातले शिरः, तार- यामि च विपक्षनिग्रहेण तापसीम्, इत्येवमुर्वीभुजो निशम्य शौर्यमदोद्रेक- दारुणं रणालापम्, आनंदितः प्रवीरलाभेन, विस्मितः प्रतिभटावलेपोक्तिभिः, तरलितो राजभुजवलोपलम्भकौतुकेन, त्वरितः समरसङ्गमाभिलाषेण, कुपि- तश्च प्रस्तुतार्थ(वि)घटनात्, राक्षसः—" साधुभोः शौंडीर ! साधु, योऽहं प्रकृष्टरणपथोपदेशाक्षरैरेवमनुशिक्षितोऽस्मि तदेष पूज्यसे कुशिक्षितगुरोस्स- मरशिक्षादक्षिणया राक्षसेन तव । भवाभिमुख्येन । प्रगुणो गृहाण मद्भुजपरि- घप्रहारात्पौरुषस्य फलमित्यालापसमकालमुत्पाट्य पिप्पलस्य पुरोदृष्टमसङ्कटा- यामं ताल(द्रु)ममुदग्रेण रंहसा नभसि भ्रामयित्वा क्षिप्तवान् । क्षितीन्द्रोऽपि तमापतन्तमन्तरिक्षेण सौष्टवागमनसङ्गृहीतैर्वायुभिः फूत्कारभरमुत्सृजन्तं पृथु- दलेन शाखाकदम्बकेन विपुलफणाचक्रवालभीषणं भुजङ्गमिव सरलप्रकाण्ड- मवनीरुहं सर्पारिचञ्चुसन्दंशदारुणेनासिना विखण्ड्य खण्डशः पातयामास ।

क्रोधेन यातुधानः पुनरन्यमन्याद्दशा प्रहारोपक्रमेण शाखिनं व्यमुञ्चत्। अव-हितश्च राजा तमपि तेनैव पथा निर्वर्तितवान्। अन्यमन्यं च यं यमुर्वीरुहमति-क्रोधदुर्द्धरो निशाचरः क्षिपति तं तं नभस्युद्दण्डताण्डवनटेश्वरो नरेन्द्रश्छित्वा-ऽवनौ प्रकीर्णमेव दर्शयति। एवमन्यदप्यनेकोद्दण्डगण्डोपलशिलादि यद्यथा समर्थमस्त्रीकरोति नक्तश्चरस्तत्तथैव प्रपञ्चितोचिताघातभङ्गेन विघटयत्युर्वीभुजां प्रवरः।

ततश्च क्षितीन्द्रकरतलितासिपत्रप्रभावपरिभूयमानेषु विषमपातिष्वने-कशोऽप्यस्त्रेषु वाढमुद्दीपितः प्रवलवहुलकोपानलेन कौणपः कुतोऽप्याकृष्य करं कृतमुत्क्षिप्तवानेकमपूर्वं, विश्वसंहारविदलितस्य ब्रह्माण्डसम्पुटस्य कर्परमिवो-त्पातचलितचण्डानिलेन वलादुल्लालितं, क्षितिपीठमिवादिकोलेन दंष्ट्रया विधृतं, कल्पान्तविघटितं कमठेन्द्रकटाहमिव स्फुटनवेगादूर्ध्वमुच्चलितं, देवतावतारि-तमिव अद्भुतादभ्रविस्तरं शिलापिण्डम्। उपरि चान्दोलयन्मस्तकस्य स दर्पो-द्रेकदुस्सहमवादीत्॥

कालस्यासनपीठिकाऽतिमहती भित्तिश्च मारीगृहे
मृत्योरप्यभिषेकमङ्गलविधावायामिनी वेदिका।
मद्बाहुप्रहिताऽद्य वीर शृणु भोस्त्वां संहरन्ती शिला
योऽन्यः कश्चिदिहामरेष्वपि भटस्तेनाप्यसौ रुध्यताम्॥

इत्येवमभिधाय (प्रहर्तुं प्रवृत्ते राक्षसे) नरपतिविनाशशङ्कया हा हा गृहीतमप्रतिसमाधेयं पापेन रक्षसा प्रहरणमिति साकुतमाकुलीभवति तप-स्विन्याश्चेतसि, अहह दुष्करमितो विमोक्षणमवनीश्वरस्येति विषीदत्सु खेचरज-नेषु,अहो निर्नाथमिदं जगज्जायते लग्नमिति च समन्तादुत्ताम्यति दिगीशवर्गे, न किल यावदसावाक्षिप्य क्षिपति तावदेकहेलयैव कलहकौशलविशारदो मेदिनीपतिरपहाय खड्गमादाय च विचित्राघातघटनैकचण्डं गण्डोपलमतिरय-विसर्जितेन संचारिताखिलभुजस्था (स्थे?)म्ना तेन झगित्याजघान कराग्रम-णिवन्धे पलाशिनम्। तस्य च गण्डोपलास्फालदलितमणिवन्धविधुरात्परि-भ्रश्य हस्ताच्छिला भूतले पपात। सा तादृगारम्भसंरम्भिणी महाशिला विवेश च निजाङ्गभर(दा)रितधरातला पातालम्, उत्थितश्च नरेन्द्रसम्बन्धिना साधुवादेन मिश्रितः समरमुत्पश्यतां नभसि नभश्चराणां कलकलः। अत्रान्तरे निष्फलीभूतवलवदखिलास्त्रपातप्रयासतया विलक्षो रक्षसां वरः सहसैव क्वचि-ददृश्यभावमापद्य प्रयातवान्। उर्वीश्वरस्तु विस्मितेन व्यचिन्तयत्। ननु कि-

मित्यसावसमानपौरुषः पिशिताशिष्वेवमकृतसमरसमासिरन्तराल एव गतवान्, किं सङ्गरे नरेणाधरीभूतस्त्रपया तिरोभूतवान्, उतापरोपायकामस्वधामन्यगात्, अथच्छलेन मां वञ्चयितुं प्राविशन्नभसि, यदि वा ममाशयपरीक्षार्थमेवं स्थितवान्, उतस्विदियमीदृग्विधैव प्रक्रिया रक्षसां रणेषु, किं पुनः रनेनैव पथा पलायितवान्, आहोस्विदसावेवं समरोपसंहृतिक्रमः, तत्किमेनामग्रे विधाय तपस्विनीं यामि, प्रतिपालयामि वा मुहूर्तम्, अथवा छिद्रप्रहारिणी हि रक्षसां जातिः, अतः कियत्क्षणमुदीक्ष्यत एव पन्थाः पापस्य तस्येति विकल्पमातन्वति वसुन्धरास्वामिनि, अकस्मात्तस्मादगाधरन्ध्रोदरादन्धकूपतः पातालजान्हवीप्रवाहपङ्करवोद्गार इवोज्जगाम हुङ्कारजन्मा महाध्वनिः । ततस्तस्यानुपथानुबन्धिना धूमपटलेन वर्षन्नतिचपलकालविस्फारिभिः स्फुलिङ्गैः फुल्लवुल्लोलवल्गिनीभिर्ज्वालाभिः स खलु सामीरणेन रंहसा निर्जगाल दुर्निरीक्ष्यो राक्षसः, स्थितश्चाग्रे ।

तस्य च विसङ्कटाकारविस्तृतहुताशनाभोगस्य सुदूरमनुसर्पिणा(ज्वा)लाकदम्बकेन ज्वलतीव मेदिनी, ज्वलन्तीव ककुभः, ज्वलतीवाम्बरं, विश्वमपि प्रलयकालानलकलापोद्दीप्यमानमिव दुस्सहावलोकमापन्नम् । अथ तथाकृतोपस्थितिरसावग्निमयाकृतिरग्निमयालोकपद्धतिरग्निमयालापवृत्तिरग्निमयाङ्गसंभूतिरग्निमयाशेषव्यावृत्तिश्च दुरक्षरेण वचसा क्षितिपालमब्रवीत् ।

नैषा हन्त शिला न तालविटपाद्यस्त्रेषु चास्त्रं किम-
प्येतद्यत्र विपञ्चयिष्यसि बलं बाहोरसेः कौशलम् ।
भ्रातर्वह्निरसावनेन बलवज्ज्वालावलीढस्य ते
नान्योऽस्मत्करुणारसश्रुतिभरादास्ते परित्राविधिः ॥

तदयमालिह्यसे ललत्कालजिह्वाविलोलकोटिभिर्ज्वालाभिरभिहितोऽसि भो रक्ष रक्षात्मानमस्ति रे शक्तिरित्येवमुक्तो महीपतिः कृत्वा स्मितं प्रत्युवाच । रे क्रव्यादकीटक साधु साधु अवधानेन सज्जीकृतोऽस्मि, क्व नाम छलप्रहारिणामन्वयोत्पन्नेन भवता शिक्षितेयमेवं प्रवीरपुरुषोचिता सङ्ग्रामरीतिः । किन्तु रे मूढ पारुष्यविषमाभिघातदारुणे प्रहरणं नाम सुदूरमास्तां, यः किल सुखस्पर्शेन पयसाऽपि सिक्तः प्रलीयते तस्य हुतभुजोऽवष्टम्भेन यदित्थमाजौ प्रगल्भसे तेनाविमृश्य विचरन्निश्चितोऽसि पिशाचजन्मा पशुः, पशवो हि वध्याः समराध्वरेषु । अतोऽद्य मया वधेन सम्भाव्यसे । शृणु यथा सम्भाव्यसे ।

सर्वत्राङ्गेषु वल्गद्घनगहनशिखाचक्रचण्डाग्रकोटि-

त्रुट्यत्पिङ्गस्फुलिङ्गोड्डमरपरिकरेणामुनैवाग्निना ते ।
पक्कं निर्वाप्य देहामिषमसिलतिकालूनमापीनखण्डं
तुण्डे कालस्य भास्वत्कुहरिणि शिशिरग्रासगृह्यं क्षिपामि ॥

अथवा—

वह्नेस्तवास्य मम भीमभुजप्रताप-
वज्रानलेन पिहितस्य कुतोऽवकाशः ।
उक्तं कुरु व्रज गृहं मिल बान्धवेषु
बुध्यस्व रे विसृज किं रणडम्बरेण ॥

अथेत्थमपि नास्माकमुक्तं करोषि तदिदमनुभूयतामसमसाध्यावगुण्ठितस्य फलमात्मनः स्वभावस्येति गर्वगरिमोद्गारगर्भया गिरा तं कैकसेयमास्कन्द्य ननु शीतलेन तीव्रः प्रशाम्यत्यम्भसा निर्वाप्यते वह्निरतोऽग्निमादौ नियम्य पश्चादमुं खड्गेन राक्षसापशदमपहस्तयामि, तत्खलु विना पानीयमार्द्रतरुपल्लवेनापि प्रहतोऽयमग्निः प्रलीयते तत्तथा करोमीति निश्चित्य वामेन धृत्वा कृपाणमितरेण च पाणिना नेदीयसो विनम्रशाखस्य शाखिनः पृथुदलातिमांसलं पल्लवमादाय रे रे हिंस्राधम म्रियतां म्रियतामेष विधाप्यसे पल्लवाहतिभिरित्यमन्दमाभाषमाणः प्रगुणितावातवल्गुना संस्थानेन स्थिरीभूय धावितवान् ।

अनन्तरमगेन्द्रकुलपक्षनिप्रलयभीषणारम्भदम्भोलिदहनदुर्वारडम्बरमाशुच्छिन्नं स्वसमाऽऽशुशुक्षणिप्रकरमकिञ्चिदिव नियमयितुमस्त्रीकृतेन विटपिनः प्रवालेन हेलोपक्रमं पराक्रममुदीक्ष्य मानवेन्द्रस्य, सहसैव परमहो मनसि निर्व्याजवीर्यम्, अहो भुजशौर्यम्, अहो वचस्यकृत्रिमालापपरिकरप्रौढिः, अहो समित्याभिमुख्यम् अहो महाकर्मण्युचिताम्रव्यापारनैपुण्यम्, अहो प्रबलेऽपि वैरिणि अनवरताविस्फूर्जितं भूभर्तुरस्येत्यद्भुतरसावेशात्कृतमस्तकेषु रणप्रेक्षाकुतूहलिषु देवेष्वेकादशानामपि रुद्राणां जटाजूटनस्त्रुटितजाह्नवीप्रवाहजन्मा युगपदम्बरतलात्पतन् पतितः प्रकीर्णविकटच्छटाकटकसम्पातदुर्लङ्घो वारिसन्दोहः। तेन चैकादशिकोत्तपाटगाढाम्भसां भरेण अगिन्येव सा नष्य तावत्ताऽद्भुतन्यादृशाच्चापि विस्वस्ता शवाशिनां वैश्वानरी सृष्टिः । किं बहुना वह्निशिखाङ्गनस्यान्तं तथैव त्वरया विसर्गभावगाकारमेकं शिरसि शिलादण्डमिव मूर्ध्नि, द्वितीयं कुलिशमिव कुम्भस्य, तृतीयं शृङ्गमिव कालमहिषस्य, चतुर्थं कर्णमिव शिशुकस्य, पञ्चमं विषाणमिवाभ्रकुञ्जरस्य, चाङ्कवाग्निवं चषिकाकटककिवाकनानाकर्णं, दनुनदाकालनवर्धितं सर्वसिंहनखरमिव मूर्ध्नि निर्गतिं,

कलिन्दसुताकृष्टिपादितोर्वीतटमनुदितं सङ्कर्षणहलाग्रमिव वस्त्वन्तरेण स्थितमपारपरुषताप्रचण्डमादाय मण्डलाग्रमसमखण्डनभराडम्बरप्रबलः प्रतिभटपलायनाशङ्कयेव सुदूरमसिलतोल्लासनविसारिणा बाहुपाशेन रुन्धन्नाशामुखानि, उपरि परिसर्पता कृपाणदण्डेनार्गलयन्विहायसो द्वारम्, उदारदीपकालोकदीप्रया दृशा कुर्वन्सर्वतोऽप्युद्योतम्, उत्तालतुमुलेन किलकिलारावशिविरेण विश्वगतं च लोकमुन्निद्रयन्, उदग्रपदपातदलितमेदिनीपृष्ठः प्रधावितो राक्षसः क्रोधानुबन्धातिदुर्द्धरं प्रहर्तुम्। अथासौ सहसैव परं प्रहारव्यापारितो राक्षसेन खड्गस्तदुग्रकरमुष्टिबन्धाद्विघट्य राज्ञः प्रदक्षिणां कृत्वा पुरश्चरणयोः पपात। राक्षसोऽप्यत्रान्तरे संवृत्य सपदि सङ्ग्रामदारुणं स्वरूपम्, उपरचितकरसम्पुटाञ्जलिरागत्य विनयादाजानुविनमितेन मूर्ध्ना प्रणाममकरोत्। अब्रवीच्च सप्रश्रयम्—अहो! सत्यममुतः स्वरूपादवगतोऽसि यः किल जीव इव संसारशरीरस्य गीयसे, मुक्तामणिरिव ब्रह्माण्डशुक्तिसम्पुटस्य पठ्यसे, मृगनाभिनायक इव नरलोकव्यञ्जनये(नाय?)निर्वर्ण्यसे, रत्नगुच्छ इव भूकल्पलतिकायाः श्रूयसे, माणिक्यबन्ध इव जम्बूद्वीपपदकस्य प्रतीयसे, स खलु सकलभुवनभूपालभूषणापीडचूडाग्ररत्नं प्रतिष्ठाननगरपरमेश्वरः कुन्तलानामधीश्वरो राजा मलयवाहनो भवान्। यस्य ते नामाक्षरस्तम्बः सदैवालापमालाग्रिमगुलुच्छ इव गृह्यमाणस्त्रिभुवनश्रिया सततमखिलब्रह्माण्डमण्डलोदरविहारलीलाविशृङ्खलेन मया समन्तादयमेव सुभटगोष्ठीष्वयमेव शृङ्गारवार्त्तास्वयमेव कवीश्वरसभास्वयमेवाग्रगणनासु त्यागिनामयमेव नामग्रहेषु विदुषामयमेव प्रशंसासु क्षत्रियाणामाकर्णितो बाढम्। कस्यापरस्यान्यकमिदा दैवेन वर्णितपराक्रमं मामभिभवितुमीश्वरा शक्तिः, कस्य वाऽन्यस्य प्रभावमपहाय पपात पुरश्चरणयोरेवमसौ त्रैलोक्यविजयी मण्डलाग्रः, तदेष स्वयमुपढौकितनाम्ना स्वीक्रियतां कृपाणः, मुक्ता च तापसीयम्, इदानीमनुज्ञया प्रसीद, व्रजामि निजमाश्रमस्थानम्, सिद्धश्च तवाहमनुना विक्रमरसेन. कदाचिदवसरे यस्य-कस्याऽपि कार्यमुपयुञ्जीत तत्राहमनुस्मरणीयः श्रीमता वरेणेति सानुनयमभिधाय तूष्णीं गते तस्मिन्नुपजातकौतुको नरपतिरवादीत्—भोः! सततसन्निवेशोद्भेदिना भद्रैव जायते मैत्री। तेनाद्य मे त्वा(णा?)नुभावाज्ज्ञातोऽसि निशाचरधौरेय मित्रम्। अतो न नाम रक्षणीयं ततः श्लोकमाकृच्छ्रसं कथय को भवानयमसुना स्वरूपसंरम्भेण न खलु पलाहारपौरुषं रक्षोमात्रमतिमात्रगुणोऽस्ति राक्षसेषु कश्चित्, कश्च वाऽस्यनामादिनः प्रभावो मण्डलाग्रः,

त्रुट्यत्पिङ्गस्फुलिङ्गोड्डमरपरिकरेणामुनैवाग्निना ते ।
पक्वं निर्वाप्य देहामिषमसिलतिकालूनमापीनखण्डं
तुण्डे कालस्य भास्वत्कुहरिणि शिशिरग्रासगृद्ध्यं क्षिपामि ॥

अथवा—

वह्नेस्तवास्य मम भीमभुजप्रताप-
वज्रानलेन पिहितस्य कुतोऽवकाशः ।
उक्तं कुरु व्रज गृहं मिल बान्धवेषु
बुध्यस्व रे विसृज किं रणडम्बरेण ॥

अथेत्थमपि नास्माकमुक्तं करोषि तदिदमनुभूयतामसमसाध्यावगुण्ठितस्य फलमात्मनः स्वभावस्येति गर्वगरिमोद्गारगर्भया गिरा तं कैकसेयमास्कन्द्य ननु शीतलेन तीव्रः प्रशाम्यत्यम्भसा निर्वाप्यते वह्निरतोऽग्निमादौ नियम्य पश्चादमुं खड्गेन राक्षसापशदमपहस्तयामि, तत्खलु विना पानीयमार्द्रतरुपल्लवेनापि प्रहतोऽयमग्निः प्रलीयते तत्तथा करोमीति निश्चित्य वामेन धृत्वा कृपाणमितरेण च पाणिना नेदीयसो विनम्रशाखस्य शाखिनः पृथुदलातिमांसलं पल्लवमादाय रे रे हिंस्राधम म्रियतां म्रियतामेष विधाप्यसे पल्लवाहतिभिरित्यमन्दमाभाषमाणः प्रगुणिताघातवल्गुना संस्थानेन स्थिरीभूय धावितवान् ।

अनन्तरमगेन्द्रकुलपक्षतिप्रलयभीषणारम्भदम्भोलिदहनदुर्वारडम्बरमाश्रित्रिनं रक्षसाऽऽशुशुक्षणिप्रकरमकिञ्चिदिव नियमयितुमङ्गीकृतेन विटपिनः प्रवालेन हेलोपक्रमं पराक्रममुदीक्ष्य मानवेन्द्रस्य, सहसैव परमहो मनसि निर्व्याजं वीर्यम्, अहो भुजशौर्यम्, अहो वचस्यकृत्रिमालापपरिकरप्रौढिः, अहो समित्याभिमुख्यम् अहो प्रहारकर्मण्युचिताङ्गव्यापारनैपुण्यम्, अहो प्रबलेऽपि वैरिणि गर्वमवज्ञाविसर्जितं भूभर्तुरस्येत्यद्भुतरसावेशाद्विधूतमस्तकेषु रणप्रेक्षाकुतूहलिषु देवेष्वेकादशानामपि रुद्राणां जटाजूटतटत्रुटितजाह्नवीप्रवाहजन्मा युगपदम्बरान्तरालपातपतितः प्रकीर्णविकटकटाकटकसम्पातदुर्धरो वारिसन्दोहः। तेन नैर्ऋतादिककोणमाक्रमणशान्तसमां भरेण झगित्येव सा तस्य नावतोऽनुवन्धादाभ्यामपि विच्छिन्ना शवाशिनो वैश्वानरी सृष्टिः । विदग्धवह्निशिखाङ्कुरक्षार्नां तथैव त्वरया विडम्बयन्भीषणाकारमेकं शिरसि शिखादण्डमिव मृत्योः, द्वितीयं कुलिशमिव सुरेन्द्रस्य, तृतीयं शृङ्गमिव कालमहिषस्य, चतुर्थं कोणमिव त्रिशूलस्य, पञ्चमं विषाणमिवाभ्रकुञ्जरस्य, षष्ठं कावचलितं चण्डिकादन्तमिवाञ्चलात्पतत्, दनुजदारुणाघातविघटितं नृसिंहनखरमिव मुष्टौ निवेशितं,

कलिन्दसुताकुक्षिपाटितोर्वीतटत्रुटितं सङ्कर्षणहलाग्रमिव वस्त्वन्तरेण स्थितम-पारपरुषताप्रचण्डमादाय मण्डलाग्रमसमखण्डनभराडम्बरप्रबलः प्रतिभटपला-यनाशङ्कयेव सुदूरमसिलतोल्लासनविसारिणा बाहुपाशेन रुन्धन्नाशामुखानि, उपरि परिसर्पता कृपाणदण्डेनार्गलयन्विहायसो द्वारम्, उदारदीपकालोकदीप्रया दृशा कुर्वन्सर्वतोऽप्युद्योतम्, उत्तालतुमुलेन किलकिलारावशिशिरेण विश्वगतं च लोकमुन्निद्रयन्, उदग्रपदपातदलितमेदिनीपृष्ठः प्रधावितो राक्षसः क्रोधानु-बन्धातिदुर्द्धरं प्रहर्तुम्। अथासौ सहसैव परं प्रहारव्यापारितो राक्षसेन खड्ग-स्तदुग्रकरमुष्टिबन्धाद्विघट्य राज्ञः प्रदक्षिणां कृत्वा पुरश्चरणयोः पपात। राक्षसो-ऽप्यत्रान्तरे संवृत्य सपदि सङ्ग्रामदारुणं स्वरूपम्, उपरचितकरसम्पुटाञ्जलि-रागत्य विनयादाजानुविनमितेन मूर्ध्ना प्रणाममकरोत्। अब्रवीच्च सप्रश्रयम्—अहो! सत्यमसुतः स्वरूपादवगतोऽसि यः किल जीव इव संसारशरीरस्य गीयसे, मुक्तामणिरिव ब्रह्माण्डशुक्तिसम्पुटस्य पठ्यसे, मृगनाभिनायक इव नरलोकव्यञ्जनये(नाय ?)निर्वर्ण्यसे, रत्नगुच्छ इव भूकल्पलतिकायाः श्रूयसे, माणिक्यबन्ध इव जम्बूद्वीपपदकस्य प्रतीयसे, स खलु सकलभुवनभूपाल-भूषणापीडचूडाग्ररत्नं प्रतिष्ठाननगरपरमेश्वरः कुन्तलानामधीश्वरो राजा मलयवाहनो भवान्। यस्य ते नामाक्षरस्तम्बः सदैवालापमालाग्रिमगुलुच्छ इव गृह्यमाणस्त्रिभुवनश्रिया सततमखिलब्रह्माण्डमण्डलोदरविहारलीलावि-शृङ्खलेन मया समन्तादयमेव सुभटगोष्ठीष्वयमेव शृङ्गारवार्त्तास्वयमेव कवीश्वरसभास्वयमेवाग्रगणनासु त्यागिनामयमेव नामग्रहेषु विदुषामयमेव प्रशंसासु क्षत्रियाणामाकर्णितो बाढम्। कस्यापरस्यान्धकभिदा देवेन वर्णित-पराक्रमं मामभिभवितुमीश्वरा शक्तिः, कस्य वाऽन्यस्य प्रभावमपहाय पपात पुरश्चरणयोरेवमसौ त्रैलोक्यविजयी मण्डलाग्रः, तदेष स्वयमुपढौकितान्मा स्वीक्रियतां कृपाणः, मुक्ता च तापसीयम्, इदानीमनुज्ञया भवतः व्रजामि निजमाश्रमस्थानम्, विरुद्धं तवाहममुना विप्रलम्भेन, कदाचिदवसरे यस्य-याऽपि कार्यमुपयुञ्जीत तत्राहमनुस्मरणीयः श्रीमता देवेनेति सानुनयमभि-धाय तूष्णीं गते तस्मिन्नुपजातकौतुको नरपतिरवादीत्—भोः! मनोनन्दि-वेषोल्लेखिना भवत्येव जायते मैत्री। तेनाद्य मे त्वा(णो ?)नुभावाद्भवानोऽसि निशान्तरधौरेय मित्रम्। अतो न नाम रक्षणीयं मनः स्वोक्तलापूर्णत्वे कथय को भवानद्भुतममुना स्वरूपसंरम्भेण न खलु यत्रासुरपौरुषं स्थानात्प्रमाति-मात्रगुणोऽस्ति राक्षसेषु कश्चित्, कस्य च वाऽयमासादितः प्रभावो मण्डलाग्रः,

किमिति चेत्थमतुच्छमनसाऽपि भवता कृपास्पदमारब्धेयं तपस्विनीत्यापृष्टो नृपेण सोऽब्रवीत्

कथयामि श्रूयतामुर्वी(पते !) प्रसिद्धैव भवतामस्तीह तोयधेर्द[illegible] परं कूलमलङ्कृत्य स्थिता सर्वतोऽप्युद्दीप्रकनकमयाशेषसृष्टितया [illegible] निर्गतस्यास्थानपदवीव वाडवस्य, वज्रिलूनपक्षस्य वज्रदहनविश्रान्तिरिव त्रिकूट[illegible]शैलस्य, हरजग्धनाराचदीप्तस्य प्रसूतिरिव त्रिपुरस्य, कनकमयपरस्य कोश[illegible] दक्षिणदिग्भागस्य, प्रलयपवनास्फालनत्रुटिता हेमाद्रिशिरःश्रेणिरिव [illegible] जगतः सर्वाणी भूतले, भूय(श्चि?) सौवर्णी त्रिभुवनश्रियः श्रियं [illegible] लङ्का नाम नगरी । यस्यामद्यापि दशकण्ठ[illegible] प्रलय[illegible]नवनाका[illegible] स[illegible] प्रविशन्ति । यस्यां च रावणेन [illegible] त्रिभुवनानां त्रिदश[illegible] कालिमानमावहन्ति मरकत[illegible] हर्म्येषु मणिकुट्टिमतलानि । या [illegible] दशानन[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । यस्यां च [illegible] [illegible] [illegible] [illegible] [illegible] त्रिभुवन[illegible] [illegible] रावणस्य [illegible] [illegible] [illegible] [illegible] । [illegible]

तस्याहं मातुलसूनुरनल्पेन च गृहीतः प्रेम्णा रावणक्रोधनिःसृतस्यापत्सहायः सहानुवर्त्ती हृदयस्य मायाबलो नाम। एकदाऽस्मत्स्वामी विभीषणः सह प्रणयिना लोकेन सुकेलिललितया सन्तिष्ठमानो गोष्ठ्या झटित्याकृतसत्वरमागत्य विज्ञप्तः प्रतीहारेण—देव कङ्कालको नाम कौणपः कुतोऽपि वेगादागतो देवेन सह दर्शनं निर्विलम्बमर्थयत इत्येवं निशम्य स्वामिना शीघ्रं प्रवेशयेत्यादिष्टो द्वारपालस्तथा कृतवान् । असावपि प्रविश्य कृतप्रणामो राक्षसः स्वामिन्नेकान्तसमाख्येयं कार्यमित्युक्तवान् । तथाऽस्मद्द्वितीय एव स्थिते राक्षसपतौ स खलु सङ्क्षेपतः कङ्कालको वक्तुमुपाक्रमत—देव ! तदा देवेन प्रेष्यमाणेषु प्रतिदिशमवनितलचारिषु चरेष्वहमप्युत्तरां दिशमुररीकृत्य निर्यातवानितः । तथा निर्गत्य चोल्लङ्घ्य लहरीविसारिशीकरनिकरान्धकारितदिवं महानदीं नर्मदामधिविष्टः प्रकृष्टं पत्तनेषु पल्लवितधवलध्वजाटोपं लडहलाटीकटाक्षैः, अलङ्कृतजनालापमालापभङ्गिभिर्विलासिनाम्, आश्रयं श्रीमतां भृगुकच्छं नाम नगरम् । तत्र चासीमरम्यतया निरुद्धहृदयोऽहं कियतोऽपि वासरानतिक्रम्य क्रमेणोत्तरापथवर्तिष्वशेषदेशान्तःपातिष्वनेकशोऽपि ग्रामपुरपत्तनाधिष्ठानेषु विचरन्कंसारिशैशवदशास्पदमागतो मथुरेति नाम्ना नगरीम् । तस्यां सहसैव परमागतेन मया भ्रातृयोगाद्विघटित इव मारुतिः, पुरुषरूपेण परिणत इवाञ्जनेयः, क्षत्रियकुलेऽवतीर्ण इव द्रौणिः, द्विभुजमूर्त्या प्रतिष्ठित इव कार्त्तवीर्यः, प्रधानः पौरुषेण प्रवीरो राजसूनुरेकश्चतुष्पथे प्रथीयसाऽनुबन्धेन खेलन्नसङ्ख्यपणितार्थदुस्तरं द्यूतमालोकितः कुमारकेसरी नाम । नाम च तस्यापरैर्द्यूतसहचारिभिरुदीर्यमाणमवबुद्धवान् । अस्मिन् सञ्जातकौतुकश्चाहमहो कुतोऽयमियन्तमसंभाव्यमिह खेलनायार्थं प्रस्तावयतीति नाथ ! यावदालोकयामि तावत्किमालोक्यते भुवनमप्यवीरं मन्यमानो यत्रैव कुत्रचिद्धनीयसि दुर्गमे चास्थानेऽस्ति द्रव्यं ततोऽसौ विघट्य हठादुद्भटं सुभटभुजपरिघसङ्कटमन्यदप्यचिन्त्यमन्तरायकारणमानयत्यर्थजातम् । न चास्ति तत्पौरुषस्य किमप्यसाध्यमगम्यं वा प्रायस्त्रिभुवनेऽपि । अनन्तरमुद्भूतविकल्पेन चिन्तितं मया—नन्वेष बलवानवश्यमनेन द्यूतसम्बन्धिना महारसेन साहसेन चामुनाऽध्यवसायडम्बरेण साहसेन च मरुतामपि त्रासकेन कनकार्थी मेरुमुत्पाटयति, रत्नेच्छया फणीन्द्रफणापटलमुद्दलयति, अर्थकामश्च गृह्णाति यन्दे कुबेरनाथम् । किन्नाम कपिमात्रकमेकाकी चाञ्जनेयः प्रखरदशकन्धरभुजापञ्जरगतामपि न लङ्कामा-

कर्णोत्कार, भीमश्च पतितो नागलोके विहत्य विश्वरूपिणीमाणयाम्भ-कुम्भकुम्भमण्डलीभेदेषु माणिक्यानि गृह्णाति । तदितो निर्गत्य मा पुनः समालोकयिष्यति मैथिलीं लङ्कामाक्रामत्यतः पश्यामि किमद्यतनः किमा-गमिष्यत इति यावद्वितिनो मन्त्रा नभसि पुनरनुगच्छामि तावत्तथैव संवृत्तम्। एकहेलयैव पञ्चाशतैकयोजनानि दक्षिणं दिग्भागमाक्रम्य निर्गतो नगर-द्वारान्तर्गतेति यावत्ते च गच्छन्ति नाहं त्वरितमेकस्य गुरुकितमस्य तेऽस्मि प्राविशत् । तेन च प्रयाणाद्दूरतरं प्रदेशमाश्रयः स च मम सम्भाव्य नामग्रहणो-त्सेनाकर्षीत् । भोः पिङ्गलक ! यस्मादहमितो दक्षिणेन सिन्धोः परकूलवर्ति-तमसमानुपपन्नतरं स्थानम्। अथेदमाकर्ण्य जगति भीतश्चाहम्—अये ! स एष मे महाप्रमाणप्रसादो विस्मयः । मन्यमेव लङ्कापुरनिवासी वीरोऽयम् । यथा रक्षसां पदमथ हाय लङ्कामितो दक्षिणे सिन्धोः परपारवर्त्ती कः किलामानुषप्रचारोऽस्त्य-परः प्रदेशो यत्रैव यास्यतीति निश्चित्य तेनैव मार्गेमहमप्यलक्ष्यवृत्तिना रूपे-णानुगन्तुमारब्धवान्। तथाऽसौ प्रबलवेगानुपातिना गतिक्रमेणाक्रम्य भुवं भूय-सीं प्राविशद्दक्षिणं देशम् । आसाद्य च मलयमण्डलमखण्डपटुभिः प्रयाणकैरा-याति तस्मिन्नुड्डीननिश्चयोऽहमहो सुदूरमेतावनीमवनिमुल्लङ्घ्य प्रवृत्तश्चेद्गन्तुं तदेष साधयिता लङ्कापुरस्येति चेतसि विचिन्त्य त्वरितमेव पुरः प्रधाव्य समागत-वान् । आख्यातश्च व्यतिकरोऽयम्, इदानीं देवः प्रमाणम्, स पुनरागतो बलीयान् पुरुषप्रवीर इत्युक्त्वा विरराम ।

ततश्च राजन्नेतदाख्याय स्थितवति कङ्कालके सहसैव परमक्षिपद्रक्षसा-मीश्वरः शङ्कितान्तःकरणतरलितं मदानने चक्षुः । अथाहमाशङ्कितं स्वामिनो हृदयमाकलय्य प्रणयादकृत्रिमेण वचसा विज्ञप्तवान्—देव किमिति शङ्कया मनो व्याकुलयसि । यद्यपि दुर्वारभुजपौरुषप्रसरो वीरलोकः स्वर्लोकमकिञ्चि-द्वियाक्रामति, मेरुं कसेरुमिवोत्खनति, पातालमालयक्रोडमिवाविशति, तथाऽपि न मे मायाप्रभावस्य प्रतिभटोऽस्ति त्रिभुवनेऽपि ।

योऽहं नाथ दिने निशां निशि दिनं चन्द्रेऽर्कमर्केऽपि च
प्रालेयद्युतिमन्धकारपटले तेजस्तमस्तेजसि ।
किञ्चाब्धौ स्थलमम्बुधिं स्थलपथेऽप्येवं करोमि क्षणाद्-
व्युत्क्रम्य विभ्रमेण झगिति त्रैलोक्यमन्यादृशम् ॥

तदेव प्रसीद मे प्रेषणादेशेन येन कङ्कालकसहायोऽहमन्तराल एव त-

मागच्छन्तमपहस्तयामीति विज्ञप्ते मया, स्वामी विभीषणो यथाऽभिप्रेतमनुतिष्ठतु भवानित्यादिदेश।

अथ सनाथः कङ्कालकेन तस्मिन्नेव क्षणे तस्याहमागच्छतो मानवस्य सम्मुखमुच्चलितवान्। अवाप्य च कियत्याऽपि च कालकलया मलयमण्डलमेकत्र महतो जीर्णवनगह्वरस्य गर्भे गलितघनतुलादण्डं चण्डिकाप्रासादमपश्यम्। आलोक्य तं नन्विह पुनरनाश्रयं काननमवेत्य कदाचिदसौ वीराध्वगो वसतये प्रविशतीति तमेवाश्रितवानस्मि। तत्र च देवीपदोपसेविना वेतालवर्गेणागत्य विधीयमानालिङ्गनकुशलप्रश्नादिसत्कारस्य तिष्ठतो मे झटिति परमसौ प्रहरमात्रायां रात्रौ "समागतो वीरः स एष इति" चाङ्गणकवर्त्यैव दर्शितः कङ्कालकेन दृष्टे च तस्मिन्नुदारमूर्तावुत्पन्नचमत्कारोऽहमहो स्तोकमिवायमाख्यातो राक्षसचरेण। स्वल्पेण पुनरीदृशा कियन्मात्रममी भीमादयो भटाः, स्वर्लोकसुभटेभ्योऽप्यवश्यमतिशेते। तदस्तु तावदपरामस्यैव चेष्टामदृष्टचरितस्य कौतुकेन सवेतालपरिजनस्तिरोभूय निभालयामि मुहूर्त्तमपीति सम्प्रधार्य तथा स्थितवान्। अनन्तरमसावपि प्रविश्यान्तर्नमस्कृत्य च देवीमागत्य बहिरेव मण्डपान्तरुपाविशत्। तथोपविष्टस्य च तस्याम्बरपथेन परमाजगाम विदितपूर्वश्चास्माकं कपालभैरवो नाम विद्याधरजन्मा कापालिकः। तेन हि प्रणयादापृच्छयमानः प्रवीरोऽसौ "मथुरापुरनिवासी राज्ञः कलिन्दकेतोः सूनुर्द्यूतव्यसनानुसारिणा द्रव्येण दुःस्थितः प्रभूतं काञ्चनमनन्तं च विभीषणस्य कोशाजातनादर्तुं हिरण्यपरिकरां लङ्कापुरीं प्रसाधयितुमुच्चलितो नाम्ना कुमारकेसरी" त्यादि यथावस्थमात्मानमात्मनोऽध्यवसायस्वरूपं चाख्यातवान्। उत्पन्नप्रतीतिश्चाहमहो साधु साध्वनेन परेङ्गितावगमकौशलेन। कङ्कालक! साधु त्वया लक्षितोऽयमिति रभसादभिनन्द्य तं राक्षसचरं सबहुमानमालिङ्गितवान्। इतोऽप्यसावुदग्रतद्विक्रमातिरेकपरितुष्टो महाव्रती झटित्याकृष्टिविद्यया दिव्यं कृपाणमानीय दत्वा चायुधकृते निरायुधाय तस्मै तथैव च स्वयमन्तरिक्षेण वर्त्मना निर्गत्य ययौ। सोऽपि राजपुत्रः करेकृतेन तेनासिना सह प्रविश्यान्तरायतनस्य स्थितो निद्रातुम्. अथाहमहो यादृगाख्यातस्तादृश एवायमसाध्यः सङ्गरेण। विशेषतः सहैतेनामुना कृपाणेन। यस्यास्य दृष्टिमपि वयमनीश्वराः सोढुम्। अतो नायं प्रयोजनायाऽस्मिन्निति वितर्कसमकालमुन्मीलितया धिया सह समये किमन्यदालोच्यते कृतव्यलकवानयं, तदलं मायादिना कृतेन कृतार्थ

प्रसाधायाम्येनमिति विनिश्चित्य तं देवीपरिग्रहं वेताललोकमेकत्र कितववृन्दतया निरूप्य वहिरान्धिकं द्यूतमुपक्रमितवानस्मि । द्यूतरसोल्लोलकोलाहलमाकर्ण्य चासौ तदेकपरतन्त्रचित्ततयाऽऽकृष्टो भटः सरभसमभ्यन्तरान्निष्क्रम्य सारयित्वा च रमणस्य कृते तं खड्गमखण्डितव्यसनः खेलितुमुपक्रान्तवान्। अहमपि मायया कङ्कालकं विमानीभूतमधिरूढो विहितविद्याधराकृतिरात्मानमन्तरिक्षादवतरन्तमुपदर्शयन्नागत्य तस्मिन्नुपाविशम् । लग्नश्च हारितार्थश्च तदेव तिरोभूतराक्षसाकारं कनकमणिविमानमाधौ विधाय खेलितुम्, अथ महारम्भवति प्रवृत्ते द्यूतस्य भरे तथा रचितवानस्मि मायया द्यूतं येन मे विपर्ययेण तस्यासिरागतो हस्ते तस्यापि विमानीभूतः पर्यवसितो राक्षसः । सिद्धसमीहितश्चाहमत्रान्तरे संवृत्य द्यूतमादाय च मण्डलाग्रं सोपस्करेण सह तेन वेताल कितवलोकेन तिरोभूतवान्। स तु लङ्कापुरगामी मनुष्यवीरो मानुषैरलभ्यस्य गगनचारिणो यानस्य लाभेन परितुष्टो विमानमित्यधिरूढः कङ्कालकस्य पृष्ठम्। तेनाप्यसावुत्पत्य सुदूरमम्बरपथेन नीत्वा मदुपदेशादेकत्र दुस्तराभोगभासुरे गरीयसि सागरस्य पयसां भरे क्षिप्तः। क्षिप्त्वा च पयोधिपातप्रसाधिते तस्मिन् लङ्कार्थपरिपन्थिनि क्षत्रियकुमारे विहाय मायामागत्य मिलितेन कङ्कालकेनानुगम्यमानोऽहमागतो लङ्काम् । आख्याय च वृत्तान्तमर्पितवानस्मि स्वामिनः करे कृपाणम् । अत्यन्तमुदितेन स्वामिना च विभीषणेन ममैवायुधकृते प्रसादाद्दत्तः । स एष श्रीमतामधीनो मण्डलाग्रः । तापसी चेयं किंजातिरिति न जाने । कुतोऽपि हेतोरस्मत्पुरे लङ्कायां वल्कलावरणगोपितेनात्मना प्रतिदिशमितस्ततो भ्रमन्ती सहसैव मे नयनगोचरीबभूव । दृष्टमात्रैव च मयि मदनार्द्रीभूय व्यापृता ।

तथाहि—

वल्कलपटावगुण्ठनपिहिताऽसौ तापसी मया दृष्टा।
कोशनिहितेव तन्वी खड्गलताऽनङ्गसुभटस्य ॥

किञ्च—

एषाऽनुमार्गमिह पर्यटनप्रयास-
भूरिश्रमाम्बुभरधौतशरीरयष्टिः ।
सद्योपिपायितजला मदनस्य हस्त-
भल्लीव मे झगिति हन्त हृदि प्रविष्टा ॥

ततश्चैवमवन्ध्यमकरध्वजकरायुधाघातबाधया विधुरीकृतो निरस्य नायकोचितं धैर्यमवधीर्य व्रीडामनुगन्तुमेनां प्रवृत्तवानस्मि। बाला तपस्विनी चासौ झटित्येव ततो नगरगर्भादुत्पत्य निरालम्बमम्बरपथेन निर्ययौ। मयाऽप्यये नियतमनयोत्पातविद्यया दिव्ययुवतिः काऽप्यसाविति विनिश्चित्य तयैवोत्पतनप्रक्रियया पृष्ठलग्नेनाऽऽरब्धा गृहीतुम्। एकत्र क्वचिच्चन्दनवनवलयपरिमलोपगूढगिरिनिर्झरतुषारनिकराञ्चितैर्वायुभिरनङ्गदहनोद्दीपनपटीयसि प्रदेशे मया मायामयं द्विजस्य रूपमाधाय वचश्छलेन छलितयाऽपि तयैव छलोक्त्या छलितोऽहमनया। निराकृत्य मां पुनरुत्पपात व्योमनि। रे प्रतार्य मां गता हताशेयमिति तत्कालमुत्थितमहात्विषा कोपानलेन झगिति पिङ्गलीभूतलोचनोऽहमाविर्विधाय तदेतदात्मनो नैशाचरं रूपमनुपृष्ठधावितः पलायमानामिमां विधृत्य सम्प्रतीह रावणो बलादनिच्छन्तीं सीतामिव प्रवृत्तो व्यापादयितुम्। अत्रान्तरे च जगदेकरक्षिता क्षत्रियवरिष्ठो झटित्येवाधिष्ठितः पुण्यैरमुष्या भवान्। भवता तु सह सङ्गरे न नाम शवपिशितपेशिकोत्कर्त्तनकर्मैकशक्तिः कर्त्तिकेयमर्हत्यायुधीभवितुम्। अतः स्मृतिमात्रोपस्थितिपटीयानेष संस्मृतो दिव्योऽसिः। असिरप्यसौ पूर्वमेव मे कथितवान् स्वप्ने यथा किल वैकुण्ठावतारे पुंसि व्यापारितोऽहमशस्त्रतया भवतो भविष्यामीति। अजानता च मया तदंशावतीर्णे त्वयि प्रयुक्तोऽनुकृतवानेषोऽपि यथोचितं पूज्येषु। तेन हि तवायत्तशक्तिस्तवैवायमर्पितः कृपाणः। व्रतिन्यामस्यां तु योषित्यनौचित्येन विपर्यस्य, त्रासेन वा दण्डधरस्य (भग)वतः, प्रबोधेन वा महतो विवेकस्य, वश्यतया महाशयस्य मनसो झटित्येकपद एवासौ विभ्रश्य गतवान् स तादृग्गरीयानप्यनुरागः। तद्भो वीररससिद्धिप्रसु(दित)दिगीशरसनाग्रफलकोत्कीर्णपरमपौरुषप्रशस्ते पार्थिवैकतिलक श्रीमन्नेष ते कथितो वृत्तान्तः। प्रहिणु यास्यामि सत्वरमिदानीमिति। अनुज्ञातो नृपेण स खलु शौण्डीरजन्मा निशाचरो झगित्येव सूरविद्रावितोऽन्धकार इव तिरोबभूव।

सा च तापसी निलीनकौणपभयादतिक्रान्तकम्पा व्यपगताशेषप्रस्वेदसंप्लुतिरुत्पन्नसुस्था सुस्थीभूतहृदयवृत्तिरनाकुलेन चक्षुषा सर्वाङ्गमुदीक्ष्य मेदिनीनाथं मुहूर्त्तमन्तर्मनस्येव निसृष्टार्थं विचिन्त्य किञ्चिदवाञ्चितया दृशा निक्षिप्तैः क्षालयन्तीव मृत्युमुखविनिर्गतं हृदयमविरलैरश्रुबिन्दुभिरभिभूयमानशब्दं रोदितुमारब्धवती। राजाऽपि तामवनतमुखीमवेक्ष्य तथा रुदतीमुद्भूतकरुणाञ्चितेन चेतसा चिन्तितवान्। हा हा कोऽयमस्याः क्रूरग्रहेण कौणपेन मुक्ताया वर्षा-

नक्षत्रवृत्तेरिवानिवारितप्रसरो नयनघनजलासारः । सहजोष्णश्चायमनया स्वहृदि पात्यमानोऽपि हृदयं मदीयमुत्तापयति । किमिदमस्मत्समीकसङ्कटावधारणेनार्द्रत्वमन्तःकरणवृत्तेः, उतस्विदात्मनोऽनुभूतमरणसामीप्याकृतभावनम्, आहोस्विदसमीहितमक्षतस्य रक्षसोऽस्य गमनं, किं पुनरप्रतिसमाधेयमुपजातं समयसपर्यादिषु स्खलितम्, अथान्यद्दुःसहमुदग्रदुःखानुस्मरणं च किञ्चिदापन्नमेतस्याः, क एष प्रकारः, किमिह कालानुरूपमुपयुज्यते वक्तुं, कथमेनामज्ञा(त)तत्त्वोऽहं यन्त्रपुत्रिकामिव रुदन्तीं निवारयामीति वितर्कजातमातन्वति नरेश्वरे समुचितावसरे कोविदाऽसौ तपस्विनीकन्या सहसैव नियम्य दुर्धराटोपसंप्लवं बाष्पवेगमावरणसमधिकेनोत्तरीयवल्कलस्यैव मृदुनाऽञ्चलेन मुखाम्भोजमपमृज्य निवेश्य च सर्वतः कुवलयदलकोमलं चक्षुरनुच्चमधुरया गिरा जगाद ।

प्रेतीभिर्म्रियमाणशोणितजलं निर्लूयमानामिषं
वेतालीभिरुपास्यमानमभितः कङ्कालरङ्काधमैः ।
अन्तश्चेदमुदश्चितानलचिताचुल्लीभिरुद्भासितं
पश्य प्रेतवनं महानसमिवामीषाममृग्भोजिनाम् ॥

अथवा महासङ्कुलसम्भृतपथापणं निवासनगरमिव भूतलोकस्य ।

तथाहि—

मौलौ बद्धाऽन्त्ररज्जुः प्रजरदजगरग्रन्थिगाढोग्रनाग-
त्वग्वासाः स्कन्धपीठे कृतमलघुदलं चास्थिदण्डं दधानः ।
फेत्कारैर्दत्तहक्कः सकलमपि कुलं कम्पयन् कौणपानां
वेतालस्तालदीर्घो भ्रमति पितृवने पत्तने दण्डपाणिः ॥

अपि च समन्तादिह प्रेतपरम्पराभिः परीतमूर्त्तयः शूलिकाशङ्कवोऽपि कङ्कालतामापुः, इह खलु विसर्पकानलमलीमसमौलयः शाखिनोऽप्युल्कामुखायन्ते, इहान्तः क्रोडासक्तान्तकौणपेन मुक्तफेत्कारमुखराणि नरकरङ्काण्यपि गा-
त्रमन्त्रलासयन्ते, इह हि शिखरदेशविश्रान्तकौशिकवृन्दकरम्बकुहुङ्कारभासुरा वटस्तम्भा अपि सिद्धतामुपनयन्तः, इहापि प्रबलपवनयोगिन्यश्चिताभुवनयोऽपि निर्वाणभूताः, इह कपालकोटरकुटीरकानुपङ्क्तिपिङ्गलावर्णगर्भिणीरसीमकिलकिलारवस्तैःस्वच्छन्दमूर्च्छन्तोऽपि भूतभावेन नन्दी, इहाप्युपरि परिनिविष्टनिशाकरनिर्मितनाकुनिर्देश्यशिलाऽपि विश्वापिकात्वेन परिणता ।

किञ्च—

दोर्दण्डोत्क्षेपवेगान्निजनिविडभुजश्रेणिनामान्यरन्ध्र-
स्थानेन्दोर्निर्यदन्धतमसमुद्गतरुन्धदन्तास्यमूर्धस्य पादैः (पादैः?) ।

कुर्वाणः स्वाङ्ग एव प्रगुणयति लयालम्बिनी गीतवाद्ये
नृत्यत्येषोऽत्र पात्रीकृतरुधिरसुरानन्दनीचः पिशाचः ॥

अत्र वा—

एकं कक्षान्तरेऽन्यत्पृथुनि करतले पश्य शेषं च मांसं
भृत्वा वक्त्रेऽपसर्पन् हठहरणपरैरावतो भूतडिम्भैः।
सम्भ्रान्तो याति रुद्धश्चलति करधृतः क्रोधतो हुङ्करोति
प्राप्तोऽङ्के कूर्परेण प्रहरति रसति न्यञ्चति प्रेतरङ्कः ॥

इतश्च प्रभूतवात्सल्यादुत्सङ्गमारोपितेन भूरिभिरभीष्टनरजङ्गलग्रासैरनेकशस्तर्प्यमाणेनापि निकामघस्मरतया डिम्भकेन झटित्येव कीकसैकसारे वपुषि ललतिपिशितवल्लूरशङ्कया ग्रासीकृतं चर्व्यमाणमजिनच्छटैकमाकर्षन्ती कुचमहो पश्य पश्यातिहास्यमसावुत्तानितमुखी सदन्तनिष्घर्षमुन्मुक्तपूत्कारं चाक्रन्दति प्रेतजाया। इत इतोऽप्यहह पिशाचेन यूना ज्वलतश्चितोदरादाकृष्टमीषदाप्लुष्टकुणपमेकहेलयैव संवीक्ष्य हर्षादारब्धकहकहारावमुखरमुदञ्चितकर्त्तिकमुत्तम्भितकपालमुत्तालवेगं च साकाङ्क्षमेकतो जरत्कङ्कालचक्रम्, अन्यतः प्रेतसङ्घातः, अपरतो वेतालवृन्दमुद्भटं च, परतो भूतरङ्काणां कदम्बकमेतदेतदायाति दारुणारम्भनिर्झरमालोक्यताम्। कियद्वा प्रलयकालोपसंहृताशेषनरकरङ्कसङ्कुलितमर्त्यलोकानुकारिणः सर्वतोऽप्यशुभबीभत्सदर्शनस्य स्वरूपमाख्यायतेऽस्य महीयसः श्मशानवलयस्य महतामधिष्ठानं हि प्रकृष्टरिष्टानामेतत्। तदेतदहो कल्याणिन्न खलु निखिलमङ्गलोपकरणनिर्मितैकमूर्त्तिना लक्ष्मीसङ्क्रमणसुभगेन भवता स्थिरमेव स्थीयमानं बुध्यामहे इत्याप्तोपदेशपेशलमभिधाय तस्थौ।

राजाऽप्येतदाकर्ण्य ननु भद्रमसौ ब्रवीति येनात्र सर्वतो जरद्भूतरङ्कोपचर्यमाणातिथिरकुथितकुणपगलजङ्गलोग्रगन्धदुर्विषहः प्रतिपथमापानकरसोत्सवनिविष्टकटपूतनाऽवलिकलितकपालकर्परोदरनिर्धीयमानधाराग्रनिर्गताविरलवसाशीकरनिकुरुम्बवाही ज्वलदमितचिताहुताशनशिखोद्गीर्यमाणगुरुधूमधोरणीसमृद्धः प्रसर्पत्येष सन्ततमसेव्यो व्यसुवनसमीरणः। स्फोटयन्ति च विशन्तः श्रुतीन्द्रियममी प्रकामडामराः प्रमुदितापारफेरवसमाजैरुदीर्य(माण)मांसलारसितमालिनो निष्ठुरा ध्वनयः। तन्ममाऽप्येतन्मतं यदितोऽपसृत्य प्रशान्ते क्वापि तपोधनाश्रमे सगौरवमवस्थानेन स्वस्थां विधाय विस्त्रब्धमेनां काऽसौ कस्यासौ कुतोऽसौ किमर्थमसौ लङ्कां गतेत्यादिकमशेषं व्यतिकर-

मादितः पृच्छामीति चेतसि विनिश्चित्य मानयन् सदैव देवतावर्गमभ्यग्रवर्तिनीमधिष्ठात्रीं च तस्याः श्मशानभुवो भगवतीं भीषणेत्यभिधानवतीं दुर्गामग्रतो भूत्वा फालाग्रमिलितकरसम्पुटाञ्जलिः स्तुत्या प्रणनाम ।

विद्युत्पुञ्जोग्रनेत्रं पृथुचपलललज्जिह्वमुत्कर्तगल्लं
ग्रस्ताक्रान्तोदग्रदंष्ट्राप्रकटमसरलस्थूलपिङ्गोर्ध्वकेशम् ।
वक्त्रं कल्पान्तकालप्रचलघनघटाघोषघोराट्टहासं
चण्ड्याः स्वर्गादिवर्गग्रसनरसकपर्दान्तदण्डं नमामि ॥

कृतप्रणामश्च देव्याश्चलत गम्यते यथोचितमाश्रमस्थानमित्यन्तरत्यन्तशुद्ध्या सूक्त्या प्रवर्त्तितचेतसं तामग्रतः कृत्वा वृत्तान्तबोधेच्छुः कुतूहलादाहितगतिवेगः क्षणेनैव निर्जगाम तस्मादमङ्गलभुवः श्मशानात् । नगरगर्भमासाद्य च मनोविश्रम्भवसतेरासाद्य विश्वभूतिरितिवृद्धतपसस्तपस्विन्या मठं जगाम ।

तस्मिन्मध्यनिशामतीत्य सहसैवायातमेकाकिनं
सा राजानमुदीक्ष्य तच्च वनितापात्रं तपोलङ्कृतम् ।
कस्मादेष किमत्र भूपतिलकः का तापसी चेयमि-
त्येवं विस्मयमागता भगवती चक्रे तयोः स्वागतम् ॥

नृपतिरथ वितीर्णातिथ्यया विश्वभूत्या
विजनरजनिचर्यां तापसीं चानुपृष्टः ।
अकथयदखिलाभं राक्षसाद्रक्षिताऽसा-
विति च निजकथां(तां) सि(द्ध)सारस्वतश्रीः ॥

इति कायस्थकविसोड्ढलविनिर्मितायामुदयसुन्दरीकथायां
तापसीरक्षणं नाम सारस्वतश्रीपदाङ्कः
पञ्चम उच्छ्वासकः ॥

षष्ठ उच्छ्वासः ।

ततस्तथैव च क्रमेण परिणतेऽपि मध्यरात्रापवर्त्तनक्षणे कौतुकभरादुत्सुकोऽसौ दृशैव भगवत्या विश्वभूतेरनुमतिमादाय मेदिनीप्रभुरभिमुखीकृतया स्वयमभ्यागतोपहारपङ्कजदलमालयेव विशाललसितया दृशा सम्भाव्यमानमहसं तामभिनवागतां तापसीमुवाच—नन्वसामान्यशीले ! साधुपथप्रचारिणि !

 ५ ! कथय का त्वम्, कस्य कुलं विष्णुवक्षस्थलमिव कौस्तुभं वृत्तविमला

भूषितवती, किमभिधानाऽसि, किमर्थमिदमभिनवा लतेव जटावल्कलग्रहणमकार्षीः, अवतीर्णाऽसि कस्मिन्नपि लोके, नगरं च कतममध्यासिताऽसि, किमिति च भवादृशामनुचितप्रचारमसृग्भुजामास्पदं लङ्कां गतासि येनैवमस्य दुरपसदस्य पतिताऽसि गोचरे रक्षसः, किंहेतुश्चैष ते मद्दर्शनेन शशिमयूखयोगेनेव नयनेन्दुरत्नविगलितो वारिप्लव इति सर्वमशेषतोऽपि ज्ञातुमीहते कुतूहलप्रेरिता मन्मनोवृत्तिः, अद्याऽपि यामिन्यपि महत्येवाऽऽस्ते, तदत्वरितमावेद्यतामित्यादि पृष्टा मनुजपरमेश्वरेण सा सहर्षमुपदर्शितप्रश्रयं च सरभसमभाषत। कल्याणिन्! इयमनणीयसी कथा नूनमपृच्छतोऽपि ते कथ्यते, किं पुनः प्रश्नाभिनिविष्टचेतसः, तदङ्ग दत्तावधानमवधार्यताम्। जानन्ति भवन्तोऽपि यथा किल सकलेषु सारतया प्रसिद्धो भुवनसन्निवेशेषु, स्फारो विभूतिभिः, अपारः प्रथितसुखोपभोगविभ्रमेण, सारः सहजहर्षोपशालिना विलासिलोकेन, सर्वतः स्फुरत्पन्नगफणामणिप्रकरैर्विश्रान्तरत्नमूलोद्देश इव संसारसागरस्य, खनिप्रतान इव ब्रह्माण्डरोहणस्य, वुध्नबन्ध इव त्रिलोकीकल्पलतिकायाः, मूलदेशमासेदुषा कूर्मराजेन सञ्जातशिलानिवेशः प्रथमभूमिकाभोग इव विश्वमहाप्रासादस्य, दूरमुद्दण्डकायकाण्डेन प्रसरता वासुकिफणासहस्रवलयेन विलसितैकातपत्रश्चक्रवर्त्तीव भुवनवर्गस्य, वलभिदाहतानां शरणत्वेन विख्यात इत्याश्रितो दैत्यैः, अनन्यसदृशीं सौन्दर्यमुद्रामुद्वीक्ष्य मा विषादमेष्यत्युपरिवर्त्ती स्वर्लोक इतीव प्रसारिणा स्थगितो भूवलयफलकेन, विभूतिविजिताखिलजगत्तया कीर्त्तिकाम इवोत्तम्भितजयस्तम्भः क्षितिधारिणा शेषेण, तपनप्रचारविरहितोऽपि सञ्चरद्भुजगराजपुत्रोत्तमाङ्गमणिमयूखवलयैरुद्गतानेकरविमण्डलः, निधीनामास्पदं रसातलमित्यनङ्गेन निक्षिप्ताभिः सहजशोणयाऽधरश्रिया सिन्दूरमुद्राङ्कितमुखीभिः स्वसर्वस्वकलशीभिरिवाभिरामगर्भैः कुम्भीनसपुरन्ध्रिकाभिः, उभयभुवनभरोद्वहनाय दत्तस्कन्ध इवाधिष्ठितोऽपि मूलमुपरिभृतो भव्यतया, जगतामतुल्यगुणयोगिना प्राणिवर्गेण संभृतोऽस्ति संसारफलारामः पातालनामा तृतीयो लोकः।

यस्मिन्नत्यन्तविततेषु प्रधानेष्वष्टसु नागकुलेषु लब्धप्रसूतयः सहजशौण्डीराः प्रभूतबलशालिनः स्वेच्छारूपधराः त्रिष्वपि भुवनेष्वनवरुद्धगतयः प्रभाविनः प्रचरन्ति भोगिनो लोकाः। ये तावदात्मनां दिव्यमभिरामावयवसुन्दरं कान्तरूपं, इतरमपि सरलकीटकप्रायमाकारमधिनिष्टम्भस्त्रैलोक्यगुरुणाऽपि महेश्वरेणात्मनोऽलङ्कार इत्यङ्गीकृत्य गौरविताः; विक्रमे तु किमुच्यते तेषां यन्नु-

लफणाफलकडम्बरेण हरनयनदहनदाहोपशान्तये जनितजलधरवितानको मकरकेतुरिव निरातपं लोकमध्यासितः, सरसनलिनीदलातपत्रपरिशोभितो वरुणराज इव तलगतमधिष्ठातुमुद्यतस्तोयं, घनदलतमालशेखरो विन्ध्य इवागस्त्यमुनिवञ्चितत्रपया पातालमधिष्ठितवान्, उपरि प्रेङ्खता प्रसरदुरुफणामण्डपमणिकिरणचक्रेण शिरस्युदितभानुरुदयशैलाधिपुरुष इवाहिभुवनेऽपि प्रचारयितुमर्कमायातः,प्रणामघटितेन स्वच्छतरभूतिसम्पर्कपाण्डुना चण्डीशचरणरेणुकणिकोत्करेण प्रत्यहं भरितशेषाक्षतपवित्रमस्तकः, तारुण्यतरलिमोत्तालनललितपातालकामिनीकटाक्षचयचामरोपवीज्यमानमूर्तिरपमितपराक्रमो वन्द्यः काकोदरभटानां, मान्यो गीर्वाणवर्गस्य, मित्रं त्रिविष्टपस्य भर्तुः, आप्तः पातालनायकस्य वासुकेः, चराचरगुरोश्च भगवतः प्रियसेवकः शङ्करस्य, महीयसि महात्मनः शङ्खपालस्य कुलेऽवतीर्णः क्षत्रियमहान्वयोद्योतमाणिक्यं राजा राजशौण्डीरः शिखण्डतिलको नाम ।

येन हि निसर्गजलयोगसौहृदात्पयोधिपक्षपाती तदङ्गमथनविन्यस्तमन्दरगिरिभ्रमोपयोगरज्जुतारूपमपकारमनुस्मृत्य वासुकेः प्रकुप्यत्कूर्मराजः सपदि प्रतापसङ्कोचितकटाहकर्परः पराहतशक्तीकृतश्शङ्के नचेज्जगत्त्रयोद्वहनमहाशक्तिना तेनादिकूर्मेण तादृगम्भोधिपक्षपातविपर्ययिणः कोपात्कटाहपिठरैकपालीस्पन्दनमात्रकेणैव क्षणादेतद्फणीन्द्रमपाताललोकं च कृतं भवेद्विश्वम् । तथा च यस्य भुजयोरवष्टम्भेन पृष्ठतः पातालरक्षानुचिन्तामपहाय पन्नगानामधीश्वरो वासुकिरनाकुलेन मनसा देवस्य कैलासवासिनो धूर्जटेरापीडसंयमोपकरणभावमालम्ब्य सुरसिन्धुसलिलशीतलोद्देशिनि सदैव जटावने विलसति । तस्य चास्ति सम(स्त)क्षत्रियाणामलङ्कारतिलकस्य प्रेयसी निजस्यैव विजयकमलेव मण्डलाग्रस्य, भूरिव भुजस्य, लक्ष्मीरिव वक्षसः, सरस्वतीव वक्त्रस्य, आज्ञेव भ्रूलताग्रस्य, वीरश्रीरिव पराक्रमस्य, कीर्त्तिरिव गुणकलापस्य, बुद्धिरिव व्यापारस्य, नीतिरिव व्यवहारस्य च, प्रणयिनी हृदयस्य, सुवंशप्रसवतया मुक्तेव सुवृत्तनिर्मला, संश्रिता यौवनेन, परिता रूपेण, परिगता लावण्येन, सन्दृब्धा सौभाग्येन, विनयवती यशोवती सकललक्षणवती च धर्मसहचारिणी प्रधानान्तःपुरपुरन्ध्रिषु विजयरेखा नाम । तस्याश्च पतिरेव दैवतं योषितामिति तदङ्घ्रिसेवानुपदान्मिलितनखमणिहृद्यान्तःकिरणवारिणि मज्जनविशुद्धेन चेतसा सतीव्रतमाचरन्त्याः सततमुल्लसितनेत्र-

नलिनोपहारैस्तदङ्गपूजाविपञ्चनेन प्रसन्नाभिरिव देवताभिः प्रदत्तममूदेकमत्यन्तसुकुमारतया कटाक्षटङ्किकाभिरिव घटितं परमेष्ठिना, नाभिकमलपरिमलक्षोदैरिवोद्वर्त्तितमुपेन्द्रेण, मौलीन्दुकिरणेनेवापमार्जितं पुरजिता, निजशरप्रभावेणेवाधिष्ठितमनङ्गेन च, त्रिभुवनैकसारमुदयसुन्दरीतिनाम्ना पुत्रिकारत्नम्।

यदीयेषु प्रथममेव तावज्जन्मनो महोत्सवशुभेषु षष्ठीजागरणकृते सूतीगृहे द्वारि वाद्यमानघटध्वनितकैतवाल्लब्धजगज्जयाश इव सङ्कल्पजन्मा भुजप्रकोष्ठमसकृद्दरवाटोपमास्फोटयाञ्चकार। माणिक्यमणितोरणावचूललम्बिताश्च ललितगलकन्दलविलासवासोचितावतीर्णपात्रप्रमोदेनेव सुदूरमुद्यतकराः प्रविशदन्तःपुरपुरन्ध्रिकालाङ्करचामरसमीरचलिताङ्गवल्गितैरुदर्गलं नृत्यन्तिस्म मुक्ताकलापयष्टयः। पुरतोऽपि नामकरणादिषु सर्वेष्वपि मङ्गलोत्सवेषु दिष्टिवृद्ध्यर्थमधिभवनमवकीर्यमाणामन्दसिन्दूरधूलिभिरधिकाधिकं पुरस्य पल्लवितं हृदयरागेण। सा च मुरजितोऽवतारस्य पुंसः करे लगिष्यतीति गणकैरावेदिता निर्वाणमिव योगिना, सुचरितमिव सज्जनेन, व्रतमिव तपस्विना, धनमिव कदर्येण, जीवितमिव कातरेण, प्रतिदिवसमुपोढया प्रीत्या पितृजनेन पाल्यमाना वत्सरपरावृत्तिक्रमेण निजसमयसमग्रिमप्रगुणमनणुलावण्यलिप्ताङ्गभूमिकमुन्मिषितत्रिवलिललितरङ्गावलीकं उपरि परिभ्राजमानकुचकलशमनङ्गस्येव कृतप्रथमप्रवेशं मङ्गलोपचारं, चन्द्रलेखेव वर्षात्ययं, माणिक्यदीपिकेव शाणनिकषम्, अम्भोजकलिकेव विलासं, लेख्यपुत्रिकेव वर्णकन्यासम्, आदर्शमूर्तिरिवोद्वर्तनं यौवनमाससाद।

यस्मिन्नुरोजकलशाङ्कितवेदिकायां
तस्यामभूदभिनवं मकरध्वजस्य।
राज्येऽभिषेचनमतः खलु सम्प्लुताऽसौ
सर्वाङ्गमुल्लसितकान्तिजलप्लवेन॥

ततश्च—

चपलालोकधारिण्या प्रावृषेव निरन्तरम्।
भृता तारुण्यलक्ष्म्याऽसौ लसल्लावण्यवाहिनी॥

तथा हि—

लावण्याम्बुभरे स्मरस्य वहतः पार्श्वादिव प्रच्युत-
स्तस्यां स्वैरमितस्ततः परिकरात्कोऽपि क्वचिल्लग्नवान्।
पत्राङ्को मकरः कपोलपुलिने दृग्रूपिणो मार्गणा-

स्तीरेऽपाङ्गभुवस्तथाऽलिकतटे भ्रूव्याजमिष्टासनम् ॥

अथ तथा नवत्विषा तारुण्येन वितीर्णकान्तिसौन्दर्यसम्पदमुदीक्ष्य दुहितुः पिता चिन्तितवान् । ननु यथेयमेवमुन्मीलिताप्रतिमरूपसारा कुमारी तथा यदि कथञ्चित्पातालभुवनस्य राजा वासुकिः पश्यति, दृष्ट्वा च झगिति गच्छत्यभिलाषम्, अभिलष्य च भरादर्थित्वमुपदर्शयति, दर्शितार्थिभावश्च प्रेम्णा पीडयति, तदा नूनमलङ्घ्यत्वात्स्वामिवचसाम्, अप्रतिकूलत्वादासवृत्तेः, प्रार्थितार्थसम्पादकत्वाच्च दानधीरस्य, न नाम धर्त्तुमुपयास्यति, न वेदग्रम्यरूपानुरूपं वरमपहाय कन्यकेयमननुरूपस्यास्य भुवनैकचक्रवर्त्तिनोऽपि शक्यते दातुम् । अतस्तथा क्रियते यथाऽसौ नास्य नयनयोः पथमुपैति श्रुतेर्वा गोचरीभवेदिति विचिन्त्य विहाय पातालं कृते तस्यास्तरलवेलाजलोर्मिजनितसङ्घट्टविघटितानेकशुक्तिमुक्ताफलप्रकरैरलङ्कृतक्रीडागिरिकिरीटिनि प्रतिप्रदेशमुद्भिन्नविद्रुमवनोद्गच्छन्मरीचिमण्डलारुणिमरमणीयपरिसरे सरसकर्पूरभूरुहामोदसुन्दरोद्यानराजीविराजिनि विसारिण्येकतः समुद्रस्यान्तरद्वीपके सकलसुखानुकूलपरिकरं कन्यावरोधमुपकल्पयामास। तत्र च ब्रह्माण्डगर्त्तोदरनिधानकलशीव सर्वतोऽपि रक्षकैरधिष्ठिता कञ्चुकिभिः सा नाम कन्यका निकामचतुराभिरनेकसङ्ख्यया सखीभिरनुकूल्यमानान्तःकरणवृत्तिरवस्थितिं चक्रे ।

तदीयपितुः शिखण्डतिलकस्य च नितान्तमाप्तस्य प्रणयिनः पद्मकुलाभरणरत्नस्य रत्नमौलिरितिनाम्नाप्रसिद्धिमतः सेनाधिनायकस्य वेणीमतीति जायायां सुता जन्मन्यपि निरपत्यतया बहुमता मनोवृत्तेरभूदेकैव पुत्रिका । सा चाहं तारावली नाम समवयःशीलतया परमं विस्रम्भमन्दिरमाचलनजल्पनशीनवासरादखिलबालखेलनप्रकारसहकारिण्यसृवननिर्मेयन्ती सखीपदे तस्याः । अनन्तरमसावनल्परूपाऽभियाच्यमाना क्षत्रियैः, अधिरूढयौवनेति चिन्त्यमाना पितृभिः, अभ्यर्थितेत्यनुमोद्यमाना बन्धुभिः, अनङ्गस्वीकृतेति प्रवर्त्यमाना सखीभिः,प्रतिदिवसमहोपयोपिद्भिर्वार्त्तया निवेदितानालेख्यपटदर्शितान्प्रत्यक्षीकृतानस्तोकरूपानाविर्भावितगुणानङ्गनचरित्रानुदर्शिनाधिपत्यमलोभान् क्षत्रियकुमारकांस्तृणमिव गणयन्ती, त्रिभुवनविहारिणो विद्याधरानपि तृणतुल्या विभावयन्ती, मन्मथादिचित्ररूपचित्रादपि दृशं निवर्तयन्ती, नितान्तमुद्वासयामास पितरौ । केवलं मया सह पुरुषदर्शनद्वेषिणी विचित्रपत्रच्छेदविद्यया नक्तिरचित्रालेखनविवादविघ्नैरनघुवीणावेणुवादनैरमन्दकन्दुकक्रीडाभिरान्वि-

तत्र चालोकनेन झगिति शृङ्गारपल्लवलतायां तस्यामनङ्गधनुर्लतोड्डीनः पपात विसरः शिलीमुखानां, शिलीमुखपटलपातादिव सर्वाङ्गमुत्पन्नवान्कम्पः, प्रकम्पचलनादिव व्यगलदाजलबिन्दुकायः कुसुमसन्दोहः, कुसुमभरनिर्भर-भ्रंशादिवाजृम्भत रोमाञ्चकेसरसखः स्वेदोदकच्छद्मा मधुरसप्लवः । क्षणेन च तस्याः सरभसं हृदि प्रविशतो रागस्य दत्तमार्गतया झगित्यपसृतेव पुरस्तादा-कम्प्रकुचशिखरतरलिता बभूव तिरश्चीना हारयष्टिः, झगित्येकहेलयैव प्रविष्टं रागमालोक्य मानसात्परपुरुषसामीप्यद्वेषिणी कुलपालिकेव निःसृत्य गतवती व्रीडा, उज्झितं शून्यमास्पदमिति पृष्ठतो रक्षक इवाध्यतिष्ठदुन्मादः, प्रविश्या-न्तर्मनसि सन्धुक्षतो मान्मथं वह्निमुन्मादस्य परुषफूत्कारपवनदण्डा इव नवो-ष्णप्रसृतयः सततं निःसर्तुमारभन्त निश्वासाः, प्रचण्डदवथुदावानलज्वालिनि सरलनिश्वासारण्यसङ्कटे मुखकमलपरिमलोपलोभादन्धीभूय निपतितं प्लुष्य-माणमलीनां दूरमाचक्रन्द वृन्दम्, इन्दिन्दिराक्रन्दकोलाहलनिवेदितेन मदनहु-तभुजा लग्नप्रदीपनकादन्तःकरणमन्दिराद्हाहभीतमिव निर्जगाम धैर्यम्, धैर्या-नुमार्गमसमरोमाञ्चसूचिकाग्रभेदैरुद्भूतगुरुव्यथानीव स्वेदवारिप्लुतानि प्रणश्य ययुः कपोलयोः पत्रहंसमिथुनानि ।

किञ्च—

मनस्तदीयं पुरुपापरागव्रतेन सन्त्यक्तमिवाङ्गजन्मा ।
हर्षाज्झगित्युज्झितलिङ्गभेदभीतिर्निशातैरिपुभिर्विभेद ॥

ततश्च—

तद्दृष्टिरिष्टार्थदरिद्रतोरुक्षुधेव रङ्कत्वमनुप्रयाना ।
आस्वादयन्ती सुचिरादवाप्य रूपामृतं तत्र न तृप्तिमेति ॥

अथाहमपि तथाऽवलोक्य ताम्, अहो चिरादेनदालेख्यस्थानमासाद्य लब्धवानमुष्याश्चेतसि लक्ष्यमिक्षुकोदण्डपाणिर्मकरकेतुः, किन्तु त्रिदिवसद्म-नामधनिवासिनामुरगलोकवर्त्तिनां वा नूनामन्यतमः कोऽयमित्यजानन्ती निर-न्तरलाभशालिनोऽस्य चित्रस्यापि दर्शनेन पदेवमङ्गीकृता मन्मथेन, प्लाविता शृङ्गाररसेन, विधुरिता हृदयेन, समुज्झिता सुदूरमिन्द्रियैः, अवष्टब्धा प्रेमपरव-शतया, वशीकृता सपदि विस्मयेन, समालिङ्गिता गाढमुत्कण्ठया, न जाने कथ-मियं भविष्यति, कियच्चिरमस्मान्क्लेशयिष्यति, कीदृशी परिणतिरिह सम्पत्स्यते, किमनुचिन्तयिष्यति माता, कीदृशं कृत्वा मंस्यते जनकः, किमालोचयिष्यन्ति

गुरवः, परिजनश्च किं वक्ष्यति, भवतु वा प्रमाणमिह पुरातनं कर्म, तदायत्ता हि गतयः कार्याणाम्, अपौरुषेषु विधिव्यापारेषु यद्यथा निष्पत्स्यते तत्तथैव ज्ञातव्यमिति विनिश्चित्य कालोचितमब्रुवम्—

देवि! निश्चितं नाभिकमलकौस्तुभादिलक्षणविसंवादान्नैष भगवानुपेन्द्रः, नापि च मकरेक्षुचापपरिकराभिज्ञानशून्यतया देवो मनोभवः, कश्चिदन्य एवा· यमवैमि देव्या मतेन, तत्खलु वृथीभूतमनयोरपि पणेन विसृज्यतामिदं किन्न· रद्वन्द्वकम्। यदि च प्रत्यक्षालेख्यवार्त्ताभिरुपलब्धाशेषसुरसिद्धविद्याधरोरग· नरेशरूपस्वरूपं हृदयमपूर्वाकारमेनमेव बोद्धुमाकांक्षति तदुत्थीयतामितः, सा· वकाशं प्रविश्यतामन्तः, तत्र च रहसि निराकुलीभूतेन चक्षुषा चेतसा च तावन्निरूपयतु देवी, यावज्जानाति योऽयमिति। अत्र तु झगित्यज्ञायमान एव कोऽपि कथञ्चिदागतस्तवेत्थं कम्पमानाः पृथुलपटभराक्रमणेन नलिनदलशि· खरसुकुमाराः कराङ्गुलीः ग्लाप्यमानं च निश्चलासनपरिग्रहश्रमजलेन प्रयास· निस्सहं शरीरमालोकयति कुलवृद्धस्तदेतदवधारयन्नङ्गपरिक्लेशनस्खलितं निता· न्तमुत्कुप्यति सर्वोऽभ्य इति मया प्रोक्ते देवी नियतमेवमुपरचितालाप(व)क्रि· मप्रपञ्चया लक्षिताऽहमनया धूर्तयेति सस्मितमतिस्तोकमपाङ्गोत्सङ्गसञ्चारतरलि· ताक्षिविभागमवलोकनेन हृदयं निवेद्य दत्वा च मत्करे तं पटं विसर्जितपरिजना समुत्तस्थौ।

उत्थाय च प्रविश्यान्तरध्यासिता मरालतूलकोमलं तल्पमादाय भूयोऽपि मत्करतलात्पटमवहिर्नीकृत्य मां कृतादरमपृच्छत्—वयस्ये तारावलि! जानासि क एष दृष्टः कुतश्चिदन्यत्र प्रत्यक्षमालेख्येन वा, त्वया हि बहुशश्चित्रेण वर्त्तिता दृष्टाश्च त्रिभुवनविवरवर्त्तिनो युवानः, तेषां मध्ये कश्चिदमुना रूपेण संवित्ति· मेति भवत्या हृदयस्य, कथमसौ ज्ञातव्यः, कथञ्चान्वेषणीयो विसङ्कटाभोगदु· र्विगाहेऽत्र त्रिभुवने, कथं किल दृष्टिविषयमेष्यति, कन्दर्पकुहकश्चायं दुरात्मा मुद्दलितमां दीपहरिणीमिव मूर्त्तिमुपदर्श्य मे झगित्याजहार कृष्णसारं लोचन· नन्दम्, अतिव्यथं प्रचलत्कम्पं मानसम्, इदानीं कथय किमेवंगते प्रतिविधेय· मिति प्रोक्ताऽहमतो न नूनमवद्यदर्शनवचसामन्यदाश्वासनममुष्यास्तथैव स्थिरयामि विधुरितामनङ्गेन स्वामिनीमिति प्रत्यवोचम्—

देवि! स्थिरीभव, धीमतां किमननुकूलमन्तःकरणस्य, किमगम्यं मर्त्यानां, किमसाध्यमध्यवसायस्य च, किन्तु त्वमेवमशरीरिणाऽपि मन्मथहतकेनाभिभू·

यमाना मा तिष्ठ, भव प्रगाढहृदया नूनमेतद्दर्शनविनिश्चयेनेति प्रबोधिता मयाऽसौ सहेलस्मितमनीश्वराऽस्मि प्रियसखि मनोवृत्तेः, अन्वेषणे च पुनरस्य भवती प्रमाणमित्युक्त्वा दीर्घं च निःश्वस्य तूष्णीमकरोत्। ततः प्रभृति च तस्यां मनःप्रस्खलितेनेव विश्रृङ्खलायते मन्मथग्रहः, स्मरशरनिकरनिकृत्त्यमानेव तनूयते तनुः, रनवरतनेत्रवारिधाराभिरिवोपचीयते रणरणकरसः, स्वप्नसंवृत्तसकलतद्दर्शनादिवृत्तान्तवार्ता एव जल्पनं, चित्रपटनिरूपणमेव व्यापारः, प्रसरदाशाविनोदिन्यो मनःप्रवृत्तय एव सख्यः, तत्सङ्गमनोरथा एव लीलोपकरणानि, कुसुमशरविकारा एव क्रीडितम्, अनङ्गदहनपीडोपशान्तिसज्जितः प्रचुरजलार्द्रोपलेप एव विभ्रमविलेपनम्, स्वेदहरकर्पूरविरचनोपचार एव पत्रवल्लीविलासः, सरसविसप्रवालवलयादिविन्यास एव भूषणानि, कमलकैरवोपयोगप्रकार एव कुसुमस्रजः, कदलीदलव्यजनवायुरेवनेपथ्यम् ।

किञ्च—

अनङ्गसन्तापदशामहापथे
समुद्यता गन्तुमनिन्दितोदरी ।
अतः करन्यस्तमृणालकङ्कण-
च्छलेन शार्ङ्गं वलयं बभार सा ॥

अपि च—

तस्या वियुक्तहृदयाहतिपातकेन
लूताक्रमित्वमगमद्ध्रुवमङ्गजन्मा ।
शैत्यावलम्बविससूत्रमिषादमुष्य-
स्तेनैष तत्र वितरन्नवतन्तुजालम् ॥

किं बहुना—

लावण्यवारिसरसि प्रसभं तदङ्गे
पङ्कमनङ्गदवथुर्निरदापयते स्म ।
तेन स्फुरन्त्युपरि सन्तटिनावकीर्ण-
राजीविनीदलमृणालसरोरुहाणि ॥

चिन्त्यैतदेवालम्बनं प्राणितस्य: यदसौ मदनमदविमोहिता त्वन्मयेन चेतसा सर्वमपि स्पर्शं त्वदालिङ्गनमाकलयते, सर्वमपि दृश्यं त्वदाकारपरिणतं पश्यति, सर्वमपि जल्पितं त्वत्प्रणयसन्देशानिति, सर्वमपि ध्यानं त्वदायत्त-

वाणीभिया शृणोति, एवमसौ मन्मथविजृम्भितेन कशीकृता सन्नीरणेन निमित्तवन्धेन शकुनलाभैर्दृढीकरणेन समन्ताद्दुपश्रुतिभिरनुवासरं विनोद्यमाना मया मयैव कृत्वा चित्रोपदर्शनेन जानीथ कोऽयमिति प्रतिपान्थं प्रतिचित्रकरं प्रतिपुराणलोकमापृच्छयन्ती कियन्तं कालमस्थात् ।

अथासौ तथैव तिष्ठन्ती कदाचिदेकस्मिन्नहन्येकहेलयैव परमस्ति भगवतो हाटकेश्वरस्य पूजकः पातालगणो नाम वृद्धस्तपस्वी, तेन च तं चित्रगतं युवानमालोक्य प्रोक्ता भुजङ्गतापसेन, पुत्रि ! चैत्रिकापर्वणि देवस्य विशेषपूजाकृतेऽमर्त्यलोकाद्ब्रह्मकमलान्यादाय सुदूरमतिक्रम्य भूमण्डलाभोगमागच्छता मया प्रसारिणीमशोकशाखिनश्छायामधिष्ठितो दृष्टोऽयमेकत्र कुत्रापि परिसरे भूधरस्य, किन्तु वृद्धत्वादकौतुकेन प्रस्तुताध्वलङ्घनैकहृदयेन किमङ्ग कश्चन मृगयागतः क्षोणीपतिरुत स्वैरप्रचारिणामुत्तमो विद्याधराणामाहोस्वित्कुतूहलादवतीर्णो मेदिनीमन्यतमः सुराणां न ज्ञातः कोऽप्यसाविति । निर्गते तस्मिन् झटित्युत्कण्ठावेशपरवशा मदनशरघातमूर्च्छितेन चेतसा ज्ञातमिव, वीक्षितमिव, समीपदेशस्थमिव, सुप्रापमिव च तं मन्यमाना तत्पुरो निश्चयमकरोत् ।

प्रकारेणाद्य केनापि मेलयत्यस्य चेत्सखी ।
तन्मेलयतु मां नो चेन्निवृत्तिर्जीवितेन मे ॥
इत्युक्त्वा मूर्छितेव शय्यायामपतत् ।

अहं च तेन तस्या विनिश्चयेन हा हा ! किमेतदप्रतिसमाधेयमचिन्त्याध्यवसायमपौरुषारम्भमचिरोपसाध्यमध्यवसितं देव्या, तदत्र किं करोमि, क्व गच्छामि, कमुपायमासूत्रयामि, कतमं देवमभ्यर्थयामीति मुहूर्त्तमतिविक्लवीभूतमात्मानमात्मनैव प्रवोध्य यत्खलु बुद्धेर्विषयमायाति तत्करोमि, परतस्तु विधिर्विधास्यतीति निश्चित्य मतिसखेन चेतसा सन्ततमुपायशतानि चिन्तयन्ती तेन सह तस्याः सङ्घटनेन कालमेकं तन्नियमनिर्वाहोपायमासाद्य निर्गत्य च तथा कृत्वा त्वरितमागतवती । आगत्य च देवि पूर्णा ते प्रतिज्ञा, मिलितासि वल्लभस्य, विलोकय पुरस्तादित्युक्ता मया; सरभसमुन्नम्य वदनाम्बुजं यावदालोकयति तावत्तदालेख्यविम्बान्तिके योजितान्यपटलिखितं चित्रगतमात्मानमद्राक्षीत् । दृष्टे च तत्र सविलक्षमिव हसित्वा मामुक्तवती । सखि तारावलि किमेतदिति प्रोक्ताऽहमब्रुवम् । देवि केनापि प्रकारेण मेलनीयाऽहमस्येला-

दिष्टं देव्या तदस्त्येतस्य प्रत्यक्षवर्त्तिनश्चित्रमूर्त्तेः केनापि प्रकारेणेति। जानासि तदा तेन विद्धविजयनाम्ना चित्रकरेण शिल्पकलाकौशलमात्मनो दर्शयता रतिरूपस्पर्धया यत्र त्वदीया मूर्त्तिरालिखिता तं पटमिहानुसन्धाय चित्रप्रकारेण मेलिता मया देवी। पूरिता च प्रतिज्ञा। किन्तु विज्ञापयामि स्वामिनि! प्रभूताध्यवसायसाध्ये वस्तुनि न देव्या पुनरप्येवमनालोच्य कर्तव्यम्। अहमवश्यं तथा यतिष्ये यथा पूर्यन्त एव मनोरथा इति। नियन्त्रितस्वैरनियमा देवी, भवतु तावदेकवारमसावपि सुतरामुपकारिणी बभूव मे प्रतिज्ञा यच्चित्रेणापि मिलितमेतस्यात्मानमालोकयन्ती धारयिष्यामि जीवितमित्युदीर्य तथैव तं पटं प्राणितमिवान्तिकादनुत्सारयन्ती दिनान्यतिवाहयामास।

अथैवमनङ्गोद्दाहदुःसहमवस्थान्तरमनुभवन्त्यास्तस्याः प्रकाममञ्जनच्छविभिर्घनयन् हृदयान्धकारमम्भोधरैः, अनेकवर्णधरेण विचित्रयन् रणरणकमिन्द्रचापेन, शङ्खदलपाण्डुराभिः प्रसारयन्कपोलयोः पाण्डिमानं बलाकाभिः, दहनदारुणया वर्धयन्मन्मथोत्तापं विद्युता, मधुरेण दीर्घयन्पञ्चमसखं हुङ्कारमविरलमयूरकेकारवेण, मरकतमणिमरीचिशिखरसुन्दरसुकुमारहरिततृणकलापशाद्वलितभूतलो धवलनवजलधिपूरितानेकपल्वलोपशाली शीतलितवासरः सुदूरभरितनीराशयोऽपि शोषितवियोगिनीमानसो जगज्जीवनैकहेतुरपि पथिकान्तकारी विवेश मदनमित्रमम्भोमुचां कालः।

यत्र—

भूमिः कोमलसान्द्रकन्दलवती मेघावनद्धं नभो
नृत्यन्मत्तमयूरमन्द्रमधुरध्वानोपरुद्धा दिशः।
वाताश्च प्रसरत्कदम्बकुसुमस्पर्शप्रसन्ना वने
वान्ति स्वैरमनङ्गरागजलधिं कल्लोलयन्तो हृदि॥

तत्रैकस्मिन्नहन्येकहेलयैवागत्य मातुः प्रतीहारी शेखरिका जगाद—राजपुत्रि त्वरितमभिमुखोत्थानप्रश्रयेण विधेहि स्वागतम्, आयाति ते जननीस्वामिनी विजयरेखा चलिता च। यत्किल कुमारभावे स्थितया देव्या श्रिया वरं जलशायितानुपङ्कदृष्टं वैकुण्ठमभिप्रेत्य तदर्थसिद्धये कमपि व्याजमालम्ब्य पित्रा रत्नाकरेण कृत्वा दुर्गमागाधविभ्रमाणामन्तरेकत्र पाथसां पाथसामल्पकेनापि बिन्दुना दैवतानुभावादूरतोऽप्यस्पृश्यमानमसमशिल्पकल्पनाभिरामनिर्माणं मणिमयमायतनं कारितमास्ते। तत्र चान्तःप्रतिष्ठितोऽस्ति देवश्चन्द्रकेतुनामा

महेश्वरः। स च सम्यगाराधितो भगवानवश्यमभ्युद्गताभिलाषिण्याः श्रि इव पूरयति हृदयवाञ्छितानि युवतीनामित्युपास्यत एव सकलभुवनवर्ति नीभिः सर्वदाऽपि रमणीभिः। अद्य पुनः पयोदकालप्रणयिनि पवित्रकोत्सं महती यात्रा। तत्रासौ भवतीमादाय यास्यति। अतः कन्यालङ्करणरत्नावलिप्र गुणीभव, उत्तिष्ठ सत्वरम्, पश्य देवमखिलविश्वाभिवाञ्छितकरं शङ्करम् येन ते प्रसन्नो भगवान्वितरत्यभीष्टं मानसस्येति शेखरिकया प्रोक्ते सप्रतो षमिव मत्कर्णे स्थित्वा ननु वयस्ये तारावलि साध्वनुकूलसेवा अस्वया चि न्तिताऽस्मि, यदि स एव देवो घटयत्यभीष्टं हृदयस्य तत्तदहं तमेव किं न प्र तिदिवसमाराधयामि येन तत्प्रसादादेव प्रतिबिम्बाधिष्ठितपटो युवा प्राप्यत इति निभृतमभिधाय न यावत्सखीपरिवारपरिगता सरभसमुत्तिष्ठति राजकन्या तावद्द्वार एवाऽऽजगाम कुब्जवामनकिरातकञ्चुकिपुरन्ध्रकाप्रायपरिजना देवी विजयरेखा।

तत एव कृतप्रणतिमालिङ्गनादङ्गमिलितामेव दुहितरमादाय तया सार्द्ध- मुच्चलिता तमासाद्य समुद्रगर्भोपकोणवलयानुगामिनमध्वानं प्रविष्टा साग- रस्यान्तरग्रे च ददर्श तम्। प्राप्ता च भगवतः प्रासादमथ यथोपरूढया प्रक्रि- यया तस्यातिमहतो मणिप्राकारवलयितस्य विमलघनरत्नसन्तानरचनारोचि- ष्मतो मध्ये सुरालयस्य प्रतिष्ठितमखिलभुवनान्तरेभ्यो युगपदागताभिर्भूय- सीभिः पुरन्ध्रिभिरहमहमिकाक्षेपसङ्घट्टेन पूज्यमानं भगवन्तमम्बिकाकान्तमने- कशः प्रगुणितक्रमैरुपहारैः स्वयमुदयसुन्दर्याश्च हस्तेनाभ्यर्च्य नमस्कृत्य तन्नि- वासिनीं पारायणीति नाम्ना तपस्विनीमादाय तदाशिषं सह सुतया स्वामिनी विजयरेखा तथैव यथागतेन वर्त्मना निवासमाजगाम। राजपुत्रिकाऽप्युदय- सुन्दरी ततो दिनादारभ्य प्रतिदिवसं न यावदसावुदीक्षितो देवस्तावन्नाहार- मादत्त इत्युपासितुं चन्द्रकेतुमारेभे।

अन्येद्युरसौ तथैव नित्ययात्रोपरूढक्रमेण सकलसखीसमापर्यञ्चिताकृति- रुत्साहतरलेन चेतसा जगाम। तस्मिन्नवाप्य च तस्याङ्गणकवेदिकामायतनस्य तत एव पुष्पोच्चयकृते सह सर्वाभिरपि सखीभिरभ्यर्णवर्त्तिनीं पुष्पवाटिकाम- विशत्। सारङ्गिका नाम च तेन चित्रपटेन सनाथपाणिश्छत्रवाहिनी गत्वा सुरालयस्यान्तरसङ्गतजनाप्रचारसुस्थितं स्थानमिति नित्यप्रवृत्तया स्थित्या क्वचित्कोणैकदेशे सह चित्रपटेनातपत्रमुन्मुच्य त्वरितमागत्यास्माकं मिलित-

वती, लग्नाः स्मः सहजहर्षोपशालिना केलिक्रमेण पुष्पाण्यवचेतुम्। अत्रान्तरे च क्षणे कियत्यपि सहसैव परस्तुदग्रकोश्वदुर्द्धराकारसंवृत्तिः सभूरितिरस्कारमायतनवासिनी सा नाम तापसी पारायणी रे रे शुक्तिभङ्गदुष्कृतादितः शिखात्वमागतेन त्वममुना पटेन सशिखः शुको भवेति शापं कस्यापि वितरन्ती चकार कोलाहलम्। तस्य कोलाहलस्यान्तः पटशब्दश्रवणादुत्पन्नशङ्का किं पटस्य तस्येति झटित्युन्मुक्तकुसुमावचयकेलिरुदयसुन्दरी निर्गत्य पुष्पावचयनात्सह मयैव प्रधाव्य ससम्भ्रमं याति तस्मिन्नायतनकोडमण्डपे यावत्तावदग्रे निजेन तेन हृदयविश्रामशालिना पटेन सनाथहस्तं तथा शासमेकं पुरुषमद्राक्षीत्।

दृष्ट्वा च हा हा किमेतदन्धकारिमाराधयन्त्याः संवृत्तमत्राद्य मे तावदास्तामपरो विशेषश्चित्रेणापि दर्शनमपाकृतं भगवता शम्भुनेति हृदये नितान्तमुत्तम्य कृपालुतया तपस्विनीमभ्यर्च्य च भूयः स्वप्रकृतिलाभेन तमनुग्राहयाञ्चकार। विरतया च भक्त्या किमप्येवमेवाभ्यर्च्य भगवन्तं तं चन्द्रकेतुम्, अनादरेण कृतनमस्कारा च तस्याम् तपस्विन्यां, मृणालीव सलिलसेकेन, भुवनश्रीरिव.........सेन, कमलिनीव दिवसराजेन, कुमुदिनीव चन्द्रेण, रजनिरिव चन्द्रातपेन, विप्रयुक्ता पटेन म्लानिमायाता, निर्विण्णेव जीवितेनाप्यवनतमुखी, त्वरितमेव निर्गत्य शून्यीभूतेन मनसा सततसञ्चारपरिचितमपि मार्गं पदे पदे स्मार्यमाणा मया भवनमागतवती। विसर्जिताशेषपरिजना च मामप्यसम्भावयन्ती भवनान्तः प्रविश्य तल्पतलं भेजे। दिनच्छेदाञ्चले च बहुशः प्रबोध्यमाना मया कथंकथमपि हठादवश्यकरणीयमाह्निकं कर्म कारिता। ततःप्रभृति चासौ समुद्यतादित्यमण्डलं दग्धुनङ्कान्यागतं गृहीताङ्गारपुञ्जमिव दिवसं गणयन्ती, रात्रिमप्युदञ्चितेन चन्द्रमसा दपङ्गोलकेनेव स्फोटयितुं हृदयमुद्यतां मन्यमाना, कालमतिवाहितवती।

अन्यदा तु निवृत्तायां प्रावृषि समुद्भूते च बन्धुजीवप्रबोधिनि शरदागमे सरिदिव कृशीभूता, मयूरजातिरिव क्षीयमाणस्वना, घनश्रीरिव पाण्डिमानमादधाना, तिग्मांशुमूर्त्तिरिवाभ्यधिकमुद्वहन्ती च तापमुदयसुन्दरी भूरिभिरपि शिशिरोपचारैरसाध्यया कुसुमशरकृशानुप्रोपपीडया परितः क्लाम्यन्ती दिशादशशिकरविसरविस्तारशीतलानिलाकैरवबनसर्गगर्भिणीं विभावरीमवाप्य पृथुतरसरोजिनीपत्रतल्पकान्तारितगगने सौधशिरसि प्रसुप्ता प्राननस्थितानां परमेकहेलयैव न दृश्यत एवेति सम्मतम्। अथाहमुत्थाय सहसैव नितान्तना-

कुलीभूतहृदया सर्वतस्तत्र सौधसद्मन्यधस्तादुपरि पार्श्वतोऽभ्यन्तरेषु च निरीक्ष्य गवेषयित्वा च व्याजेन मातुरप्यन्तिके निरूप्य च सम्यक्प्रचारस्थानेषु क्रीडास्पदेषु च तामपश्यन्ती ननु सर्वदैव मद्विरहिता या किल नैकमप्येवं कुत्रापि चलति साऽद्य मामपहाय क्व गता राजपुत्री, किमङ्ग बहिःशयनेनामुना दृष्टिपथमुपेता त्रिभुवनमनोहरेति केनाप्यपहृता नभश्चरेण, किमत्यन्तमद्भुतसमृद्धिना सौन्दर्येण सारेयमित्यात्मनो रूपप्रसिद्ध्यपगमक्षयादपह्नवार्थमपसारिता विद्याधरीभिः, किमुत यदभ्यर्थनाभयेन विहाय पातालमत्र मुक्ता तेनाद्य कथञ्चन ज्ञाता सती निभृतमाकृष्य नीता भुजङ्गराजेन, किम्वहो कष्टमस्मत्सुतेयमेवं ग्लानिमापन्नेति लक्ष्मीभ्रमात्सुसैव प्रापिता निजं निलयमम्भसां नाथेन, किमनेकशो हृदयसङ्कल्पैः कुतोऽपि तं जनमभीष्टं व्रजन्तमालोक्य मदनमोहेन पृष्ठतो लग्ना दूरीबभूव, किमु स्वप्नसंवृत्तसङ्गमव्यतिकरे कृतागसमग्रतः पलायमानं तमतिप्रणयकोपा झगित्युत्थाय प्रत्यक्षमिवाहन्तुमनुसरन्ती कुत्रचिज्जगाम, किमनङ्गदहनपीडिता जलाशये क्वचिदात्मानमक्षिपत्, किन्तु समुद्विग्ना प्राणितेन क्वापि वृक्षशाखायामालम्ब्यमानपाशेन सत्वरमसूनुपसंहृतवती।

अपि च—

किं वक्त्रद्युतिमत्सरैकरिपुणा चन्द्रेण दूरीकृता
नक्षत्रैर्भृशरम्यनिर्मलरदज्योत्स्नार्थिभिः किं हृता।
यामिन्या घनकेशपाशतिमिरं प्रेम्णा समालिङ्ग्य किं
नीता हन्त बहिः स्थिताऽद्य सुचिरादासाद्य तुच्छोदरी॥

अथवा—

सा नूनमिन्दुकिरणाञ्चलबोधितेन
भस्मीकृता प्रबलमारमहानलेन।
उत्क्षिप्य चाथ कुमुदाकरमारुतेन
नीता भविष्यति सुदूरमितो मृगाक्षी॥

न तावदिह सर्वतोऽपि वीक्षिता दृश्यते, न च विकल्पनिपुणेषु लोकेषु कश्चिदपि पार्यते प्रष्टुम्, अग्रे च पित्रोः कथमहमव्यवहितप्रसादपात्रं प्रियसखी तदीया मुखं धारयामि, कथं नाद्य कुतोऽप्युदयसुन्दरी दृश्यत इतीमां वाचमुच्चारयामि, कथमेतदाकर्णनेन सपदि म्लानिमापन्नां तयोर्मुखश्रियं पश्यामि, कथं च क्षणं स्वामिन्या विजयरेखायाःपरिदेवितविदर्भिता गिरः शृण्वन्ती शक्नोमि जीवितुम्, ततस्तु या नाम गतिरुदयसुन्दर्याः साऽद्य

ममापि, किन्तु सख्याः कालिन्द्या मुखेन विदितवृत्तान्तां विधाय स्वामिनीं विजयरेखामद्यतनमहः प्रच्छन्नेव किमत्र निष्पद्यत इति क्वचिदिहैव गमयामि, परतस्तु यथोचितमाचरिष्यामीति निश्चित्य तथाकृत्वा गत्वा च नगरनिर्गमोद्देशे खण्डमेकं चण्डीशभवनमध्यतिष्ठम् । अनन्तरं च कालिन्दिकानिवेदिते तस्मिन्नुत्तिष्ठति प्रवादे प्रसरदाकूतविकलेन स्वामिना शिखण्डतिलकेन निरूपितैस्समन्तादधिगृहमधिसुरालयमधिप्रपासत्रमधिकरितुरगशालमधिकर्मविद्यादिस्थानमधिवनमधिजलाशयमितस्ततः प्रतिपथमतिसत्वरं प्रधावद्भिरन्वेषकजनैरन्तर्व्याकुलीभूतेव राजधान्यपि मुहूर्तमेकं बभूव ।

ततश्च—

अबाद्यमानवादित्रमगीतमजनारवम् ।
रङ्गस्थलमिवासन्नपात्रागममभूत्पुरम् ॥

अपि च—

नादत्ते कश्चिदाहारं नेपथ्यं च नृपालये ।
तया श्रियेव निर्मुक्ते परं दौस्थ्यमगाज्जनः ॥

अथ वृत्ते च तस्मिन्नहनि, विफलीभूय निवृत्तेष्वासन्नगवेषकेषु, तत्कालमेकीभूय मन्त्रिणामवसरोचिताभिः प्रतिपादयन्तीभिर्विचित्रसाराणि संसारविलसितानि, समर्थयन्तीभिर्व्यवसायसाध्यानि वाञ्छितानि, निदर्शयन्तीभिः प्रज्ञानुबन्धसिद्धानि प्रयोजनानि, प्रमाणं नयन्तीभिरनाप्यप्रापिकाः पुरुषकारशक्तीः, कथयन्तीभिरसाध्यसाधिकां बुद्धिम्, ग्राहयन्तीभिर्दुर्दर्शदर्शीनि हृदयस्थैर्याणि, दिशन्तीभिरगम्यगामिनो मन्त्रान्, अविरतं हितोपशालिनीभिरुक्तिभिरुत्सार्यमाणनिर्वेदो राजा निरूप्य देवतासु पूजोपयाचितकसूचनाय कुलवृद्धान्, निवेद्य निमित्तविलोकनाय तद्विदः, नियुज्य शकुनज्ञानाय शाकुनिकान्, आदिश्य वैदेशिकप्रश्नाय परिजनम्, सञ्चार्य विरोधिवसतिषु प्रणिधीन्, प्रस्थाप्य च मित्रस्थानेषु दूतान्, अशेषतस्त्रिभुवनेऽप्यन्वेषणाय मदीयमन्तिकोपविष्टं पितरमब्रवीत्—भोः सैन्याधिनायकरत्नमौले प्रेषय तूर्णं कति नाम सन्ति सेनान्तः सकलभुवनत्रयप्रचारिणः पन्नगभटा यैः कृत्वा सर्वतोऽप्यन्विष्यतेऽस्माकमन्वयैकजीवितं कुमारीति पुत्रिकावियोगविधुरेण स्वामिनाऽभिहितः पिता मे दर्शितोत्साहनिर्भरं प्रत्युवाच—

देव दुर्गमाणि गमयितुमुदग्रशक्तयो, दुष्प्रवेशेषु प्रवेशपटवः, पादपराश्च

दुर्लङ्घ्योल्लङ्घनपदेषु, येषां न किञ्चित्सहजप्रभावादप्रचारं विपमविश्रान्तः, ते हि मनोवेगिनः सन्तीह कियन्तोऽप्यवन्तकुलजातयः, कियन्तो भुवनराजस्य वासुकेर्वंशजाः, तक्षकान्वयसम्भवाः कियन्तः, कियन्तश्च कर्कोटगोत्रिणः, कुलिकसन्ततिभवाः कियन्तोऽपि, कियन्तोऽपि देव युष्माकमादिपूरुपस्य महात्मनः शङ्खपालस्य कुलादुद्भूताः, कियन्तो हि महापद्मसन्तानतः प्रसूताः, पद्मगोत्राच्च लब्धसम्भूतयः कियन्तोऽप्येवमष्टसु क्रमेण चतुर्वर्णतया लब्धप्रसिद्धिषु प्रधानपन्नगकुलेषु जातास्तावन्तः स्वामिन् भविष्यन्ति भुजङ्गमभटाः, ये सकलमाकोणरन्ध्रावटं विगाह्य विश्वमचिराद्धर्षोपयन्ति पुत्रिकोपलम्भवार्तया स्वामिनमित्येवभिधाय त्वरितमाहूय च सर्वानादेशलाभार्थिनः कृतप्रणतीन् कुम्भीनसमहाभटानग्रे चकार।

राजाऽपि तानेकैकशो नामग्रहणसत्कारेण सम्भाव्य साभ्यर्थनमाख्याय पुत्रिकान्वेपणप्रेपणमर्पयित्वा च प्रत्येकमुदयसुन्दरीरूपवाहिनश्चित्रपटान् सप्रदेशोपदेशमादिदेश—भोः श्रूयतां तावदादौ सप्तधा प्रभेदवति पातालल्लोके सप्तै(व) फणावलिप्रभृतयो भुजङ्गचमूपतयः! प्रयात यूयम्; उपरि च भूलोकमधिकृत्य जम्बूद्वीपे गुञ्जाक्षनामा कदम्बमहाद्रुमेण सुन्दरे मन्दरगिरौ, उत्पलो नाम जंबुद्रुमेण केतुमति गन्धमादने, दीपकस्त्वं पिप्पलेन तरुणा शोभावति विपुलाख्ये महीभृति, असावपि कालिन्द्रको न्यग्रोधतरुच्छायाश्यामलितसानौ सुपार्श्वसानुमत्येवमेते(पु) चतुर्षु महानगेषु व्रजन्तु चत्वारः सु(भटा); एतेषु त्रिष्वपि निपधे तमालकः, कमलो हेमकूटे, कुवलयो नाम च हिमाद्रावति गच्छन्तु गिरिषु शौण्डीराः; त्रिषु चापरेषु पद्मकः शृङ्गवति, श्वेताचले पिङ्गलः, नीलचुर्नीलगिरावित्यमी भूमीधरेषु त्रयो यान्तु; तेषु पुनरष्टसु महेन्द्रमलयप्रभृति मलये शक्तिमति वृक्षशैले विन्ध्यगिरौ पारियात्रे कन्याचले चेति कुलपर्वतेषु महार्परः पुष्करादिभिः सप्तभिरेप वीरो महाफलः प्रचरतु; सञ्चरन्तु चान्ये चैत्ररथे शिखण्डकः, ताराक्षो नन्दने, वैभ्राजवने विशालो, धृतिसंज्ञिके सिनादश्चेति चतुर्षु महावनेष्वमी चत्वारश्च; अपरे तावदरुणोदनामन्येकः, द्वितीयश्च मानसे, सितोदे तृतीयः, चतुर्थो महाभद्रे चेति जलाशयचतुष्टयेऽस्मिन्नेते फणाङ्कुशप्रभृतयो विचरन्तु; भारते हि क्षेत्रे दम्भोलिरेवैकः प्रयातु; यातिल्लाटेन रमसिकेतुरेव; परिशिष्टेष्वन्यत्र लङ्कालकादिनगरेषु, श्रीशैलकैलासादिभूधरेषु, जाह्नवीरेवादिनदीतीरेषु, अवरेषु सर्वेषु, जलाशये चानल्पमर्यादमखिलेष्विन्ध्यादिपद्यामचारानास्पदेषु कमलकण्ठनामा

प्रधानो भूलोकवर्तिकवरूथिन्याः स्वयमुचितक्रमेण सञ्चरन्नेकैकशो भटकोटि-पौरुषान्प्रहेष्यत्येव चरप्रवीरान्; जम्बूद्वीपात्परतः षट्सु महाद्वीपेषु दुर्मदः शाकद्वीपे, कुशे कालाञ्जनः, चक्राह्वः क्रौञ्चे, सरलः शाल्मलीद्वीपे, गोमेदनामन्यासीमुखः, पुष्करे च तापिच्छकोऽयमिति षडमी महात्मानः सैन्यैर्भ्रमन्तु; सेनापतय एतेऽप्यालवणसागरात् स्वादूदकसमुद्रावधेः सप्तसु पयोराशिषु सप्तैव गसेचनुणप्रभृतयः प्रसर्पन्तु सर्पशौण्डीराः; तथाऽन्येपि हृदयवेगनाम्ना चरप्रवरेणाधिष्ठिता दिक्पालनगरीष्वष्टौ चाष्टासु पर्यटन्तु भटाः; तस्माच्च स्वर्लोकमासाद्य त्रिदशराजधानीषु सिद्धनगरीषु विद्याधरपुरेष्वन्येषु चाब्रह्मलोकमर्यादमसुमतामास्पदेषु सुमेरुशैलावगाहनपुरस्सरमन्वेषयतु परिगतः सप्तभिरनीकिनीभिरिन्द्रनीलनामा च प्रभुरसौ; इत्येवमखिलमापुराणकमठाद्ब्रह्मलोकावधि ब्रह्माण्डगर्भमवगाह्य ज्ञायतामुदयसुन्दरी क्व वर्तत इति, गम्यतां त्वरितमन्विष्यतां वत्सेत्यादि सादरमभिधाय, भूरिणा प्रसाददानेन सम्मान्य विसर्जितान् भुजङ्गवीरवार्तिकान्प्रेषयामास ।

अहं तु तथा दुःखेन भरिता तदीयां प्रवृत्तिमचिरादेव स्वयमीहमाना जातामात्मनोऽपि गतिं तद्गत्या प्रमाणीकृत्य तथैवानुष्ठातुमन्तःकरण एवाऽऽलोचितवती। ननु का गतिर्भूता भविष्यत्युदयसुन्दर्या यस्यामहं व्रजामि, अथवा तावदपहारानुमानस्यैव पृष्ठे लगामि, ततश्च पुरन्ध्रिकापहारकर्मणि सहजव्यसनिनो भवन्ति सीतापहरणेन पुनः स्फुटप्रतीतयो हि नक्तंचराः, नेदीयसी च सा समुद्रान्तरद्वीपवर्तिनः कन्यावरोधस्य तदीयमास्पदं लङ्का, तत्खलु तत्र पश्यामि पश्चादन्यत्र गवेषणाय यतिष्ये, मा पुनर्भाग्यवशात्तत्रैव गतायाः सरति मे वाञ्छितं हृदयस्य, किं तु ममापि युवजनाभिगम्येनामुना कुमारीरूपेण निर्गत्य च भवनाद्भ्रमन्त्याः कतमं नाम कुशलम् । अतः कृत्रिमैर्भस्मजटावल्कलादिभिस्तापसत्वमाधाय पर्यटामीति चेतसि विनिश्चित्य तथा कृत्वा विमानपदप्रतिष्ठितं च नभःप्रचारसारमतिजवं पादुकाद्वितयमधिरुह्य निर्गताऽस्मि । तस्माद्गता च लङ्कायां दृष्टवती च तत्रास्मि दूराद्रणाध्वरजुषा रामेण परिगृहीतस्य ज्वलतः प्रतापनाम्नो वह्नेरर्चिषामालोकमिव प्रसर्पन्तमभितोऽपि कनकमयाशेषसुरमन्दिरागारप्राकारवतः परिकरस्य रोचिषां कलापम् । अथाहमन्वेषणरसैकहृदया नगरपरिसरादेव तत्खल्वपहृत्यानीतसीतावस्थानपवित्रितभुवा शिंशुपाद्रुमेण प्रसिद्धमधिविष्टा रावणीयमुद्यानमितस्ततो भ्रमन्ती च तस्मिन्नादौ तदेवं वन्दिग्रहगृहीतसीताविलोचनत्रस्तैरजस्रमञ्जनाविलैरश्रुवारिभिर्म-

लिनितया सुतार्तिदुःखातिदाहदग्धयेव पृथिव्या श्यामलितमास्पदं शिंशुपाद्रुमस्य दृष्टवती। दृष्टवती चान्यतो गैरिकारागलोहितमृदा रक्तपातमनुमापयन्तमुत्कुपितहनुमत्करतलचपेटास्फालदलितस्य दशकण्ठसूनोरक्षस्य वधप्रवेशं क्रीडागिरेः परिसरम्। परतोऽपि तस्मान्नातिदूरे दृष्टवती तेनैवाक्षवधास्वादलब्धेन हनुमता व्यापादितस्य सरक्षकवरूथिनीकस्य जंबुमालिनः पतितास्थिमुकुरोपलक्ष्यमाणतलं वलयमुर्वीरुहाणाम्। पुरस्तात्कियतोऽपि भूविभागस्यान्तरे दृष्टवती च मारुतिनियन्त्रणोत्सृष्टपरुषपाशोरगपरिग्रहोद्गारगरलानलशिखादाहैरनुद्भिन्नतृणविटपिराजिमाजेर्भुवं शक्रजितः। प्रकृतप्रयोजनानुपलम्भखिन्ना च निर्गत्य तस्मादारामतः पदे पदे क्वचित्कथञ्चिद्दुभयराघवभुजास्त्रधारावकर्तनोच्चलितमौलिवलयानां मेघनादप्रभृतिराक्षसभटानां चलत्पदतलाघातसमतलान्कबन्धताण्डवोद्देशानालोकितवती। दृष्टवती च क्वचिद्दाशरथिकरशराघातविघटितायुषः कुलाद्रिगुरुकलेवरभ्रंशाभिहत्या त्रुटितत्रिकूटगिरिशिखरशकलितशिलाखण्डदन्तुरामन्तभुवं कुम्भकर्णस्य। विशालसीमन्यन्यत्र च प्रदेशे प्रचण्डकलितकुतूहलोत्तालमिलितसुरशिविरकरविसृष्टाविरलपतितपारिजातकुसुमसमुदयामोदवासितधरातलं वीक्षितं च रामरावणयोराहवस्थानम्। अपि च तमन्तर्दशकण्ठराजाङ्गणोद्देशमालोकितवती।

यस्मात्—

कान्त्या ज्वलन्नरुणपिङ्गलया विशालः
फालाय वर्तुलितदेहदलो हनूमान्।
लङ्कापुरीं कुपितदाशरथिप्रताप-
वह्नेः स्फुलिङ्ग इवोच्चलितो ददाह॥

पर्यन्ते च प्रतिभवनमेकत्र गृहजनेभ्यः कथाभिराकर्णितमतीतस्य चकितमन्दोदरीप्रबोधनपरमुद्वृत्तवचसो रावणस्य सूक्तं पञ्जरनिवासिना शुकेन पठ्यमानमश्रौपम्।

माभैर्भीरु यदेष राघववदुर्देवो मुरारिः स्वयं
गोलाङ्गूलभटा इमे च मरुतस्ते दुर्निवाराः किल।
स्वर्वन्दीहठनिग्रहोद्यतभुजादण्डो यदाऽहं तदा
किं नासौ मुरजित्सुरा न किममी येनातिभीता प्रिये॥

ततोऽपि चाग्रे केनापि सुरेष्वसहिष्णुना राक्षसापसदेन दशाननं शोच्यमानमाकर्णितवती।

हा स्वर्नाथशिखोडशासन दशग्रीव प्रभो क्वासि भो
भोः शौण्डीर विना त्वयाऽत्र नगरे हा पश्य यद्वर्तते ।
ये त्वद्वारनिषेविणः प्रविशता लोकेन घृष्टाः पदै-
स्ते तेनैव हहा शुभार्थमधुना पूज्यन्त एते सुराः ॥

अन्यतोऽप्येकत्र निर्जनायतनमण्डपस्य गर्भे विश्रान्तिमिलितैर्वैदेशिकनिशाचरैरन्योन्यारब्धवार्तया रावणवधे विधेर्वैपरीत्यमत्यन्तविस्मयात्सनिर्वेदमुद्भाव्यमानमशृणवम् ।

सेवितो यैः सुरैर्भृत्वा तैरेव दशकन्धरः ।
हा हतो मर्कटैर्भूत्वा वैपरीत्यमहो विधेः ॥

एवमपरमन्यत्रापीदृग्विधं व्यतिकरमनेकशः स्थाने स्थाने विविधरूपमुपलब्धवती । इत्यादिकं प्रतिप्रदेशमभितो रामरावणीयं वृत्तान्तमुपस्थानमिलितेन सरभसमपूर्वतापसीदर्शनकुतूहलिना पुराणलोकेनाऽऽख्यायमानमवधारयन्ती नगरमाकोणकुहरान्तरालमन्तर्बहिश्च परिभ्रम्य न क्वचित्किञ्चन किंवदन्तीमात्रकमप्युदयसुन्दर्या लभमाना निराशीभूय विमुच्य च सरलं विषादफूत्कारमतिसत्वरं निर्गत्य तस्माल्लङ्कापुरीप्रदेशान्मलयादिगिरीन्द्रकुक्षिषु क्रीडास्पदानि विद्याधरकुमारकाणामुद्दिश्य गन्तुमारब्धवती । तेऽपि [illegible]निरन्नापहारिणः प्रसिद्धास्ततश्च तत्र क्वाप्यवश्यमसौ भविष्यतीत्याशया व्रजन्ती क्वाप्येकस्मिन्नेकहेलयैव प्रवरगिरितटोत्सङ्ग[illegible] गर्भे [illegible] [illegible]मिति फूत्कुर्वन्तमुपरचितब्राह्मणरूपममुं [illegible] । हा हा ब्राह्मणोऽयमार्त्त इति च वत्सलतया करुणया [illegible] सादरमपृच्छम्—भो द्विजन्मन् ! येन ते [illegible] [illegible]दर्शने कथमिदं [illegible] यदि भवत्या [illegible]। [illegible] तर्हि [illegible] [illegible] तथेति [illegible] प्रतिपदं [illegible]—साधु साधु प्रतिज्ञातमिदानीं [illegible] [illegible]दिति प्रदेशे [illegible] [illegible] सा [illegible] । [illegible] तेनाहं [illegible] हा प्रिय [illegible] [illegible]तेन । [illegible] [illegible] [illegible] [illegible] ।

क्षपयन्ती दिनानि तिष्ठतीति चिन्तयन्त्या मम सम्पिण्डितसखीदुःखसम्भारेण बलादेष विगलितो बाष्पजलबिन्दुसन्दोहः। श्रीमन्नीदृग्विधोऽयमावेदितो वृत्तान्तः। तत्खलु स तावदस्मत्स्वामिन्याः प्रार्गितस्वामी भवान्। किन्त्वेतदिच्छामि बोद्धुं यत्किल क एष विषयः? कतमनामधेयमिदं नगरं यदङ्ग चक्रवर्तिलक्षणानुमानसंवेदितेन भूवलयभर्त्रा भवता राजधानी कृतम्, ? कमन्वयमलञ्चकार सुकृतशालिनां वरेण्यः? किं च मत्सखीमदनज्वरहरणमन्त्रयोग्यं नाम बिभर्त्ति? सा च वर्तनमनङ्गस्य, सर्वस्वं त्रिभुवनश्रियो, जीवितं शङ्खपालगोत्रस्य, किमिहास्ते मम हृदयभवनं वयस्या? मिलिता च क्वचिन्माणिक्यवर्त्तिरिव जातरूपस्य भवतः? निवृत्ता च किं तस्यास्त्वद्विरहदाहदौस्थित्यदायिनी दशापि? ममापि किं नाम चिरादपयास्यत्येष तदन्वेषणभ्रमणसङ्क्लेशो न वेत्येवमभिधाय भूमीन्द्रवदनविन्यस्तलोचना तूष्णीमकरोत्। राजा तु सपदि मुखाम्भोजधृतया म्लान्येव स्वयमुदयसुन्दरीसङ्कटनमभूयमानं निवेद्य नेत्रकुमुदाश्रिताया विश्वभूतेर्मुखे सर्वं यथादृशं तत्तादृशमेव ज्ञापयित्वा तत्रैव शयनावस्थानसुस्थितां विधाय तारावलीं निजनिवासमयासीत्।

ज्ञातेति सम्मदरसः प्रथमं ततः सा
तन्वी न दृश्यत इति प्रबलो विषादः।
क्वावुधताविति कृतप्रसरं विरुद्धौ
निद्राऽनुपश्य विनिवेदुमिवान्तरेऽभूत्॥

ततश्च—

चलति रजनिगन्त्रीवक्त्रचीत्कारधीरो
ध्वनिरनुदिशमुच्चैरेकतः कुक्कुटानाम्।
उदलसदवनीन्द्रोद्बुद्धये मागधाना—
मुचितपठितिसाराऽन्यत्र सारस्वतश्रीः॥

इति कायस्थकविसोड्ढलविनिर्मितायामुदयसुन्दरीकथायां
तारावलीदर्शनं नाम सारस्वतश्रीनिवाहः
षष्ठ उच्छ्वासकः॥

सप्तमोच्छ्वासः ।

अथ समन्तादतिविकटकुक्कुटकुटुम्बारटितकटुरवोद्दनविनिद्रितासु युगपदुन्नदन्तीषु विलासवनविहङ्गमश्रेणिषु, समुपजायमा (नध्वा) नेषु सुरमन्दिरोल्लासिषु वाद्यमानावसरवादित्रसमुलेषु (समूहेषु ?) क्वणन्तीषु विबुद्धसिन्धुरनियन्त्रणारणितमुखरासु हस्तिशालान्तरालानशृङ्खलासु, प्रवर्तमानेषु दुह्यमान क्षीरधाराझात्कारडम्बरेषु, श्रूयमाणेषु मथ्यमानदधिभरगभीरकुम्भीघरत्कारकवचितेषु चलत्कुटुम्बिनीचटुलवलयमालारवेषु, कलकलायमानेषु सरित्स्नानयात्रोपकरणादर्शनक्रौञ्चदुःस्वरेषु श्रोत्रियद्विजेषु, प्रतिष्ठमानेषु गमनवचनवाचालितनिवासभवनोदरेषु पान्थेषु, स्वावासमन्तर्वलितेषु रजनिजागरजडेषु यामिकजनेषु, पुष्पवनमधिप्रधावन्तीषु रतरसनिद्रालसविलोचनासु मालाकारतरुणीषु, निद्रामुपसेवमानासु प्रगल्भतरभुजङ्गजागरितवेश्यासु, प्रियगमनादाकुलीभवन्तीषु मानग्रहापगमसम्मुखीनासु मानवतीषु, गृहजनमुत्थापयन्तीषु प्रथमप्रबुद्धासु पञ्जरसारिकासु, मिथुनवृत्तान्युदीरयत्सु निद्रान्तोन्मिषितसंस्कारेषु क्रीडाशुकेषु, हरिचरितगीतकानि गायन्तीषु पुण्यपथप्रवृत्तासु जरतीषु, देवस्तुतीः पठत्सु धर्मक्रमानुलग्नेषु मुनि माणवकेषु, क्रमेण सर्वतोऽप्युद्बुध्यमानसकलजनपदालापनिस्वनमनोहरमाविर्भूयमानभुवनमनुभूयमानदिङ्मुखालोकमुद्भूयमानपृथुप्रभं च बभूव शुभमयारम्भसंरम्भि प्रभातम् ।

यत्र हि प्रविशतो वासरस्य समुचितं माङ्गलिकसत्कारमिव कर्त्तुमभितोऽपि भूतले स्रवदवश्यायसलिलशीकरक्षेपैर्वितरन्नतुच्छकं छ (छां?)टक(?)मतिस्फुटं प्रस्फुटत्पिण्डीतगरपुटकपरिपाटिवलयाद्वुचलन्तीभिः किंजल्क(ग)लच्चूर्णराजिभिर्भरन्भूरिशो रङ्गावलिविशेषान्, सायान्तनोन्मिषितमालतीशिथिलवृन्तनिर्मुक्तैरवगलत्कुसुमनिकुरुम्बैर्विकिरन्मनोहरं पुष्पप्रकरम्, उद्बुद्धमुखाङ्गनो (द्वाङ्गनामुखो ?) द्भूतनिद्रान्तजृम्भिकाश्वाससङ्गमसमाहृतोदारपरिमलानुमार्गधाविताभिः प्रघनमधुकरश्रेणिभिः पदे पदे विरचयन्नायतगुरूणि तोरणानि, विनिद्रनवकुसुमवाटिकाटीकमानमालिनीसीमन्तसरणिसिन्दूरोद्वनविपञ्चितमहोत्सवाचारः, क्रीडासरसीषु सुप्तान्युद्बोधयितुमिव चालयत्पुण्डरीकानि, विकचमुचुकुन्दकुसुमदलनिष्ठुरसटास्फालदलितरयमन्थरो निसर्गशिशिरः सकोमलस्पर्शमावाति प्रत्यूपचारी समीरणः ।

ततश्च—

कालक्रमादुपरतिं समुपेतवत्या
व्यस्तीभवत्सटितनष्टकलेवरायाः।
रात्रेः कपालमिव पाण्डुरमस्तशैल—
कूले लुलोठ निरभी(शु)हिमांशुविम्बम्॥

अन्यतश्च—

नाद्याप्यपैति भृगुभौमगुरुप्रधान—
स्तारागणोऽयमिति कोपकषायितस्य।
अह्नः कटाक्षलतिकेव झटित्युदस्था—
दाशोणरोचिरुदयाचलमूर्ध्नि सन्ध्या॥

क्रमेण च—

प्रातःश्रिया रचितमच्छरुचो(ऽम्बर)स्य
लज्जा(पर्या?)यविद्रुमदलद्युतिसोदराभम्।
पूर्वाचले समुदभून्नवपट्टसूत्र—
सत्कुङ्किकातिलकचिह्नमिवार्कबिम्बम्॥

इतोऽपि—

देवेन सर्वजगदुग्रदुरन्तरोग—
संहारकेण दिवसप्रभुणा निरस्तैः।
कुष्ठस्य शुभ्रतिलकैरिव..........
तारागणैर्गगनमुज्झितमस्तशेषैः॥

अथ क्षणेन प्रसरद्भिः किरणमालिनो मयूखैर्वियत्कक्षान्तराणि, विकसद्भिर..................श्चक्रवाकयुगलैर्जलाशयतटानि, विलसद्भिस्तल्पतलोत्तीर्णमा निनीकटाक्षैः निकेतनानि, भास्वद्भिस्तत्काल..............................केतन तथाऽह्नि.......निवषे-द्भि-तलवद्दा-द्दा कल्यमाणवशतदीधितिप्रतानैर्द्विगुणितवैभातिकप्रभाभं.................................राजत्। तस्मिन्सकलभुवनकोशोद्घाटनपटीयसि प्रभातसमये प्रविशदवसरवराङ्गनारणन्मणिकिङ्किणीझणत्कारमधुरितेन वन्दिना मुक्तहुङ्कारवेण प्रबुद्धो महीपतिरुत्थाय निर्वर्त्य च प्रत्यूपसमुचितं कृत्यजातमाहूय रभसादभीष्टाय कुमारकेसरिणे तं रजनिचर्यावृत्तान्तमखिलमावेदयांचक्रे। निवेद्य च प्रस्तेन पथा (प्रशस्तेन पथा?) त्रिपथगाचुम्बितजटाकिरीटशिखरमर्धेन्दुशेखरं भगवन्तमर्चयितुमुचित...री...

दारम्भार्थमुत्थितवान् । अथ क्रमेण पवित्रितशरीरो यथाक्रियमाणविकसित-
पत्रकवकुलकमलमुचुकुन्द (च) म्पकादिकुसुमसञ्चयप्रचुरैरचितगुनिर्मित-
सितच्यालङ्कारहारादिभिरगरुकर्पूरधूपदीपादिभिरुपचारैः परिसमापितमङ्गल्या-
पराह्णनित्यक्रियः तत्कालमनाकुलोचमरससम्मिलितेन वल्गुलितो मदनमोहेन
स्वकमङ्कगतमिव तं सर्वं शर्वरीव्यतिकरसाफल्य परिस्फुटीकर्तुं पुनरागतं

कदर्थितया दृशा कुमारकेसरिणमपश्यत् । सोऽपि प्रभोरभिप्रायमासाद्य सप्रश्रयं तामवादीत्—युज्यत एव कः किल न रोदित्यभीष्टविरहेण घट्यमानहृदयशल्यः प्रेमपरिलङ्घितो जन्तुः—विशेषतस्तु रुदिताध्यवसायजन्तुः स्त्रीजनः । किन्तु धीमता स्वधीभिरन्योऽयमात्मा, यत्किल विधिव्यापारपरवशो वस्तुनि किमङ्ग क्रियते सह्यत एव यद्यथोपैति तत्तथैव सर्वम्, सर्वतत्त्वावबोधजुषो भवत्यास्तु किमत्रोपदिश्यते, विहाय हृदयवैधुर्यबोधकं तत्प्रेमभावनाव्यासङ्गमिदानीं तथा क्रियते यथा कुतश्चिदचिरादेव दृष्टिविषयमागच्छत्युदयसुन्दरीत्यादि कुमारकेसरिणा रुदिताकूतप्रभावितया च विश्वभूत्या च सादरमुत्बोधिताऽसौ प्रक्षाल्य विश्वभूत्योपढौकितेन कमण्डलुवारिणा वदनकमलमपमृज्य च स्फुरदरुणनासापुटंस्खलदक्षरं शनैरवोचत्—राजन्निह न शक्नोमि त्वदन्तिके प्रियसखीं विना क्षणमपि स्थातुम्, छिनत्ति चैष प्रतिक्षणमुदीक्ष्यमाणश्चित्रपटो मदीयं मर्मेति वदन्त्या एव तस्याः सहसैव पुनर्निरुद्धकण्ठो हठादपतदश्रुधारासन्दोहः ।

अथ तेन तस्या उदयसुन्दरीविषयिणा प्रेमानुबन्धवैधुर्येण प्रबोधितानङ्गवल्लिक्लेशमवनीशमपि त्रपया छन्नं निःश्वसन्तमाकलय्य कालोचितं विश्वभूतिर्जगाद—वत्स ! किमेवमास्यते, न खलु सखीविप्रयोगतरलं मनः स्थिरीकर्तुमसावद्य चित्रदर्शननवीभूतदुःखा शक्नोति, भवन्तस्तु राशयो धैर्यस्य, तन्नाम तत्किञ्चन यथोचितमारभ्यते, ताः काश्चन बुद्धयो व्यापार्यन्ते, तानि कानि चिद्व्यवसितानि स्वीक्रियन्ते, सा काचन सहायसम्पत्तिराद्रियते, ते केचन पुमांसः सञ्चार्यन्ते, स च कश्चन महोपायश्चिन्त्यते, येन—

स्वर्लोकादपि दन्दशूकभुवनादालतसिन्धूल्लस-
द्वेलावारितरङ्गताडितवनादन्विष्य भूमण्डलात् ।
आनीता त्वरितं गृहस्थितिकृतां धर्माधिकारेषु सा
तन्वङ्गी लगति क्षितीश रुचिरा मुद्रेव हस्ते तव ॥

किमु किल मर्त्यलोकावतीर्णसुपर्णवाहनाकृतेरसाध्यमिह महाराजस्य, तद्द्वितीयतामितो निर्वर्त्यतामखिलं पौर्वाह्णिकं कृत्यम्, अतिक्रामति च वेला, तारावलि ! त्वमपि किमेवमत्यन्तमुद्भ्रान्त्यस्त्ययमवनीन्द्र एव स्वयमत्र प्रयत्नवानास्ते, यतो विधिरपि बिभेति कृताध्यवसायादमुष्मात् । अतः सोऽपि करिष्यत्यचिरादनुकूलीभूय तया सह युवयोः सङ्गमं समकालमिति विश्वभूतिवचनात्तारावली शकुनग्रन्थिबन्धमपि(यी ?) तव्यार्थमुनगाऽस्तु भारती भगव-

त्या इति सप्रत्याशमुक्त्वा प्रसादितमुखी राजानमुत्थितं व्रजन्तमनुव्रज्य गौरवपरिस्खलिता तामेव भगवतीमनुजगाम ॥

राजा तु निजं निवासमासाद्य यथावसरकृत्यनिर्वर्तनादनाकुलः, हृदिस्थैस्तारावलीनयनजलबिन्दुभिरार्द्रीकृतकुसुमशरशिलीमुखासारभूरिव्रणः, तदुग्रवेदनयासुदूरमारब्धः, चिन्तयाञ्चकार—ननु क्व किल सा नाम रम्योदरी भविष्यति, सहसा सौधसद्मनि सुप्तैव न दृश्यत इत्यपहारात्कारणमखिलमन्यदमुख्यमेव, यतः कथं नु तादृशं युवतिरत्नमर्थिभिर्नयनगोचरीभूतमुत्त्यज्यते। न च निखिलसुलक्षणानुमेयकल्याणवसतिः सा तादृशी मूर्त्तिरपायैरपि स्पृश्यते। तदिह विश्वान्तस्तस्याः स्थितिं कथमहं ज्ञाताऽस्मि; यत्किल स कश्चिदुपायोऽस्ति ? यो न तां गवेषयितुं पित्रा शिखण्डतिलकेन कृतो वर्तते। किन्तु तेनाप्यन्विष्य लब्धाऽसौ पातालवासित्वादगोचरैवास्माकमस्ति। अपि चेत्तारावलीद्वारेण सम्बन्धोपायस्तथाऽपि यद्यसावन्विष्य समानीता पितुर्गृहमागता भवेत्तदा किमप्यध्यवसितुं पार्यते। यस्यास्तु मूलत एव न ज्ञायते स्थितिस्तत्र किं कर्त्तुमुपपद्यते अतः कथमसावन्विष्यते। न च तावन्मनुष्यजन्मनः कस्याप्यन्यत्र नरलोकादस्ति प्रचारः। सर्वत्र परं प्रचरन्ति सुरसिद्धविद्याधरोरगयक्षराक्षसा एवेति वाक्यान्ते राक्षसपदोपादानादये ! साधु स्मृतमस्ति मे विक्रमैकसिद्धो मायाबलनामा निशाचरवीरः, तेन कृत्वा सर्वतोऽप्यन्वेषयामि तां शशिमुखीम्। किमालोचितेन भूयसेति चेतसा विनिश्चित्य कृत्वा समाधिं ध्यातवान्मायाबलम्।

अत्रान्तरे च द्विजाकारसौम्यया मूर्त्त्या देव ! यः स्मृतो देवेन सोऽहमादिश यदर्थमनुस्मृत्य बाढमनुगृहीतोऽस्मि, यदत्र किलाब्रह्माण्डशिखरात्कूर्मराजमर्यादमदृश्यं दुर्गमं दुर्लङ्घ्यदुर्घटमसाध्यं च किञ्चित्तदेकेनैव क्षणेन साधयामीति कृताञ्जलिपुटः प्रणम्य मायाबलः पुरो बभूव ॥

राजाऽपि रभसात्तत्र पटे चित्रगतामुदयसुन्दरीमुपदर्श्य भ्रातरमुना रूपेण विश्वान्तरङ्गनारत्नमुपलभ्य त्वरितमागच्छेति तं नक्तञ्चरं सुभटमादिदेश। प्रतिपद्य च प्रेषणमुत्पत्य गते तस्मिन् सप्रत्याशमिव तस्यैव प्रचारशक्तिभावनया तं दिवसमत्यवाहयत्। अभावयच्च निराकुलावसरप्रवेशिना प्रेमरसविजृम्भितभ्रमेण सम्भ्रान्ते चेतसि दशादौस्थ्यदुःसहमवस्थानमुदयसुन्दर्याः।

किं शीतैरथवाऽऽतपान्त्रि(दि?)भिरुत क्षोणीतलोल्लङ्घनै—
राहोस्विन्नवबन्दिमन्दिरपरिक्लेशादिभिः साऽथवा ।
मत्सम्बन्धिभिरप्यनङ्गविशिखाघातव्रणैः पीडिता
हा प्रत्यग्रमृणालकोमलतनुस्तन्वी क्वचित्सीदति ॥

अथवा तामशेषशुभविभूतिपात्रं प्रति प्रोषितेन चेतसा शून्यीकृतो मृषाऽहमेतदेवं विकल्पयामि । किन्तु—

चेतस्तां गतमिन्दुसुन्दरमुखीमायाति कस्मादये
प्रत्यङ्गं मदनोत्सवस्तरुणिमाभोगोऽद्य तस्यास्तनौ ।
तत्रैतज्जघनोदरस्तनमुखश्रीभिः क्रमेणातिथी—
भूतं हन्त निमन्त्र्यते मुहुरिति व्यग्रं किमागच्छति ॥

यदि वा—

तत्रैव सुदृशस्तस्यास्तच्चिरावस्थितिक्रमात् ।
वशीभूतं मनो नूनमायास्यति न तां विना ॥

तदत्र हेमाण्डमहार्णवोदरं
श्रियेव दूरादवगाह्य लब्धया ।
उरस्थलारोपितया मृगीदृशा
कदा भविष्यामि त(स?)दाऽहमच्युतः ॥

अपि च—

कदा नाम म(म) दृष्टिस्तस्याः क्वचिदनङ्गदवथुदुःस्थिता विरहिणीव चरणपल्लवास्तरणे लुठिष्यति, क्वचित्कौतुकेन पल्लविता लतेव जङ्घोरुदण्ड-शरणा प्रसरिष्यति, क्वचित् शृङ्गारिणी गणिकेव जघनाङ्गणे स्थास्यति, क्वचि-न्मारकुला भुजगीव नाभिरन्ध्रं गमिष्यति, क्वचिद्विस्मयाच्च गता श्रान्तेव त्रिवलिमण्डपमाश्रयिष्यति, क्वचिद्यौवनविडम्बिता स्वैरिणीव कुन्तलान्धकारे सञ्चरिष्यति, क्वचिद्रागिणी सिन्धूररेखेव सीमन्तपदे यास्यति, क्वचित् दर्पो-द्वेल्लनविलोला शफरीव लावण्यपयसि सर्वतो विहरिष्यति, किं च कदा नु मे हृदयसुखसाधकस्तदालापः कर्णविवरे प्रवेक्ष्यति, कदा पर्यन्ततीक्ष्णा तूलिकेव तद्दृष्टिरङ्गभित्तौ भ्रमिष्यति, कदा वाऽसौ कल्याणवसतिर्निधानकलशीव करे लगिष्यति, कदा च नवरुचिस्थानं रत्नमालेव कण्ठग्रहं करिष्यतीत्यादिभिः प्रतिक्षणमुदञ्चता तद्रूपभावनाविशेषेण वास्यमानहृदयसम्भृतैरमीभिरभीष्ट-दोहदशतैरात्मानमविरतं व्यापारयन् समन्मथावस्थमस्थात् ।

अथापरेद्युः प्रातरेव कृपावती नाम शिष्या विश्वभूतेः समागत्य
महाराजेत्याशीर्वचोनुगं कमलपूलकमुपढौकनीकृतं समर्प्य समुचितोपवेश
तिथ्यसन्मानिता राजानमब्रवीत्—राजन् ! आर्या त्वामाह यथा
तारावली तस्मिन्नेवाहनि मठान्निवासमागते त्वयि हठात्प्रबोध्य कार्
ह्निकविधेया स्मृत्वा तत्तदशेषमुदयसुन्दरीव्यतिकरमश्रुपातमात्रानुमेयक
रुदितेन तामशेषां रजनीमनैषीत् । विभाते च त्वरितमुत्थाय पुष्पो
मिषेण कुसुमवाटिकामुद्दिश्य यत्खलु निर्गत्य गता, तदिदानीमेतित
मेतीत्येवं न तत्राह्नि समागता । न चास्माभिरग्रे उदयसुन्दरीवियोगदुःखि
न ज्ञायते क्वापि याति किञ्च करोत्येकाकिनीयमिति समन्तादितस
न्निपुणं तद्दिनमशेषमन्विष्टाऽपि दृष्टा । न च निवेदितं भवतेऽपि,
प्रायः कश्चिदिहापि पुरा परिचितः सुहृज्जनो मिलितो भविष्यति स नी
गौरवेण निजं निलयमातिथ्यसत्कारेण तामद्य सन्मानयिष्यति, किमेवम
वेकिनी तारावली, येन मामपृच्छयन्त्येव क्वत्र चियाति, तत्प्रातरवश्यमे
(ती)ति । न चागता प्रातरपि । एवमद्य गतायाः क्वापि तस्यास्तृतीयो व
दिवसः । तन्नूनमसाविह न शक्नोति वीक्षमाणा भवन्तमुदयसुन्दरीं वि
स्थातुमिति यथैव पूर्वं गृहान्निर्गता तां गवेषयितुमेवमितोऽपि मन्ये गता भ
ष्यति । तन्न भवता परामर्शपण्डितेन शोचनीयाऽसौ । न चानीतया गवे
तया किञ्चन प्रयोजनमस्ति । स चान्वेषणप्रयासो वरमुदयसुन्दर्याः क्रियते
सा पुनर्यस्मिन्नुदयसुन्दरी तत्र सर्वतोऽपि भ्रान्त्वा स्वयमेष्यति—इत्यादि
म्यक् सोपदेशमाख्याय लब्धाशिषा नृपेण सप्रश्रयमशेषं तथेति तद्वचः प्रति
पद्य विसर्जिता सप्रलोपमयासीत् ।

अनन्तरमनेन तारावलीगमनविस्मयरसेन जडीकृतान्तःकरणवृत्ते
उदयसुन्दरीव्यतिकरानुचिन्तनपथायातमन्मथशरघातवेदनादूयमानमनोविह
तया कुतोऽपि निर्वृतिमलभमानस्य, स्त्रीरत्नफलितायाः प्रतिदिनमुदञ्चद
शाकल्पलताया मूलमिव तमभ्यर्णवर्त्तिनं कुमारकेसरिणममृतरसायसेकसुभ
गेन दृष्टिपातेन समुपशीलयतः, सह तेन ननु क्व किल तारावली गमिष्यति
केन पथा प्रस्थितवती ? किमङ्ग सत्यमुर्वीतले प्रियसखीमवेक्षितुमगात् ? उत्तान्त
किमपि व्यपायरूपमन्वभूत् ? किमस्याः संवृत्तमित्यादि परामृशतः, क्षणं
क्व नाम तवासावुदयसुन्दरी दृष्टिपथमुपेता ? कथमवलोकिता ? किं कृतवती
किमुक्तवती ? कस्मादागता ? कस्य कुलवर्त्तिनी ? क्व वर्तत इत्यादि कथित

मप्यकथितमिव (श्रुतमप्य)श्रुतमिव ज्ञातमप्यज्ञातमिव पुनः प्रश्नैरावर्तयतः, हृदयानुवर्त्तकेन कुमारकेसरिणाऽपि मुहुर्मुहुराख्यायमानाभिरिमाभिरेव कथाभिरशून्यानि गमयतो दिनानि मेदिनीन्द्रस्य; जलदतिमिरा(प)सर्पणनिरर्गलोऽयं मयि सति लब्धप्रभो हरिणलाञ्छनः करैरनङ्गशरशल्य(निहत)मुद्यद्दयमुर्वीपतिं व्यथयतीति प्रोषिते शरत्काले, तामेव सततमुदयसुन्दरीं ध्यायतो नियतमभिनवयवोपान्तसञ्च(र)त्क्रौञ्चकुलकठिनकेङ्कारमुखरोऽहमसम्मतो नरपतेरिति निष्क्रान्ते हेमन्ते, हिमपरिग्रहेण मया स्मरानलकरालितावनिपचित्तसन्तापशा(मक)सुभगानि प्रलीयन्ते कमलकाननानीति निःसृते च शिशिरे, समयसेवोपचारमिव कर्तुं मलयगिरिशिखरसरसीतरङ्गजलजडिमसमधिकसमीरणव्यजनप्रगुणः, प्रगुणीकृताविरलव(कुल)कुसुमकोशभरितमधुरसजलार्द्रोपकरणः, स्वेदप्रतीकारकृते विकसदतिविशदसिन्दुवारसम्भृतानल्पतरपरागकैतवोपरचितकर्पूरचूर्णः, तल्पार्थमिव गृहीतनवनिरन्तरतरुप्रवालपेशलाभोगः समागतो वसन्तः।

यत्र—

सम्प्राप्तः सुहृदो वसन्तदिवसादेकोऽपि चूताङ्कुरः
कन्दर्पेण शरीकृतस्त्रिभुवने भिन्नक्रियं वल्गति।
मानं मानवतीषु कर्षति मनो मध्नात्यलं रागिषु
प्राणानत्ति वियोगिनीषु पथिकेष्वन्त्राणि निष्कृन्तति॥

अपि च—

यस्मिन्नमुद्रमुकुलारचिताम्रसम्प-
दुच्छृङ्खलेन मधुना हृदि वर्त्मगानाम्।
आस्फाल्यमानझषकेतनकङ्कपत्र-
शल्यस्वनं पिकरुतान्यनुमापयन्ति॥

यत्र च—

त्रिभुवनानन्दप्रदायिनः समदनलयकामिनीकर्णपूरविरचितारविन्दकोशप्रवेशलालसाः श्रान्ता इव वसन्तः पयोधितटारामग्रामेषु, शिशव इव खेलन्तस्ताम्रपर्णीतरङ्गदोलासु, अतिथय इवोपतिष्ठन्तः कावेरीचलन(कूलल ?)नागृहेषु, पथिका इव मिलन्तो गोदावरीजलतुषारसार्थेषु, मृगमदमशोलिखितानि कलयन्तः पण्डिता इव पाण्डीकपोलपत्राणि, धम्मिल्लवेल्लीगनानि चिन्वन्तो मालिका इव कुन्तलीशेखरकुसुमानि, मन्मथनिर्घातमुद्घाटयन्तः सिद्धा इवा(न्ध्र)

सीमन्तिनीस्तनकलशान्, केसरपरागोऽनिभृतोऽङ्कारा इव नम्रा: (मन-न्त: ?) कोङ्कणीनामङ्गलग्नेषु, पुन्नागमधुरसमोदिनो मत्ता इव मिलन्तो म-हाराष्ट्रकुटुम्बिनीनामूरुस्तम्भेषु, परिमलमिलितालिकलकलनिन: सुभटा इव लगन्तो लाटलीलावतीनां नखेषु, मन्दगमना: कर्णाटनारीकुचपत्रकस्तूरिकाप-ङ्किलपङ्केन, शीतलाश्लिष्टकलिङ्गरमणीकुचकलशगोपसेनाभि:, सुरभय: सवि-भ्रमाभीरभामिनीमुखामोदेन, चन्दनगिरिपरिसरोद्यानमण्डलादुच्छलन्तअलकु-सुमकनककलशकाभिनवभारतका: प्रसरन्ति दक्षिणदिगङ्गनाश्लेषमिलितकर्पूरसौ-रभसुगन्धयो गन्धवाहा: । किं बहुना—

भ्रूभ्रमिं केरलीनां मुकुलमृगदृशां निभ्रमोत्तंसदेशं
चोलीनां चारुकाञ्चीविषयमपि बलीमण्डलं सिंहलीनाम् ।
आक्रम्याम्भोधितीरे तरुकुसुमरजस्तम्भमुत्तम्भयन्तो
याम्या: पुष्पायुधस्य व्यदधत मरुतो राज्यमेकातपत्रम् ॥

अथ तत्र तरुणजनहृदयसद्मनि प्रवेशमङ्गलमुहूर्ते मन्मथस्य, व (वा?)यौवने तरुश्रियां, रसायने(कुसु)मानां, नायके सर्वर्तूनाम्, उत्सवे विलासिनां, शृङ्गार सुहृदि विकचविचकिलमकरन्दसुन्दरामोदमिलितषट्चरणचक्रनिर्लूनमानिनीमानकन्दले दलद्बकुलपाटलाशोकसहकारमधुरसभरासारभग्नाध्वनीनवर्त्मनि वसन्तसमये; निविडतरुपत्रपल्लवास्फालशब्दसुभगेन निभृतमुल्लपितवचनरच-नाभासमिवोच्यमानो मलयमारुतेन, मुकुरमधुमिलितकुटिलषट्चरणराजिरेखा-ग्रचलनसन्निवेशिभि: सभ्रूशिखास्पन्दनमिवानुमन्यमानश्चूतद्रुमै:, समीरणा-न्दोलनचलितहस्तकै: सहस्रसंज्ञमिव पूगीवनै: प्रेर्यमाणो राजा सदा मान्यमपि महत्तरं धैर्यमवधीर्य तस्यैककन्यकावस्तुन: कृते हृदयमनङ्गगृहे दासीचकार ।

तेन च—

प्रतिदिवसमादिश्यमानमानसो विशुद्धमन्मथहुताशनोत्ताप्यमान: प्रज्व-लन्तमिवाखिलं परिग्रहमपहाय, पीयूषदृष्टिनेव कुमारकेसरिणा परिगत:, शिशिरेषु हर्षवशविसारिविहरणरसप्रसक्तकलहंसकामिनीमुखविखण्डितोल्ला-सितमृणालनलिनकिसलय (विलाससरसीतटेषु) गिरिसमीरताडितनिविडता-डीरवोत्रस्तहरिणरमणीकुलतरलनेत्रनीलोत्पल(नि)करपेशलेषु लीलावनेचरस्थ-लेषु यौवनभरमन्थरोद्यानपालिकाविकीर्यमाणदृष्टिकाममञ्जरितलतानिकेतनेषु च प्रमदवनेषु रममाण:, पुरोऽवलोक्य सभ्रूक्षेपनिर्देशमुवा च कुमारकेसरि-णम्—अहो पश्य पश्य ।

एतस्मिन्नलिनीवनेऽस्य नियतं कान्तावियोगभ्रम—
भ्रान्तं चित्तमवाप्य षट्पदपतेर्लग्नोऽङ्गजन्मा ग्रहः।
तेनैष प्रलपन्विशृङ्खलमुखो राजीवधूलीभृतः
शून्यं भ्राम्यति सर्वतो मधुलिहामावेष्टितो वालकैः॥

अन्नच—

चक्राह्व(य)स्य शतपलवनप्रचार—
संलग्नसान्द्रमकरन्दरसप्रसिक्ता।
यामा(भूयो?)वियोगदुरितप्रशमाय····
लाक्षा सेवकवसु (वसेककलितेव?) वधूर्विभाति॥ (?)

इतश्च—

एष प्रभूतमुकुराहरणप्रसक्ति—
सन्तुष्टकोकिलनिकूजितकैतवे(न)।
चैत्रेण भू(चू?)तनिल(येन) निश्री(चो?)यमानः
पञ्च(श्चेषु?)सायकशिखाध्वनिरुल्लसास॥

अस्मिन्नपि—

क्रीडावने पश्य नवप्रभूतपुन्नागपुष्पान्निपतन्परागः।
गन्धोपलक्षोद इव स्मराग्निमुद्दीपयत्येष मनस्तु यूनाम्॥

इह हि—

चन्दनाचलसमीरदोलिता मूलमुक्तघनरेणुधोरणिः।
रागिणां क्रकचिकेव मानसं पाटयत्यहह चूतमञ्जरी॥

कुमारकेसरी च व्यञ्जिताशयैरमीभि(री)दृशैरालापवचोभिरवनीन्द्रस्य हृदयमाकलय्य विषीदन् अहो प्रगाढमिह गृहीतोऽयमनङ्गप्रहतकेन स्वामी, ना। प्यतोन्यत्र मया नीयमानोऽपि यास्यति, न चेदृशं प्रदेशमपहाय रागिणां निर्वृतिः, तदिहैव नाम कैरुपायैरुद्दिश्य च किमालम्बनमुदयसुन्दरीकृतामस्य मन्मथ(व्य)थामन्तरयामीति समन्तादुत्तदृष्टिरेकतो विलोक्य ससम्भ्रमं जगाद स्वामिन्! इत इतो निवेद्यतां दृष्टिरवेक्ष्यतामियमत्र वनवीरनाम्ना किरातराजेन कुतश्चिदासाद्य सरभसमानीयमाना, धुना च दारकेण वल्गायाम्, पर्याण सज्जिता, स्वागतोपहारढौकितेव सर्वर्तुराजेन मधुना, चरणसंचरणोपरोधदत्तेव दिक्पालैः, अनन्ययोग्येत्युपायनीकृतेव शक्रेण, वाहनैकरत्नमिति प्रीतिपरिकि-

त्पितेव वेधसा, प्रभूतवेगास्पदतया शरीरसिद्धिरिव मारुतस्य, प्रत्यक्षतेव वि-
हगस्य, रूपान्तरोत्पत्तिरिव गरुडस्य, जन्तुपरिणतिरिवाश्वनामाङ्किकप्राणप्रकर्ष-
नया, वेगमतिहठादाच्छोदयितुमिव रंहसा प्रसिद्धेषु प्रविष्टालोकहृदयेषु, त्रिवि-
क्रमवञ्चिभिरेव क्रमैर्विश्वमतिक्रमितुमीश्वरा, मङ्गलार्थमिव क्रमं चतुर्थमाबिभ्र-
ती, हयजन्मनोऽन्यस्य ग(ति)त्व(रा)मसहमानेव मुहुर्मुहुःस्फुरता घ्राणाग्र-
भागेन भासमाना, मुखान्तर्विरमता स्फुरन्मसृणहेषारवेण त्रिभुवनोल्लङ्घनप्रति-
ज्ञामिव कुर्वती, तेजसा सर्वतश्चलदङ्गतया धरणितलस्पर्शघृणयेव कम्पमाना,
गतिजवनिषेधकोपादाताम्रितेव मञ्जिष्ठारागपाटलं वर्णमादधाना, विशिष्टगुणा-
भासस्पृशा स्वरूपेण वातुल्यवाजिजातिमुत्कर्षयन्ती, महागमनवेगाद्बागतेर्भग्ना-
वस्थानार्थं(मार्गं?)मिव लम्बिनाभिरतिमसृणवनगसाभिर्मञ्जामिनेन वन्धुरा स्क-
न्धेन, स्निग्धा रोमभिः, तथा कर्णाभ्यामुपचितवल्लाप्यस्थि(स्थि?)मर्या मुखेन,
स्वल्पाकृत्याऽपि स्निग्धा पदन्यासे, अदृष्टपूर्वेव भूलोकसम्भवाकारविभ्रमधरा,
मनोहारिणी तुरङ्गी कुमारकेसरिकन्याराजा इत्यन्यतो ढौकृत्य तत्राम-
[illegible] सविस्मयमपानयत ।

इत्यागमतादेश च तया सह पुरः प्रामेन प्रणम्य विज्ञप्तः किरातराजेन-
देव ! अथ [illegible] ममागिरः परिस्कन्धुवि प्रचरतो ममाग्रे झगिति परमगाव-
[illegible] पपात, न जाने किं [illegible]
[illegible] स्वच्छन्दचारिणी [illegible],
[illegible] कस्यापि चाहनमेवं [illegible] । ([illegible]
[illegible]) [illegible] मया निरूपितम्—अहो !
[illegible] ? [illegible]
[illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible] ।
[illegible]
[illegible] । [illegible]
[illegible]
[illegible]
[illegible]

मास्ते । ततश्चात्मनः पर्याणपरिकरेण प्रगुणीकृत्य सेयमानीता देवस्य पादान्तिकम् । उपरिष्टाद्देवः प्रमाणमित्युक्त्वा विरराम ।

अथ कुमारकेसरिणाऽपि—अये निरुपायलब्धेनामुना रसान्तरेण राज्ञः सुदूरमन्तरयामि प्रस्तुतमनङ्गपीडाकरं रसमिति विचिन्त्य वीक्ष्य तां सम्यक् सर्वाङ्गमवगतस्वरूपेण विज्ञप्तः—स्वामिन् ! अवधार्यतामसौ तावस्य (तावदस्ति) नवधा तुरङ्गजातिषु तोकोराजातिरुक्तसै(व) । साक्षादष्टधा हयलक्षणे च संस्थाने तावदुच्छ्रायो दैर्घ्यं परिणाहश्चेति यथावदङ्गुलसंख्यया प्रधानमानोचितप्रमितिरुत्कृष्टैव, श्रवणयोश्च युगं यादृक्शास्त्रेणोक्तमस्ति तादृग्लघुतया श्रेष्ठं, मृदूनि च पश्य केसरत्वक्तनूरुहाणि, निर्मांसताऽपि जानुजङ्घाननेषु, नयनदशनस्तनेषु च वास्तवं स्निग्धत्वम्, असावप्युच्छ्रायवती ग्रीवा, खुरेषु निष्ठितमेव काठिन्यम्, पृथूनि च ललाटकटिस्कन्धपृष्ठाक्षिवक्षस्थलानि, किमुच्यते यथोक्तैव संस्थानगुणेनासौ वर्णेन च मूलवर्णचतुष्टयात्पाटलच्छविः । आवर्तैस्तु यथास्थानमुचितैरेव चिह्निता, ध्वनिना च सङ्खस्य(शंखस्य?) हेषते । देव सत्वं च सत्वेनाविर्दधाति । दधाति च छायामाग्नेयीम् । सुरभिश्च सौरभेण पङ्कजवनस्य, त्वरितया विलासवत्या च गत्या प्रचरति । सप्तधा प्रकृतिषु शुद्धैव सत्वप्रकृतिः । प्राणमपि तमेव प्रधानमाङ्गिकं स्पष्टयति । एवमेभिः शुभलक्षणैरक्षीणस्पष्टैरसावर्हत्यधिरोढुमारूढिनिर्व्यूढस्य स्वामिनः । तद्देव ! कौतुकादधिरुह्य वाह्यतामियम् । धारा हि याः किल विपश्चिताः पञ्च तास्वेकैका त्रिधा प्रकीर्तितेति सम्यक् निरूपय प्रथिताश्ववारधौरेय !, तासां क्रमं पञ्चधा मण्डले तु तथेत्युपदर्शय प्रकर्षात् भो ! वाहविद्ययोपहसितरेवन्त !, विधिं वाहनस्य षड्विधं च धरणीन्द्र ! सूत्रय, त्रिधा च वीथी तस्यानुचितक्रमेण वेगमारोपयतु वाहनविधिविशारदो देव इति आदराद्विज्ञप्ते तेन कौतुकी नरेन्द्रः सलीलमारुह्य तथैव तां वाहयितुमुपक्रान्तवान् ।

अत्रान्तरे च—

झटिति प्रधावन्नागतो दुरन्ताकूतविक्लवः, प्लावितोऽम्भसा श्रमजेन, गतिजवायासविहृताभिरनवरतनिःश्वासोच्छ्वाससन्ततिभिरन्तरितवदनवर्णपरिपाटिः, कर्मकरः करभकः—“ देव ! मुषिता मुषिता स्मः, पश्यतामस्माकमशक्यनिग्रहेण दुरात्मना कुतोऽप्यागत्य विध्वस्यमानमिदं रक्ष्यतां रक्ष्यतामुद्यान ”मिति सत्रासगद्गदमवादीत् । विस्मयोत्सुकैरुपान्तवर्तिभिश्च केन रे केनेनि युगपदापृच्छ्यमानो भयादनुद्गीर्णनामा तेन तेनेति जल्पन् नृपेन्द्रमत्रासयत् ।

राजाऽपि तेन तादृशा तस्योत्त्रासवचनेन विस्मितश्रान्तः सत्वरमाहत्य जङ्घाभ्यां तुरगीमनुपृष्ठधावितैः कुमारकेसरिप्रभृतिभिरनुस्त्रियमाणमार्गः क्षणात्तमुद्देशमासाद्य पुरो निहितदृष्टिरेकहेलयैव परमितस्ततो लतामण्डपाल्लतामण्डपमुर्वीरुहादुर्वीरुहमनुसरन्तम्, अ(न्वा) रब्धमशेषतोऽपि वनरक्षिभिः, अक्षामविक्रमं, हास्यरसमिव पार्थिवविकारेण परिणतम्, दुर्नयमिव प्रतिमया प्रतिष्ठितम्, वैरूप्यमिवानन्यरूपतया नियमितम्, चापलमिवैकवसतितया व्यवस्थितम्, कडारकान्तिभिस्तनुरुहैर्लग्नकपिकच्छुकेसरैरिवोपजातकण्डूतितया सततमङ्गेषु कण्डूयनस्वभावमुपशीलयन्तम्, चापलदुरुद्यमान्दोलितचन्दनमहीरुहतया चलितशिखरशाखाग्रविघटितेन क्रोधात्पश्चाद्भागलग्नेन गोधूमरोचिषा भुजङ्गमेनेव पिङ्गत्विषा लाङ्गूलदण्डेन भ्राजमानम्, फालवशमिलितबिम्बीफलपाटलरसेन लिप्तया वदनसम्पदा दशनदलितकुम्भकर्णनासासृजा प्लावितमुखं सुग्रीवमिव दृश्यमानम्, पाकारुणगभस्तिनि नारङ्गफले प्रसारितकरं शिशुभावचापलाद्बालरविबिम्बमाकर्षन्तं हनूमन्तमिव प्रतीयमानम्, इतस्ततो दृष्टनष्टतया रणरसोद्यच्चापलं नीलमिवोपलक्ष्यमाणम्, प्रेङ्खता जात्यकनकदलोद्योतदीप्रेण प्रभापिण्डेन जलदपण्डात्तडिल्लोलमिव श्यामलतमालशिखराचम्पामधः क्षिपन्तम्, तारकवनश्च गगनादुल्कापुञ्जमिवोद्गुल्ममाधवीमण्डपात्कालेन निःसरन्तम्, क्वचित्कपिशेन वपुषा परिणामपिङ्गलं फलमिव पनसतरुस्कन्धेषु लम्बमानम्, क्वचिद्यावककचा वदनबिम्बकेन फलर्द्धिमेकोत्तरां दाडिमीविटपेषु दर्शयन्तम्, क्वचित्कपिलोत्फुल्लरोमशया लाङ्गूलश्रियाकपिशकेसरविकस्वरां मञ्जरीमिव लतामण्डपेषु सृजयन्तम्, हरजटाग्रपिङ्गलया प्रज्वलन्तमिव देहत्विषा, प्रचलद्विरलाङ्गभागेन उत्पतन्तमिव चापलेन, फलग्रहादर्शितकरेण विस्तरन्तमिव दुर्नयेन, रक्षिजनकदर्थनोपकल्पितेन हसन्तमिव दन्तनिष्कर्षणेन, विरूपकनटर्वाचरपात्रेषु, विटङ्कान्तारनगरेषु, भाण्डारमागमग्रामफलानाम्, प्रमादच्छिन्नकमनीयश्रियाम्, विभीषिकाप्रभेदमिव वनदेवतानाम्, हास्यपात्रमिव महाभूतानाम्, उद्यानप्रियमिव नरदिग्वर्गपर्वशिनम्, नियमयन्तमिव फलाहारिणम्, महाकायमद्भुताकारमातुरमनिजवं प्लवङ्गमद्राक्षीत् ।

दृष्ट्वा च साश्चर्यम् अहो महत्त्वमङ्गानाम्, अहो भासुरत्वमाकृतेः अहो चतुरता चेतन्यवृत्तेः, अहो आन्तिरागम्यकलादानस्य । यथाऽस्य निर्गताभा- [illegible] मानुषस्यवर्णा व्यापारः, यथा कृतगजन्मनोऽपि दशामर्शनत्वम्, यथा

रक्षकचमूविमर्दकमिदं च सामर्थ्यम्, तथा तर्कयामि केनाप्यन्तस्तिरोहिता-कारेण वस्त्वन्तरेणामुना भवितव्यम्। ये हि रामायणे सुग्रीवनलनीलाङ्गद-प्रभृतयो दिव्यांशवन्तः श्रूयन्ते, ते किमन्यादृशाः केचिद्भविष्यन्। अथवा मध्यवर्त्ती तेषामेकोऽद्यापि हनूमानास्ते । स यद्यसावमीभिरनन्यशक्तिभि-श्चेष्टितैर्भवति तद्भवति। भवतु, सामर्थ्यमेव ज्ञापयिष्यति यः कश्चिदयमिति। दृश्यतां तावदिति चिन्तयन्नभिमुखमुपागतेन तदुपसाधनानुबन्धभावनानु-विष्टेन विज्ञप्तो वसन्तशीलेन देव ! कुतोऽप्ययमेवमागत्यागत्य प्रतिदिनं वन-रक्षिपुरःसरानस्मान्न किञ्चिदिव मन्यमानो नवपाकमधुराणि नाभिवाञ्छित-फलानि सर्वतो विलुप्य स्वयमनास्वादयन्नये ! कुत्रचिद्याति किलाद्य निगृ-ह्यते श्वो निगृह्यत इति न गतो गृहीतुमस्माभिः । अद्य पुनः प्रसङ्गसमा-गतस्य देवस्यापि ज्ञापितमित्यादिवचनादधिकवर्धिताद्भुतरसो राजा तं स्वय-मुपक्रान्तवान्।

अथ सोऽपि—

वालरविरक्तवदनः सम्पदमाच्छिद्यनिर्गतोविपिनात्।
दुर्वासर इव भूभृत्युपस्थिते शुभदशाप्रतिमे॥

ततश्च—

उत्क्षेपणान्यसनशौण्डपदक्रमेण
पूर्वाङ्गमुन्नतमनुन्नतिमच्च कुर्वन्।
पश्चान्मुहुर्वलितकण्ठमकुण्ठवेग-
मत्रात्र दृष्ट इति निस्सरति प्लवङ्गः॥

राजा तु तेनोद्यानविप्लवक्रोधेन क्वनु पुनरसौ किमर्थं च स्वयमनुच्छि-ष्टानिफलान्यादाय यातीति महता कौतुकेन च प्रेरितो झगिति दत्वा कशां तुरङ्गयाः साग्रहं पृष्ठतो दधाव। क्षणाच्च स तथाऽतिसत्वरं विनिस्सरन् कपिरित इतोऽयं प्राप्यत इति सप्रत्याशमनुसरन्तमनुमार्गलग्नैश्च कुमार-केसरिप्रभृतिभिः स्तोकान्तरमनुसृत्य चरणगतिवेगभङ्गतया स्थितैस्समुज्झित-मेकाकिनं नरेन्द्रमतिदूरमाचकर्ष।

तथा सुदूरमाकृष्टो व्रजन्राजा तमतिवेगलाघवानुकृतमारुताङ्गजं प्लवङ्ग-मनुसरन्त्या मुखादवगलन्तीभिरतनुफेनवल्लरीभिरतनुवेगोज्झितस्य पश्चादाग-च्छतो मरुतः पन्थानमिव(चि)ह्नयन्त्याः, परस्परमुभयोः स्पर्धयेवाग्रमग्रमनु-सरतोरग्रचरणयोर्द्वयेन समागतां ककुभमधि प्रधावन्त्याः, रयातिरेकमाकलय्य

तुरङ्गयाः सकौतुकमहो किमियमुत्पतिता वियत्पथेन याति, किमुत्क्षिप्य केना-प्यदृश्यमूर्तिना नीयमाना तिष्ठति, किमेतदङ्गसंक्रान्तः कश्चित् छद्मवानेवं प्रस-र्पति, किमीदृशमेव जवस्वरूपमस्या इति बहुवितर्कव्यग्रतया मुहूर्तमकृतावधानः सहसैव परमनेकतरुशकुन्तकूजितारावतुमुलैरुद्बोधितेन मनसा दत्तदृष्टिरकस्मा-दात्मानमेकत्र महावने पतितं व्रजन्तमद्राक्षीत्। वीक्ष्यते यावत् तावत्स खलु महीध्रमेदुरो नास्ति शाखामृगोऽपि, अग्रे केवलं निवारयितुमिवाग्रतो गमनमन्तरे स्थितम्, छलितविन्ध्यगिरेरगस्त्यस्य रोषाद्वर्धितमिव पिधाय दक्षिणां ककुभ-मवतिष्ठमानमेकं गौरीतपश्चरणपञ्चाग्निना विलीनतुहिनं हिमाद्रिमिव, हरपद-स्पर्शप्रभावादपगतस्फटिकपाण्डुकुट्टिमम्, कैलासमिव, वार्धकेन गलितकाञ्चन-च्छविं सुमेरुमिव, अदभ्रशिखरकृताभ्रं भूधरमपश्यत्।

उपजातविस्मयश्च त्वरितमाकृष्टरश्मिवलयो विधृत्य तुरङ्गीमुपसृत्य च घनच्छायातिशीतलं तलमनोकहस्य श्रमभरातिमन्थरया दृशा निरूप्य सन्नि-वेशमशेषतो दिशां सम्भ्रान्तहृदयश्चिन्तयाञ्चक्रे—अहो ! क्वाहमिह महावने पतितः, कतम एषोऽपि ब्रह्माण्डफलककीलको विसङ्कटः सानुमान्, क्व सो-ऽस्मदवनीप्रवेशः, क्व ते कुमारकेसरिप्रभृतयः सहायाः, कियन्तमध्वान-मियमुल्लङ्घितवती महाजवा तुरङ्गी, न चैतस्या वेगलाघवमिदमदृष्टपूर्वमालोच-यता व्यग्रेण मया समुपलक्षितोयमुज्झितस्वीकृतो भूविभागः, क्व चासौ कपिर्यदर्थमनुपृष्ठधावितोऽस्मि, किमदृश्यो भूत्वा क्वचिद्गतः, किमिह माया-विना तेनाहमाकृष्य छलादानीतः, करिष्यति वा किञ्चिदुपरिष्टादन्यदप्यसौ, किमियमित्थं प्रवृत्तिः किञ्चिन दर्शयिष्यति कर्मणोऽनुरूपं फलम्, किमेव-मीदृग्विधं प्रातिकूल्यं वा विधेः, इदानीं किमत्र क्रियते, किमु व्यावर्त्य तुरगीं पश्चाद्व्रजामि, किमग्रेतनीं भुवमनुसरामि, किमिहैव तावत्तं हताशमदृश्यीभूतं वनौकसमन्वेषयामि, यदि तावदियमीदृग्विधा ललितैव तुरङ्गी ततो मे न दूरं निजनिवासनगरं संप्राप्तिः (मुं ?) स पुनरास्पदं महाद्भुतस्य कथमवेक्षितव्यो वलीमुखः, यद्वा सर्वेऽपि परमघर्मार्तिभृतः पिपासिताश्च नितान्तशीतलमति-स्वादुसलिलमुपकूलफलवद्वनीरुहं जलाशयमधिश्रयन्ति तत्तमहमाश्रयामि, तत्रापि यदि नैष प्रत्यक्षतामेष्यति ततः किमनेन, मनः प्रवृत्तिरेव कौतुक-मकौतुकञ्च कल्पयति, तावत्खरातपसमयसर्पणश्रमकदर्थितामिमां तुरङ्गी-मात्मानं च जलाद्युपसेवनैरुपजनितसौष्ठवं विधाय कालोचितं करिष्यामीति निश्चित्य चलितस्ततो द्रुमतलात् समंधरमचारमितस्ततो निभालयन्नातिदूरमा-

नन्दजनितकूजितारावमुखैरराख्यातविषय इव हंसादिजलपत्त्रिभिः, अनिलान्दोलितशिरोभिः संज्ञितजलाशय इव तरुभिः, अभिमुखसमागतैश्च कृताभ्युत्थान इव साम्भोजसौरभैर्वायुभिरूढ़तनिश्चयः सप्रमोदमनुससार तां दिशम् । अग्रे च तस्यैव भूभृतो मेखलायामत्यन्तशीतलाभोगं प्रभेदमिव हिमस्य, संस्कारमिव चन्दनस्य, परिणाममिव चन्द्रमसः, सन्तानमिव शीतकालस्य, राज्यभ्रंशमिव निदाघस्य, सञ्चिताम्बुसर्वस्वं कोशमिव वर्षागमस्य, सुस्वादुजलमयं रूपान्तरमिव समुद्रस्य, विविधोर्मिचमूचलनदुस्तरं चक्रव्यूहमिव वरुणराजस्य, यमलजातमिव द्वितीयं मानसस्य, वर्त्तुलिमशालिना पालिवलयेन ठकारमिव महीमातृकायाः, निरालम्बनतया झगित्येकत्र पुञ्जीभूय निपतितं भरमिवाभ्रगङ्गायाः, धर्मोपमर्दरौद्रस्य कलेः प्रसरमालोक्य मन्त्रयितुमेकान्तमिलितानां मन्दाकिनीस्रोतसां त्रयमिवाबद्धमण्डलीरूपेणोपविष्टम्, सुरपतिफणीन्द्रयोरुत्पन्नविवादे पाताललोकादाकृष्टमन्तरालेविमुक्तममृतकुण्डमिव विस्तीर्यं जगत्यामास्थितम्, शैत्याभिलाषपतितयेव छायया तटतरूणाममुच्यमानशीतलतरङ्गम्, तरङ्गसंगतालम्बिशाखाग्रपल्लवमुखैः स्वादुताप्रलुब्धैरिव तीरशाखिभिरनवरतमापीयमानसलिलम्, क्षारसागरजलोद्विग्नैः सुधामधुरवारिग्रहार्थमापतितैरभिनवाभ्रपटलैरिव पृथुभिरम्भोजिनीदलैः समन्तादा(वृतम्,)सुनिर्मलाम्बुतया प्रतिबिम्बितेषु बहुपदार्थेष्वेकतः प्रतिफलितमूर्तिना गगनपिधानकेनेवाल्पकत्वादन्तःपतितेन महत्वमद्भुतं बिभ्राणम्, अन्यतस्संक्रान्तबिम्बया परिसरविलीनवनराजिरेखया विततवाडवधूमच्छद्माङ्कितक्रोडमपरमष्टमं पयोधिमिव प्रतीयमानम्, अपरतः प्रबुद्धविशदारविन्दप्रतिबिम्बैरातपत्रैरिवातपाद्रक्ष्यमाणसैन्यमन्तर्निवासिनं वरुणमाविर्दधानम्, शनशः प्रतिबिम्बितैश्च पृथुदलस्तबकपूरितमौलिभिस्तटतालशाखिनामाकारैरमृतकुण्डधिया पातालान्निस्सरद्भिरनेकफणैर्भुजङ्गैरिव भ्राजमानम्, अनिलतरलिताविरलशीकरनिर(न्तर)दुर्दिनोत्सवपदं चातकानाम्, कमलसौरभसुगन्धितं विलासभवनमिन्दिन्दिराणाम्, विकसित बहलकुवलयान्धकारसंवलितं संकेतकं सारसद्वन्द्वानाम्, सुस्वादुशीतलजलं प्रपासत्रमटवीचराणाम्, स्निग्धनवमृणालादिकन्दकमनीयं रसवतीस्थानं कलहंसवयसाम्, कमलपरिमलमिलितालिमण्डलमनोहरं धृतमेघडम्बरातपत्रमिव जलाशयैकाधिपत्येन, क्रीडन्मकरपुच्छाच्छोटनसमुत्थितोदच्छटं समुत्तम्भितपताकमिव जलोमेकेन(द्रेकेण, ?)बहलकल्लोलतरलं कम्पमानमिव शैत्येन, तटान्तामलितडिण्डीरवल्लरीनकटमापातपरितानि

१०—१८ ददर्श

महत्तरत्वेन, निर्मुद्रमपि मुद्रितोपकण्ठं श्वापदपदैः, दुस्तरमपि तीर्यमाणं तरङ्गैः, अस्ताग(अगाध?)मपि लब्धमध्यं पयोभिः,अमलमपि मलिनमिन्दीवरप्रभाभिः, पवित्रतोयमपि मिश्रितमरविन्दमम्बु(धुबिन्दु ?)भिः, क्वचिज्जलदेवताञ्जनकूपिकाभिरिव दन्तुरं कुवलयकलिकाभिः, क्वचिद्वरुणवाराङ्गनाशृङ्गारयावकक्षेपपात्रैरिव पाटलमुन्मिषितरक्तोत्पलैः, क्वचिद्वारिलक्ष्मीनिमन्त्रितानीतनववधूवरैरिव पिञ्जरं चक्रवाकमिथुनैः, क्वचिच्चटुलवल्गिभिश्चलदिव जलकुक्कुटकुटुम्बकैः, क्वचिद्धवलकान्तिभिर्हसदिव चकोरपेटकैः, क्वचिन्मसृणवाणिभिर्जल्पदिव कुररसन्दोहैः, क्वचिद्दीर्घमाराविभिर्गायदिव कुमुदषट्पदैः, उल्लसता जलेन द्रावयदिव मेदिनीम्, उत्फालशालिना तरङ्गचक्रेणाक्रामदिव दिशः, समुत्पतता शीकरकदम्बकेन व्याप्नुवदिवान्तरिक्षम्, श्रुतमेव तापापहारकम्, दृष्टमेव तृष्णाहरम्, जलकुञ्जैररण्यनासादिततलम्, लहरीभिरप्यदृष्टपारम्, अपारप्रसरमुपतीरसम्भृताङ्गं तडागमद्राक्षीत् ॥

उद्वेल्लन्नवनीरजव्यजनकव्रातोदराकर्पितं
यत्रातिस्थिरगन्धवाहतुलितं गन्धं गृहीत्वा नवम् ।
भृङ्गास्तत्क्षणलब्धसौरभरसादुन्मादवन्तो भ्रम-
न्त्यग्रेऽग्रे नलिनीश्रियः कृतरवं ग्राम्या भुजङ्गा इव ॥

अपि च—

यत्र—

पूगीवलयवल्लाले गर्भे (ह्लीलागर्ते ?) रङ्गे स्थिता इव ।
खेलन्ति लहरीदण्डैर्दण्डरासमपां श्रियः ॥

तदवलोक्य झगित्युपनतवितर्कश्चिन्तयाञ्चक्रे ।

व्यावृत्त्य ध्रुवमागतः स भगवान्भूयोऽप्यगस्त्यो मुनि-
स्तेनैते चकिता इवोर्मितरलाः सन्तोऽपि वाराशयः ।
अत्रागाधगभीरगर्भगुरुणि स्वैरं प्रविश्य स्थिताः
पालीपिण्डमिषेण पूर्णवचनो विन्ध्यश्च वृद्धिं ययौ ॥

इत्येवमनुचिन्त्य सहर्षमाप्यायितमनाः सरभससमुत्तीर्य विसृज्य पर्याणमुल्लोढनस्नपनजलपायनादिभिः सन्तर्प्य च सङ्कलय्य लतावल्कलेन तुरङ्गीं नवहरितदूर्वाङ्कुरमनोहारिणि परिसरे स्वैरं चरन्तीममुञ्चत् । स्वयं च तुरगीखुरशिखरखण्डिताध्वधूलिभिराधूसरं प्रक्षाल्य चरणयोर्युगलम्, आकृष्य च स्वयमम्बुजादिजलजकुसुमैश्चकार माध्याह्निकीं देवतोपास्तिम् । अनन्तरं

चाभ्यवहृत्य प्रत्यग्रसरसानि मृणालीकिसलयदलानि तीरतरुलताफलानि च पीत्वा च तरुच्छायातिशीतलं सलिलम्, आसन्नवर्त्तिनः शाखासन्दोहबहलस्य तमालविटपिनो मूलवर्त्तिनीमनुसृत्य च छायामुपाविशत्।

उपविष्ट एव च हृदयीकृत्य तं वलीमुखमशेषतो जलावतारवर्त्मसु तटतरुशिखरेषु लतान्तरेषु गुल्मसन्धिषु कन्दरदरीमुखेषु च प्रहितचक्षुरालोकयत्। कियन्तं क्षणमतिक्रम्य मनस्यकरोत्—अहो न तावदिह दृग्विषयमागतोऽसौ दुरात्मा कपिः, कान्तारमिदमसञ्चारगोचरं च मानुषाणाम्। तथाह्याश्रयोद्देशलेशोऽपि न क्वचिदालोक्यते प्राणिनाम्, प्रायःश्वापदान्यपि न नाम सञ्चरन्तीह दुर्वने, तत्किमेवमत्राऽऽसितेन, तेऽपि कुमारकेसरिप्रभृतयः क्व स्थिताः, क्व किलास्माननुसरिष्यन्ति, क्व चान्वेषयिष्यन्ति, क्व वा भ्रमिष्यन्ति, किं करिष्यन्ति, कथं वर्त्तिष्यन्ते तपस्विनः, तद्यदि प्रीतिमुपगतेयमनुना सरसदूर्वाहारचारेण तु(र) गी, ततो व्याघुट्य पृष्ठतो व्रजामीति संचिन्त्य तदभिमुखं निक्षिप्तचक्षुरकस्माच्चरन्त्यास्तस्याः पूर्वचरणयोरग्रवर्त्तिनमुल्लसितमांसलमरीचिवल्लरीपरीतपुलिनपदम्, पुष्पमिव विद्युल्लतायाः, गुच्छमिवाशेषप्रदीपकलिकानाम्, नभसः पतितं गर्भाण्डकमिव भगवतः पतङ्गस्य, ज्वलन्तं चितापुञ्जमिव निशातमिस्राणाम्, रविणा परिगृह्य सुभगीकृता द्यौरियमिनीव स्पर्धया धरित्रीं स्वीकर्त्तुमागतं, पुरः सौरभ्यलोभागतैः क्वणत्षट्चरणचक्रालोकविदलनापराधभीतिसङ्कुचितैरिव तमिस्रपटलैः प्रसाद्यमानम्, अनिस्वच्छतयाऽन्तर्दृश्यमानव(गि?) लितानु(न्ध?)कारशकलानीव संक्रान्तासन्नविटपदलबिम्बकान्त्युत्क्रान्तम्, अन्धकारशतैरप्यचिन्त्योऽयमिति सौख्यार्थिभिरिवाशेषतेजोभिराश्रितम्, दूरप्रसारिभिः करैस्तमालश्यामान्धतमसमलिनितान्याशामुखानि क्षालयन्तम्, सर्वतोविजृम्भितेन तेजसा सकलमेकमूर्त्तात्मकं जगज्जनयन्तम्, अलङ्कावमिवापादयन्तमम्बरस्य, निकामनिर्मलमतिमनोहरं मणिमपश्यत्॥

दृष्ट्वा च विस्मितेन म(न)सा समन्ताद्दृष्टिक्षेपैर्नैकोप्यवर्तानि दृष्टं निखिलं ननु कोऽयमिह स्वभावगरिमगौणीकृताशेषरत्नजातिरपूर्वो मणिः, कथमिदं सर(स्तीर)मनुप्राप्तः, कुतश्चैवमवक्रं शङ्कुस्थितिरन्वृत्, नियतमयमनन्यैर्मर्त्यान्विभिः सदैवाप्रहतेन च महसा (सहस्र)करमिष्टिनं (मिनं?)त्रिधामाग्निमिनेजकं भगवन्तमपि गुणनिमित्तमानि, निर्मलतयाऽवकृष्टमाकूतं कौस्तुभमतिशेते। किं च निष्कोपनया मुनीन्द्राणामपगतवासनया च सुराणां स्पर्धते मनोभिः, अपिचामुना जिनप्रभः कौस्तुभो लक्षित इव वनमालाकणुमसितवक्षान्तका-

रितं हरेर्वक्षस्थलमधिष्ठितः, चिन्तामणिरप्यनेन सादृश्यमात्मनोऽभिवाञ्छन्निव दानादभीष्टं फलमित्यर्थिनां चिन्तितार्थदाने प्रवृत्तः, अन्ये च मणयः प्रभापराभवभयेनेव, केचिदगाधाम्भोधिमध्यवर्त्तिनो नाविर्भवन्ति, केचिदाश्रितरोहणाद्रयः समन्तादात्मानमतिप्रभूतया मृदा प्रच्छाद्य तिरोबभूवुः, केचिच्च रसातलं प्रविश्य फणीन्द्रफणापञ्जरमधिश्रितवन्तः, किमिह नाम लात्वा निर्गच्छतः कस्यापि विस्मृतः, किमम्बरे विमानगामिनो जनात्परिभ्रष्टः, किं वाऽन्यतः केनापि वन्यप्राणिना पक्षिणा वा कुतश्चिदाहृत्यात्र निक्षिप्तः, यथा च मधुव्रतोपसेव्यमानबहलपरिमलोद्गारवाही सिन्दूराङ्कितश्च कचित्तथा तर्कयामि सौरभ्यसम्भृताङ्गावयवसङ्गिन्यलङ्करणे कस्याश्चिदङ्गनाया विभूषणमसौ तदेनमादाय पश्यामीति परामृश्योत्थातुमिच्छो राज्ञः समीपं खलु कथञ्चन तत्खुरप्रहृतिवेगादुच्चलितो मणिरग्रे पपात ॥

सा च परं तेन मणिस्पर्शप्रभावेण झगिति तुरङ्गयारूपमुज्झित्वा तदेव जटावल्कलोपवीतधरं शरीरमावहन्ती तारावली बभूव । राजा तु तं प्रभावभूयिष्ठं मणिमात्मनोऽग्रे पतितमालोक्य ननु कीदृगिदमिन्द्रजालसोदरं कुतूहलमिति विसर्पता विस्मयेनाकृष्ट इव तस्मान्मणितो निवर्त्य निश्चलेन चक्षुषा रूपान्तरेणोज्झितामभिनवामिव तारावलीं द्रष्टुमारेभे । साऽपि स्वमूर्तिलाभरभसितमात्मानं विभाव्य तेनाद्रिणा सरसा च निरुद्धमध्यं तन्महारण्यमितस्ततो विस्मिता निभालयन्ती सरभसमेकहेलयैव विनिहितविलोचना साधु साधु चिरादनुगृहीताऽहमभीष्टघटनया देवताभिः । कुत्रेह क्रूरवनचरावतारदारुणारण्यसरसस्तटे त्रिभुवनश्रियः सीमन्तरत्नमित्थमनुचितावस्थानदुःस्थितमभूदित्यालपन्ती दूरतोऽपि प्रसारितकरा त्वरितमद्रेरभिमुखी दधाव ॥

राजा तु तथा प्रवृत्तायां तस्यां सवितर्कमहो कोऽयमालापस्यान्यथावृत्तिरुपक्रमोऽमुष्याः । मणिरसौ ममाग्रे तिष्ठत्येषा तु धाविता सन्मुखी शिलोच्चयस्येति विस्मयात्तत्रैव यावन्निरूपयति पङ्कजदलायतं चक्षुस्तावदादौ यस्मिन्न किञ्चिदेव गिरेर्भित्तिमात्रकमेव केवलमालोकितं तत्र परमकस्माद्भूमीध्रगर्भे विचित्रनवरचनामनोहरं माणिक्यमणिमन्दिरमपश्यत् । तस्माच्च मत्तकरि(परि)चितया गत्या सलीलं निःसरन्तीम्, अनुहरन्तीं च तमेव चित्रप्रपञ्चितं रूपम्, आप्यायिकां दृशोः शशिबिम्बदलोपरचितामिव चन्दनकरम्बितामिव कर्पूरपिण्डितामिव कमलमसृणितामिव सुधोपशालितामिव मूर्तिमुद्वहन्तीम्, नखकुसुमशोभितया चरणपल्लवश्रिया लतामिव सौभाग्यभूमावुद्गताम्, ऊरुस्त-

म्भवतीं चित्रशालिकामिव रतिनिवासाय कल्पिताम्, जघनचक्रोपराजितां कर्मशालामिव कन्दर्पकुलालस्य विश्रुताम्, गभीरया नाभ्या मूषावर्तीं वातिकि(गे?)न्द्रविद्यामिव शृङ्गाररसमादधानाम्, वलित्रयतरङ्गिणीं सरितमिव सौन्दर्यदेशान्तर्विस्तृताम्, सुवृत्तपीवरेण (स्तनयुगलेन) माणिक्यनायकवतीं रत्नावलीमिव त्रिभुवनश्रियः, नयनशफरोत्फालवतीं वेलामिव लावण्यसागरस्य, भ्रूचापलवलयिनीं वीरवृत्तिमिव तारुण्यसुभटस्य, मुखसरोजसुन्दरां पद्मिनीमिव ब्रह्माण्डसरोवरस्य, विधिना निर्माय त्रिभुवनमनोहरामिमां मा कोऽपि द्रक्ष्यतीति गोपायितुमिवारण्यगह्वरे विमुक्ताम्, मृणालिकाभरणां जलदेवतामिव कौतुकात्स्थले सञ्चरन्तीम्, करकलितलीलाम्बुजां लक्ष्मीमिव कमलवनात्क्रीडया भ्रमन्तीम्, कुसुमोत्तंसभासितां वनश्रियमिव शैत्याय सरस्तटे पर्यटन्तीम्, निर्माणसर्वस्वं भव्यतायाः, धारागृहमतुच्छकान्तिच्छटानाम्, फलं कन्दर्पकुसुमस्य, तीर्थं लावण्यसलिलस्य, पात्रं शृङ्गाररसस्य, मदनार्त्तिदशाजाड्यपाण्डुरं गण्डयोर्युगलमादधानाम्, तारावलीसम्मुखमालिङ्गनसमुत्सुकामायान्तीमुदयसुन्दरीं ददर्श ॥

दृष्ट्वा च सचमत्कारमारमाधूतमौलिः—अहो साध्वभिहितवती यथार्थवचना तारावली, सत्यमेव त्रिभुवनश्रियः सीमन्तरत्नमसौ मृगाक्षी, मुधैव मया धारितोऽयं मणिः । किं च यथाऽऽख्यातं कुमारकेसरिणा यथा दृष्टं च तत्र पटे तथाऽभ्यधिकमेव रूपं तस्याः । किमुच्यते ।

तथाहि—

निक्षिप्तमम्भोजभवेन रूपसर्वस्वमस्यामिति तर्कयामि ।
कुतोऽन्यथा कार्मुकपाणिरेष जागर्त्ति रक्षार्थमिवाङ्गजन्मा ॥

अथवा—

सा श्रीरियं खलु यया जन एष याति-
हाराद्यलङ्कृतिविकस्वरमीश्वरत्वम् ।
दृष्टिः प्रहर्षजलबिन्दुमिषादतोऽभू-
देनामवाप्य नवमौक्तिकभूषणा मे ॥

किं बहुना—

यत्संलीनमनिद्रचम्पकदलच्छायाभिरामश्रुता-
वेतस्यां किल मे प्रसूनधनुषो रागेण रक्तं मनः ।

तेनैवारुणरत्नशारतरलेनैवान्विता काञ्चनी-
भूषाऽभूद्भिलस्त्रियेपि जगतामस्त्वे(मेपे?)ति मे निश्चयः ॥

अहो यत्किञ्चन वैधेयता विधेः, अहो प्रभावः कर्मपरिणतीनाम्, अहो विचित्रता संसारस्य, येनेयमीदृग्विधाप्याकृतिरिदं वनवासक्लेशमनुभवति। येनेयमित्थमरण्यमध्यास्ते। तारावली च तुरङ्गीरूपमनुप्राप्ता। तत्सर्वमनुभवाम्यन्तरच्छादनेनैव तरोः प्रकाण्डेनान्तरितः शृणोमि तावदिति विनिश्चित्य निभृतं तस्थौ ॥

क्रियमभीष्टं दैवतमपूजयम्, आगता च तथैव माणिक्यभवनगर्भमित्थमेतेन प्रगुणितैरनेकनवपाकशालिभिः फलैराहारमकार्षम् । निर्वर्तितदिवसकृत्यायाः सुखनिषण्णायाश्च तल्पतले मम स्वयमसौ कपिरविरतं द्वारि स्थितो रक्षामकरोत् । एवमन्यदाऽपि यदा तु क्वचित्फलादिकमाहर्तुमुपयाति तदा तामेव गिरिभित्तिमनन्यगम्यां पिधानं दत्वा मद्भवनमन्येषामलक्ष्यगोचरं विधाय प्रयाति । न चात्र दुरन्तवनगह्वरे पतिता दिङ्मोहवहुलिता क्व यामीति जानामि । नापि तस्य कपेः सकाशात्पदात्पदमपि गन्तुमन्यतः प्राप्नोमि । तेन च बलवताऽधिष्ठितमिदमरण्यमालोक्य सर्वेऽपि वनप्राणिनस्त्रासेन सुदूरमुज्झाञ्चक्रुः ॥

तेनैवं काननेऽस्मिन्ननिलरविकरस्पर्शमात्रोपसर्प-
त्सम्पर्कं पाल्यमाना विगुणदिनदशादुस्थितिं प्रे(क्ष?)यन्ती ।
पञ्चेषुप्लोषपीडामिह सरसि बिसाम्भोजसेवोपचारै-
(रारब्धै)र्मन्दयन्ती विधिललितमितोपीक्षमाणा वसामि ॥

कः पुनरसौ कपिः, केन वा निरूपितः, किंहेतुकश्चायमीदृशोऽस्य मदङ्गपरिपालनक्लेशः, कथमहमिहागतेत्यादि न ज्ञातम् । अद्य पुनः स्नानक्षणे स चूडामणिरादाय यथैव मया समयातिक्रमसमुत्सुकया शिथिलग्रन्थिबन्धमुत्तरीयाञ्चले बद्धस्तथैव देवमभ्यर्च्य त्वरागमनव्यग्रतया विस्मृतस्ततो वसनाञ्चलाञ्चिताङ्गभारेण विच्युतग्रन्थिरपतदत्र क्वापि । स्नातश्चेदानीं तेन शून्यं सीमन्तकास्पदं गतेन कथञ्चन पाणिना । तमन्वेषयितुमदूरमित्यनुत्थापयन्त्येव कृपया तमनुगामिनमद्य केनापि दूरात्खेदितमिवायातमतिश्रमेण निद्रागतं वनौकसमेकाकिनी समुच्चलिताऽहमिह । त्वमपि प्रियसखि संक्षेपतः कथय तारावलि मद्वियोगकृतो वासरादारभ्य समस्तं वृत्तान्तमात्मनोऽपि जटावल्कलपरिग्रहमस्वभावमिममिहागमनं च । स किं दृष्टिपथमागतस्ते कुतश्चिदियता कालेन मम मदनार्तिहेतुर्युवा न वेति ससम्भ्रमं पृष्टा तारावली तत्क्षणमदर्शनक्षणात्प्रभृति निजं वृत्तान्तमारभत निवेदयितुम् ॥

सखि श्रूयताम् । उदयसुन्दरि तदा शयनादुत्थाय त्वामपश्यन्ती नितान्तविधुराऽहमेव त्वदन्वापुरस्सरस्य स्वामिनः शिखण्डतिलकस्य ज्ञापितवती । तेन चैवमन्वेषयितुमनुप्रेषिताः सर्वतोऽपि चराः । त्वद्वियोगदुःखिता चाहमप्येवं त्वदन्वेषणकृते निर्गता गता दैववशादस्य गोचरम् । एवं ततो रक्षिता तेन तव हृदयनन्दनेन । दृष्टश्चैवमतावालापिनश्चैवं ज्ञातश्च नामान्वयनिवासस्थानसंवेदनादेवमेव च तेन कुमारेणातिरिक्तप्रश्रयमुपदर्शितः न ते जीवितं

चित्रपटः । ततः स्वामिनि ! अहं तेन चित्रपटालोकनेन द्विगुणितभवद्विरह-दुःखा त्वदनुरागविधुरितं राजानमक्षमा समीक्षितुमिति तामतिक्रम्य कृच्छ्रे रात्रिमुपस्येव त्वदन्वेषणाय भ्रमणमङ्गीकृत्य कुसुमवाटिकायां पुष्पोच्चयमिषेण निर्गता नगरात् । अनन्तरं च तावद्बहुग्रामाग्रहारपुरपत्तनानि प(श्य)न्ती त्वरितमन्तरालपथेन यामि यावदेकत्र मध्याह्नतरणितीव्रातपेन विह्वला भ्रमभरालसया दृशा पुरःपुरोऽन्धकारपटलानि पश्यन्ती विश्रमितुमुद्भ्रान्तहृदया सहसैव च विदार्य गगनमुत्क्रान्तेन स्खलिता क्ष्माभृतः शिखरेण स्थिता च विश्रान्तिकृते मुहूर्तकं तत्र । तत्र च तृषा विशुष्कतालुरपेक्षया पाथसामितस्ततो दत्तदृष्टिर्दूरादेकतः प्रतिशिखरकोणैकदेशे रहःप्रदेशवर्ति, पिहितं च घनलतागुल्मजालिभिः, अनन्यसदृशाम्बुनिर्मलतया गरुडचञ्चुग्रहाद्विच्युतममृतं कुम्भाद्गमिव विलुठितम, ताण्डवरसविधुतित्रुटितं हरजटाग्रगङ्गाम्भसः पटलमिव निपतितम्, ब्रह्मणः कराकृष्टं कमण्डलुपात्रमिवोन्मथितम्, कल्पान्तपवनपातितं चन्द्रबिम्बमिव स्फुटितम्, द्युतिविच्छेपमाथितं ताराकदम्बमिव द्रावितम्, आपातिपूर्णमम्बुलविलोर्मिजालमुत्तानतुण्डं तोयकुण्डमद्राक्षम् ॥

दृष्ट्वा च तद्दर्शनतो निम्सीम (निस्सीम?) [illegible] [illegible] चेतसा त्वरितमनुसृत्य स्वमात्तदीर्घं [illegible] [illegible] सलिलमापूर्णकण्ठमिच्छयाऽस्मि पीतवती । [illegible] गात्रं [illegible] तुरगीक्तेण परमप्रमदम् । क्षणं च [illegible] विलक्षितकायम्—अये [illegible] [illegible] कथं [illegible], हा किमिति [illegible] [illegible] मया, इदं [illegible] [illegible], [illegible] न [illegible], [illegible] [illegible] । [illegible] [illegible], [illegible] प्राप्ता [illegible] [illegible] [illegible] [illegible] विलोक्य [illegible] [illegible] [illegible] विलोकिता क्षुधा [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । ततस्तु [illegible] [illegible] [illegible] [illegible] कथं पुनरागता [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] ॥

[illegible] च हा हा [illegible] [illegible] [illegible] [illegible]

न्मनोविषयनायकः सम्यग्ज्ञातान्वयनामवसतिरालोकितोऽपि पुनरिदानीं दूरीकृतो दैवेन। किंच सोऽपि मदर्थमित्थमेव ताम्यन्नास्ते। क्व पुनरसावालोकनीयः कथमालोकनीयः कदा चालोकनीय इति विलप्य सविषादमुदग्रवेगवतीं मूर्च्छामगच्छत्। तारावली तु हा हा स्वामिनि! हा निजवंशवैजयन्ति! हा कन्दर्पविजयश्रीः! हा त्रिभुवनालङ्कारमुक्तावलि! किं किं किमिवाचेतनीभूताऽसि, किमद्याह्लादिनि! मृगाङ्कमूर्त्तिरिवास्तमुपयान्ती जगदप्येतदन्धकारयिष्यसि, हा हा मुषिता मुषिताऽस्मीति सेचनार्थमानेतुं सलिलमतिसत्वरं गतवती। अथ राजा नितान्तमाकुलीभूय प्रधावितो हा हा विरसपर्यन्त एष संवृत्तो व्यतिकरः। तद्यदि पुनरसौ मणिर्यथा कायपरीवर्तनविकारमपहरति तथा मूर्च्छादिव्यपायहरोऽपि जायत इत्याकूतसत्वरमुत्थाय गृहीत्वा च तं मणिं तद्गर्भितेन पाणिना सुदृढमुदयसुन्दरीं करे जग्राह।

अत्रान्तरेऽझगिति तस्य मणेः प्रसङ्गा-
दुच्छिन्नमूर्च्छमपमुद्रविलोचनाऽसौ।
वेगोत्थिताधूतकराग्रमनङ्गरूप
मग्रे नरेन्द्रमवनीतिलकं ददर्श॥

ततश्च—

तस्याः सोऽयमिति ज्ञाते तस्मिन्नाविरभूद्रसः।
स कोऽपि यमुदाहर्तुमभूज्ज्ञाव्यं विवैरपि॥

अनन्तरं च—

सा तस्य पातुमलगत्तृषितेव तन्वी
रूपामृतं नवकटाक्षमृणालकेन।
तामप्यनङ्गदहनग्लपितामदभ्र—
दृष्टिच्छटाभिरभितोऽपि नृपः सिषेच॥

ततस्तयोर्नूतनसंगमोत्सवप्रमोदलोलेव सवेगमन्तरे।
परस्पराविष्टकटाक्षसंक्रमे रतिः करोति स्म गतागतानि(वे?)॥

एवमनयोः स्नपनकेनेव मदनश्रमजलेन स्नानयोर्हृत्समेलापकेनेव मणिना सनाथकरतलयोः पार्श्वतः प्रसरता द्विजोद्घोषेण कृतमिवाकृतविशेषप्रक्रियोपचारं पाणिग्रहणम्। अभिनन्दितं च पवनोल्लासितानि जलोर्मिशिखरशीकराक्षतकुलानि तरलताम्रवालकुसुमानि च सन्तुष्टमिव निक्षिपन्तीभिः जलवनाधिदेवताभिः। अथ सोदयसुन्दरी स्वेदजलकणनिकरदन्तुरस्तनकलशसुन्दरमाननं

शरीरमावहन्ती त्रपया सस्मितमवनम्य वदनकमलमहो मुञ्चत मामिति शनै रनिभृतमधुरमालपन्ती करतलाकर्षणप्रयासमकरोत् । राजाऽपि सहर्षमीषद्विहस्य बहुरसोपलालितेन मनसा सनर्मसन्दर्भमब्रवीत् ।

मुधैव तन्वङ्गि सरोजसुन्दरं
(करं) किमाकर्षसि कोमलोदरम् ।
स्फुटाक्षरं चन्द्रमुखि त्वमुच्यसे
चिरेण लब्धाऽद्य कथं विमुच्यसे ॥

अनन्तरम[illegible]जीर्णपलाशपुटभरितमुदकमादाय सवेगमायान्ती तारावली [illegible] राजानमानन्दनिर्भरेण चेतसा तत्तथा तदीयं सङ्गममभिन[illegible] साधु साधु सम्पन्नम् । अहो कुतः, कुतोऽत्र, कथमत्र, किमत्र, समस्त[illegible] देवः, इति [illegible]मापृच्छय मनाक् तेनैव [illegible] । राजाऽपि विश्वभूतेः शिष्यागमनक्षणा[illegible]मावेदयाञ्चक्रे ॥

[illegible]—
[illegible] ।
[illegible]
[illegible] ॥

[illegible]
[illegible]
[illegible] ॥

अष्टम उच्छ्वासः ॥

[illegible]

मेदिनीम्, निष्कर्षभीषणया दन्तपरिषदा गिलन्निव जगन्ति, यावकरसानुकारिणीभिः कपोलकान्तिभिर्वर्षन्निव रिष्टरुधिरधाराभिरनिष्टदर्शनो निद्रान्तसमुत्थितः स खलु सहसैव दूरात्तारावल्याऽभिनन्द्यमानं स्वीकृतोदयसुन्दरीकमुर्वीपतिं विलोक्य निकामकुपितः प्रधावितो जवादाजगाम कुतोऽपि सम्भृतबलो गोलाङ्गूलः सामर्षो दस्त्रश्च प्रावर्त्तत भुजाक्षेपे क्षितीश्वरस्य ॥

अत्रान्तरे च हा हा हताऽस्मि दुरात्मना दैवेन येन जानन्त्याऽपि मया मन्मथशरव्याघातमूर्च्छितया तिष्ठन्नपि न स्मृतः, चिरादिष्टजनसङ्गमोत्सवरसेन मत्तया स्वपन्नपि न परामृष्टः, सुदूरमारूढिमता रागेणान्धया समागच्छन्नपि न दृष्टो दुष्टैकजन्मा पापोऽयम् । अहह किंप्रकाराऽस्य व्यतिकरस्य परिणतिर्भविष्यत्याः प्रियसखि तारावलि! त्वरितमासूत्रय कमप्युपायमाश्रय कञ्चन कथय कस्याप्युपसरणादि किञ्चित्, अथवा हे पृथिवि ! त्वमनेन सुचिरमनुपालिता किमिति स्थिरीभूय स्थिताऽसि, अहो महार्णव! त्वद्दुहितुरसौ लक्ष्म्याः पतिः किमिति जडत्वमालम्बितोऽसि, हंहो दिक्पालाः! सकलदिग्जयप्रक्रमेष्वनेन रक्षता भवन्नगरीसीमानमार्जिताः किमिति सुदूरमपसृतास्तिष्ठथ, भो भो दिनेश्वर ! तेजसा त्वमेवास्य सोदरः किमित्येवमुदासीनो वर्त्तसे, ननु सर्वेऽप्येकमतीभूय किमिति नैनमनेन दुर्वृत्तचेतसा वनचरेणारुधमखिलजगदेकनायकं राजानमागत्य परिगृह्णीत यूयमित्याकुलीभवन्त्यामुत्कम्पमानायामुदयसुन्दर्यामवनिपतिरहो नन्वपसदोऽयमतथ्यसामर्थ्यः प्रोज्झितः सत्वेन प्रकृत्यैव तरलात्मा निदर्शनं च कातरेषु । तत्खलु कथमिवैतदङ्गे त्रिजगदुपगीतविक्रमं व्यापारयामि शस्त्रम् । असाधिते चास्मिन्न नाम तन्वी निराकुलेयमतः करोमि निग्रहम् । प्रमूर्च्छितसुचितप्रहारमूर्च्छया निश्चेतनमिमं विधाय यामि गृहीत्वा प्रेयसीमलमनुना पञ्चतां नीतेन वराकेणेति चेतसि विनिश्चित्य सपदि प्रगुणितचपेटाघातनिष्ठुरेण पाणिना दक्षिणेन प्रविश्य तं कपोलतले जघान ।

अथ स झगिति पुंसो रूपमासाद्य दिव्यं
विलसदुरुकिरीटप्रायभूषासुवेषः ।
वियति सुरवधूभिर्वीज्यमानो विमाने
मनुजपतिमवादीत्साधुभोः साधुसाधु ॥

साधु त्वया क्षितीशतिलक! त्वां प्रकृतिमासादितोऽहमिदानीम् । विसृज व्रजामि । न जाने निजं स्थानमनुगच्छतो मे कियच्चिरमन्तराले विलम्बोऽयमेवं समभूत् । अतोऽनुमन्यस्व मां गमनाय । यत्त्वमप्यनया मनुजभुवनैकचक्रव-

त्तिलक्षणख्यातयोर्द्धरेखयेव कराग्रमिलितयाऽलङ्कृतो मृगीदृशा भो मलय
हन! व्रज स्वीयमावासनगरं प्रतिष्टानं तवैव कृते विधिना निर्मितेयमानीताऽ
परिपालिता च मयेति प्रोक्तो महीपतिः सविस्मयमानन्दमधुरेण वचसा
प्रत्यवोचत्। अहो विवेकिन्! कथय को भवान्? कथमिदमेव दिव्याकृति
भव्यं वनचरत्वमापन्नोऽसि? किमर्थं वेत्थमस्यां मृगीदृशि निकामदुष्करमि
परिपालनक्लेशमनुभूतवानसि? किमित्यसावपीदृशं वनवासदुःखमासादित
कथंचन मत्करप्रहरादिमां प्रकृतिमागतोऽसि? कुतश्च मां नामनगरसंवित्ति
र्वकं ज्ञातवानसि? ज्ञातासि चेदन्यदापृच्छ्यसे कतमोऽयमेवमुदग्रमेदुरो गिरि
किमभिधानमम्भोधिसोदरमिदं च हृद्यं सरोवरम्? अस्य च माणिक्यभवनर
किमन्वयं निर्माणमित्यादि पृष्टो नृपेण सोऽभ्यधात्।

भोः क्षितिभृतां नाथ! कथयामि श्रूयतामस्तीह लोके विद्याधराणां सुमे
रुवप्रोपकोणवर्त्तिनी कोशातकीति सुरलोकविश्रुता नगरी। तस्याः प्रभुस्ता
शकिरीटो नाम विद्याधरोऽहम्। अहं चैकदा भुजगभवने भगवन्तमन्धकवि
पाटकं हाटकेश्वरमष्टमीचतुर्दश्योरवश्यदर्शनत्वेन द्रष्टुमष्टम्यां गतवान्। तत्र
च तमिष्टफलकल्पपादपं देवमन्यदिवसोपहारप्रक्रियाक्रमेणैव सभूरिभावम
भ्यर्च्य वासरमखिलं च तत्सेवयाऽतिवाह्य कृतकृत्य इव निशाऽवसरमासाद्य
निर्गतो नागलोकात्। अनन्तरमेकत्र समुद्रस्यान्तरद्वीपके दूराद्विसर्पिणा विश
दचन्द्रिकालोकपरिकरेण स्पष्टीकृते सौधशिरसि हरितपत्रातपत्रमात्रावरणम
ण्डपेऽनल्पदलकिसलयकृतोरुसंस्तरे निद्रान्तीमिमामपश्यम्।

दृष्ट्वा च दूरतोऽपि वदनमस्या वितर्क्य चिन्तितवानस्मि।

किमेतन्निर्मुद्रं नलिनमलिभिश्छन्नशिखरं
किमिन्दोर्वा बिम्बं नवगवलनीलाङ्कसुभगम्।
न नैतत्तन्वङ्ग्याः कुरुलपटलाडंबरसखं
मुखंसाधुः साधुर्विधिरयमहो यस्य घटना॥

इति विनिश्चित्य झटित्यनेकसुरलोकनायिकोपभोगक्रीडाकृतार्थमपि त्रि-
भुवनाभिनन्द्यसुन्दरीसौन्दर्यगुणाकृष्टमिव निविष्टमस्यां मे मनो यदेतदनयाऽप-
हृतचेतनो विवेचितवानस्मि। यत्किल किमसौ कुमारी परिणीता वा, कुमारी
स्वयमनुरागेणागता पितृजनेन वा वितीर्यमाणा गृह्यते, परिणीता च पराङ्गने-
धीमताम्, इयं तु शिशिरोपचारपरिचयादस्माद्विप्रयुक्तेव च प्रियत-

मेन पूर्वानुरागेण वा विप्रलब्धा पराङ्गनैव गण्यते, इत्यादि परामर्शविकलस्य मे विस्मृतोऽयमेकहेलयैवात्मा । विस्मृतं कुलव्रतम् । विस्मृतः पन्थाः सुकृतस्य । विस्मृता गिरो गुरूणाम् । विस्मृता च लोकस्थितिः । केवलमनङ्गहतकेन पापीयसा प्रेरितः, प्रवर्त्तितो दुष्कृतेन कर्मणा, संज्ञितो नरकगत्या, केनाप्ययशः-कलङ्केनाभ्यनुज्ञातः, सरभसमियमेवात्मा, कुलव्रतमियम्, इयं मार्गः सुकृतस्य, तत्त्वमियं गुरूपदेशानाम्, इयं च सा लोकस्थितिस्तनूदरी, तदनया करोमि सफलं संसारम्, अनुत्थापयन्नेव न यथावेत्ति कश्चिदपि तथा त्वरितमादाय व्रजामीत्यसन्दिग्धेन मनसा समीपमुपसृत्य झगित्युत्क्षिप्य ततः प्रवालतलात्सुप्तामेव निभृतमेनां निजं विमानमधिरोप्य जातालब्धलाभ इव सहर्षमन्तरिक्षपथेनागन्तुमारब्धवान् । वीक्ष्य विमाने मुहुरमुष्या वदनमम्बरे च शशभृतो बिम्बमिदं चिन्तितवानस्मि ॥

स्वच्छेन्द्रनीलफलकप्रतिमे यदेत-
देवं विभाति गगने शशिनोऽस्य बिम्बम् ।
मन्ये तदत्र सुरयानभुवि स्थितायाः
सङ्क्रान्तमुज्ज्वलमुखप्रतिबिम्बमस्याः ॥

अथवा स एवायममृतरोचिः किन्तु—

अस्या मुखेन विजितो नियतं बिभर्त्ति
कालुष्यमन्तरितमिन्दुरतः सदैव ।
ज्योत्स्नापटेन पृथुना स्वमसौ पिधाय
रात्रौ परं प्रचरति त्रपयेव गूढः ॥

पुनर्विभाव्य यदि वा न खल्वसौ हिमांशुरन्यदेव तर्कयामि किञ्चित्, तथाहि—

रूपेण नूनममुना भुवनत्रयेऽपि
नास्याः समं युवतिरत्नमिनीति धात्रा ।
व्योमावनौ खटिकयाऽन्यपुरन्ध्रिकाणां
रूपस्य शून्यमिदमिन्दुमिषेण दत्तम् ॥

भूयोऽप्येनां प्रति सविस्मयमनसा निद्रामीलितविलोचनत्वादपि नो-न्दर्यमाननस्य, अहो प्रबालतल्पतलाक्रान्तदेहयष्टिनाम्ना अपि लावण्य-मनुपष्टेः, अहो तिमिरोपचारचन्द्रनखदीकृतानामपि कान्तिप्रचयानामिन्दी-दि(प्र)होलाङ्कुरस्तननयननलयां निपतत्येन केनचा मूर्च्छीकृतविमर्शनाभ्युदयं

मे झगित्यस्यैव भूभृतः शिरस्येकस्य गगनगङ्गातटे तपस्यतो महर्षेरुपरिष्टात्सा-ङ्गप्रघर्षमिदमहो मेदिनीनाथ ! विमानमगमत् । कुपितेन च तेनावलोक्य क्रूरया दृशा रे रे चपल चापलस्य फलमदूरविषयमनुभावयामि भवन्तम्, इदानीमेव निर्विलम्बमनुभव,भवामुना मूर्खत्वाद्दुष्कृतेन चपलः प्लवङ्गमो वनपशुरित्येवमुक्त्वा यावदग्रेविमानं वीक्षते तावदन्तरितां क्षामोदरीमपश्यत् । ततश्चासौ सर्वविल्किंचन ध्यानादवहितीभूय ससंभ्रममभाः पाप ! पुनरपरं स्त्रीरत्नमपहृत्य रे गन्ताऽसि तदिमामेवास्य भूभृतो रविशृङ्गस्य मेखलायां कुवलयामोदंनाम यत्सरः तस्योपकण्ठवनसुस्थितेन त्वया पालयता स्थातव्यमस्याश्च कृते मद्वचःप्रभावाद्भविष्यत्यधुनैव गिरेर्भित्तिगर्भमधिकृत्य वासाय पेशलं माणिक्यभवनमित्युदीर्य झगिति हृदयचिन्तितमुपस्थितं पुरो दिव्यमिदमादाय च महारत्नमन्यच्चैष किरणकोश नामा समुद्रान्तः सुवाहृदस्योदरे विनिष्पन्नो मणिः सकलविषविकारमूर्च्छाङ्गपरिवर्त्तनाद्यपायहरोऽस्याः सर्वापदामास्पदेऽत्र विपिने वसन्त्या भविष्यतीत्येवमनुकम्पया चूडामणिपदे निरूप्य तूष्णीमकरोत् । अहमपि तया दुर्वारशक्त्या शापोक्त्या दुर्द्धरदवानलज्वालाहतो वनवृक्ष इव झटित्येव श्यामलीभूतः । सानुतापमये तदेतत्परयुवतिरत्नापहारपापस्य फलमुपस्थितं ममेत्थमिति संप्रधार्य च दूरमवनमितमौलिः प्रणम्य सविनयमवोचम् । भगवन् ! अज्ञानतिमिरान्तरितदृष्टेरधर्मनिर्मूलितविवेकस्य मे पुनरात्मलाभेन प्रसीदतु भगवान् दयाराशिरास्पदं च क्षमाया इत्येवमभ्यर्थिते मया स मुनिरार्द्रीभूतेन मनसा भवत्वेवमहो यदा खल्विहैव तिष्ठन्त्याः प्रतिष्ठानपुरनरेश्वरो मलयवाहनः पाणिग्रहणमस्याः करिष्यति तदा तत्करप्रहारताडितस्य ते शापान्त इत्युक्त्वा विरराम । अनन्तरमहं तथैव तथा तस्य मुनेराज्ञया झगित्येवमत्र संभूतवान् । स्थितश्च यथा तथा स वेत्स्यति येन दृष्टोऽस्मि । जानामि पुनरेतदेवाद्य यत्किलावनीन्द्रशेखर ! तवानुभावात्स एष मे समुपजातः कर्मक्षयः, त्वं पुनरमुतो मुनीन्द्रस्य वचनादागतः, क्षितिधरोप्येष रविशृङ्गनामा, सरश्च कुवलयामोदसंज्ञमित्यपि तस्यैवालापप्रसंगेन कथितम्, माणिक्यभवनं च तदाज्ञासिद्धमिति कथितमेवास्ते, तद्भो ! भुवनोपकारिन् ! सुकृति (नांव)रैप भवताऽनुपृष्टः कथितो वृत्तान्तः, प्रसीद यान्यहमिदानीमित्येवमुक्त्वा सप्रश्रयमनुज्ञातो नृपेण झगित्येवोत्पत्य दुरालोकमम्बरमगोचरश्चक्षुषो वभूव ।

अथैवमखिलं वृत्तान्तमावेद्य गते तस्मिन् प्लवङ्गभावापनोदलब्धात्मनि विद्याधरे विलोक्य दिशो वसुमतीप्रभुरभीष्टयुवतिसङ्गमाभिनन्दनपुरस्सरं चिन्तितवान् । नन्वनुकूलविलसितस्य विधेः प्रभावात्प्लवङ्गानुपृष्ठपरिसर्पणप्रस-

ङ्गेन मिलितेयमसंभाव्यसंगमा प्राणेश्वरी । नवेष्टजनवियोगदुःखादपरमनुभूतवती क्लेशम्। इदानीमरण्यमिदमेवं निरुद्धदिङ्मुखालोकमत्येकडम्बरं च सर्वतः। कः प्रदेशोऽयमवनेरिति सर्वथैवाप्रतीतम् प्रतिष्ठानं हि क्कुत्र किल ककुभो विभागे कियति वा दूरे वर्त्तत इति न नाम ज्ञायते। (सुकृत) सन्निवेशादिहो पस्थितैव परं तारावली । नत्वसौ नभःप्रचारपटुतराऽपि पुरन्ध्रिसौख्याद्युन्मोह(मवधार)यितुमीश्वरादिशः। नवा जन्तुसंचारागोचरेऽस्मिन्काननेऽन्योऽपि मनुष्यजन्मा कश्चिदासाद्यते यमापृच्छ्य वाञ्छितां दिशमनुसरामः। तदेवमितो गमनाय न तादृगुपायोऽस्ति कश्चन। विस्मृतश्चामुतो विद्याधरादस्यैव कथाकर्णनरसान्धहृदयेन मयाऽत्र प्रष्टुमुपदेशः। खेचरा हि बाहुल्येन सदाऽपि भ्रमन्तो वियति विदन्त्येव भूलोकविषयिणः प्रदेशान् । अथवा (यदि नाम) पुनरसावद्याप्यवान्तरोत्पद्यमानव्यासङ्गविलग्नो वियत्येव तिष्ठत्यतः पश्यामि तावदिति विचिन्त्य महीयसो मोहान्निर्व्याशया गगनमनुप्रेषितेन चक्षुषा सहसैव तस्मिन्नन्योन्यसङ्गतमेकप्रमाणमेकक्रियमेकरूपं च स्वरूपमेदुरमुदारपक्षं पक्षियुगलमालोकयाञ्चक्रे । तच्च झगित्येव तं पक्षिभावमपहाय सुवपुषा पुरुषरूपेण भूत्वा नभस्तलाद्भुवमवातरत् । दृष्ट्वा च दूरतोऽपि प्रियया परीतं राजानमागत्य रभसा द्वयमपि प्रणाममकरोत् । कौ भवन्ताविति पृष्टे महीभुजा कृताञ्जलिरेकस्तयोः सविनयमुवाच । देव ! तदा देवेन विम्बोदरान्तरितं कामिनीरत्नमन्वेषयितुमनुप्रेषितस्सोऽहं तवादेशधरः क्षपाचरो मायाबलः । अयं च पातालक्षत्रियस्य शिखण्डतिलकस्यातः पदातिरस्या एव गवेषणाय भारतवर्षं निरूपितो दम्भोलिनामा भुजङ्गवीरः । जानञ्च मूलतः पातालमखिलं त्रिदशभुवनमिन्दुदीप्य लोकत्रयमिदानीं (भू) लोकमधिप्रचरतो (मम) सार्द्धमनेन सौराष्ट्रेषु प्रभासनामनि क्षेत्रे मेलापकः । तत्र चानवरतयात्रायातत्रिभुवन(ज)नोत्सवं दुर्दर्शदर्शनलग्नकालकलितकल्पार्पणप्रवणमीश्वरं श्रीसोमनाथदेवमभिवन्दितुं विज्ञापयितुं च प्रविष्टयोः स्तुतान्वेषमाणयोः कार्यसिद्धिमन्योन्यमर्थनायतनमेकमेव श्रुत्वा सादरमन्योन्यं च कृतमथ्यादवर्णनजनितौजनानन्तयोः सख्यमिदमावयोरभूत् । ततः प्रभृति सहैव स्वैरमन्वेषणे पक्षिरूपधारिणौ विचरतोऽद्यदमनिन्द्यजलशकुन्तकूजितावकीर्णतटविटपिनानाबहुजननीरं सरो दृष्टिगोचरमभूत् । जाता च तयोरनयोन्यमन्यतया विनिर्गतश्रमेणानयोर्द्वयोर्नानिशिशिरपरिसरेऽत्र मानुषत्वविनतुवन्धुमोनदैवपद्मवना मनुष्यरूपेण विश्रमितुं सममेव मानसी वृत्तिः । अनन्तरं चलतोऽपि । दृष्टश्च दिष्ट्याऽत्र

मया मिलिताभिवाञ्छितवधूसखो निजप्रभुरावेदितश्च दम्भोलिः। अनेन च (कथितं) यथोचितवरावासिनिर्वृतस्वान्तेयमात्मनः स्वामिपुत्री, सिद्धमीहितं, फलितो मनोरथः (इति)। किमुच्यते ?

स्वामिन्नेवमसीमसंभृतलसल्लावण्यवत्याऽनया।
प्रेयस्या सहितेऽद्य ह्यमहसि द्रागेव दृष्टे त्वयि॥
देवश्चन्द्रविभूषणोऽद्रिसुतया शच्या च सङ्क्रन्दनः।
साक्षात्सोऽपि हरिः श्रिया परिगतः क्षोणीश ! दृष्टो मया॥

अथवा—

हृद्भूमीभवने प्रविश्य जगतः कामेन रत्या च यो।
द्वाभ्यामप्युपजीवितश्चिरतरं शृङ्गारनामा रसः॥
सिद्धं तेन तदेतदुज्झितजरद्रूपं नवीभूय च।
प्रोद्भूतं युवयोर्द्वयं प्रचयिनी तेनेयमेवं द्युतिः॥

किन्त्विदानीं देवोऽप्यावयोरपनयतु कौतुकं कथयतु निजं देव्याश्च विषमं प्रदेशमीदृशं प्रत्यागमनदुर्घटं वृत्तान्तम् अत्र च किमेवमद्यापि स्थीयमानमास्यत इति सप्रेमातङ्कमापृष्टो राजा तयोर्यथावृत्तमखिलं (न्यवेदयत्) निवेद्य निर्गमोपायपण्डितश्च मायाभिस्तत्खलु निर्गमानुरूपमुपदिश्यतां किमपि, प्रकारं वा कमप्यास्त्रय, येन वयमनेन सार्द्धं प्रियपरिग्रहेण युगपदासादयामो निजं राजधानीनगरमित्येवमादिष्टे महीभुजा झगित्यदृश्यभावमापन्नवान्मायावलः।

पुरो भूतं च परमसङ्कटाभोगभव्यमुद्भासि भास्वरपताकमस्तोकमणिकिङ्किणीचक्रवालमालितमसमहेमनिर्माणरम्यं विमानम्। उत्थिता च निराश्रया वियत्तले भारती। भो भोः! क्ष्मापालपुङ्गव! स खलु मायावलोहमेवं त्वदग्रे मायया नभश्चरं प्रतिष्ठानपुरगामि च संवृत्तो विमानमेतत्, आरुह्य चात्र सममेव सानुनायिका नायिकेयमिच्छासंपन्नमनोरथश्च देवः प्रयातु प्रापयिष्यामि क्षणादेव तत्त्वत्त्वधिष्ठानसुखसुन्दरमभीष्टतरं नगरमित्यमृतवृष्टिमिवादृष्टमूर्त्तिना मायावलेन प्रणीतामाह्लादिनीं वाचमाकर्ण्य सोत्साहमुर्वीपतिरुपायोत्पत्तिसुस्थितेन स्थिरीभूतेन चेतसा कृतकृत्यइव दम्भोलिविसर्जनाय मुखमुदयसुन्दर्या व्यलोकयत्।

सापि चात्मनो हृदयस्य संवादिनमभिप्रायं प्रेयसो विबुध्य लब्धहृदया च तारावल्या निर्वर्त्तिताशेषकुलगृहारोग्यवार्त्ता प्रश्नपरिपाटिरुवाच दम्भोलिम्। अहो भ्रातः! अधुना कृतं विलम्बेन त्वरितमित एव सिद्धाभिवाञ्छितो भवान्, व्रजन्वर्द्धापयतु भुजङ्गकुलाभरणशेखरस्य मत्पितुः कथयतु च पुरा मर्त्यलोक-

वर्त्तिनि त्रैलोक्येऽपि विख्याततनामनि प्रतिष्ठाने सन्तोषसुस्थितां मामधिवसन्तीम्, तारावली तु प्रतिष्ठानगतानां यद्यालोचयतामस्माकं प्रतिभात्यत्यस्याश्च वा चित्ते भविष्यति तदा नूनमसावप्येष्यतीत्यादि सदृशं सन्देशमुक्त्वा तमतिमहता प्रश्रयेण विससर्ज। सोऽपि स्वबन्धुभावोचितमुदयसुन्दरीमापृच्छ्य शिक्षयित्वा च सततनिकटावस्थितित्वेन तारावलीं प्रणम्य गुरुणाऽनुरागेण राजानमालप्य च विमानीभूतमेव मायाबलमेकहेलयैव पवनभावमापद्य गतवान्।

अथातिमुदितो महीपतिरानन्दमधुरया गिरा सस्थाननिर्देशमादायुदयसुन्दरीं ततस्तारावलीमारोप्य मध्ये च तयोः स्वयं तत्खलु मायाबलेन स्वदेहकल्पितं दिव्ययानमधिरूढवान्। झगित्युत्पत्य निर्गतेन च वहन्नन्तरिक्षवर्त्मनि तेन मायाविमानेन कियतोऽपि कालकलाविभागस्यान्तरे स्वं पुरं प्रतिष्ठानमाससाद। बहिरेव नगरस्य सप्रमोदमुत्तीर्य ततो विमानादेकत्र परिसरश्रियो विपुलनीलातपत्रस्येव घनच्छायावनस्तले नन्दिष्टुमस्य सार्द्धमुदयसुन्दर्या पुरोगतया च तारावल्या निषसाद। अथ झगित्येव तत्खलु रूपं वैमानमपहाय दिव्येन वपुषा कृताञ्जलिरग्रतो भूत्वा जगाद मायाबलः—

स्वामिन्! इत इतो निवेद्यतां दृष्टिः "अहो यः किल मयाऽनुपृष्ठप्रधावितस्तस्य प्लवङ्गमहाद्भुतस्य क्वचिदगोचरं मानवजनस्य गतवान्, यदर्थं च नितान्तमुत्ताम्यता चित्तेन सुचिरमियन्तं कालमाश्रितनन्दनेव कुतोऽपि लब्धमादाय दिव्यं भुवनिरत्नमागतो नरेन्द्र[illegible]" इति वदन्नुच्चैः सस्नेहेन धावन्नयमयमायाति ते पश्य परिजनस्तन्मामिव [illegible] शिखिताम्र-चूड! त्वरितमपृच्छन्नेवाहमागतः [illegible] दर्शने न जाने यदि [illegible] मनस्स्वामिनो विभीषणस्येति। सादरं निशम्य [illegible] नरेन्द्र [illegible] साशेषवाञ्छितसिद्धेः [illegible] भवान् नन्वे शरीरमपि तवाधीनमेनदित्यभिधाय [illegible] रजनीचरम्। अत्रान्तरे च क्षणादेव [illegible] प्रयनविस्मयाविष्टदृष्टयो मन्त्रिणः, [illegible] विविध-पताकाहस्ताः क्षत्रियकुमाराः, [illegible] कुन्ताङ्कितभुजदण्डाः प्रवीराः, [illegible] पौरमुख्याः, [illegible] । [illegible] [illegible] [illegible]

पुण्यवादित्रकैर्मुखरितदिगन्तरः प्रथममेवागत्य मिलितेन कुमारकेसरिणा पृच्छ्यमानवृत्तान्तः प्रत्यक्षभूतया चक्रवर्त्तिपदश्रियेव सार्द्धमुदयसुन्दर्या विभूतिसहितासनोपकरणसज्जितां विजयकरिणीमधिरूढः प्ररूढवृद्धिना विलासेन सप्रमोदमन्थरमभितोऽपि गृहे गृहे वाद्यमानवर्द्धापनकमुद्गीयमानधवलमानन्दनृत्यत्सुवासिनीकमुपरचितहट्टशोभममुना च शोभासत्कारपरिकरेणोत्सवाङ्गृहीतशृङ्गारमिव नगरं विवेश ।

ततश्च स्वर्गतोऽवतीर्णमिवानङ्गरतिमयं मिथुनमालोकयितुमुत्तालमुष्टिना कुतूहलेनाकृष्यमाणा विहाय सकलं विलासव्यापारमतिरभसाद्धावन्त्यो लगन्त्यस्त्वरितमुत्पथेनापि विलङ्घ्य त्रुटन्तमप्यगणयन्त्योहारादिमणिसरकलापमन्योन्यमाह्वयन्त्यश्च प्रसरेण निःसृताः स्वर्गादिव पतिताः पुञ्जिताः सौधशिखरेषु, पातालादिव निर्गताः संभृता गवाक्षगर्भेषु, अन्तरिक्षादिव विघटिता विस्तृता उत्सङ्गेषु, भूतलादिव समुत्थिताः प्रकीर्णाः प्राङ्गणेषु, संगता वेदिकासु, लिलिताश्च तोरणद्वारेषु कामिन्यः ।

प्रथममेव रभसान्निःसरन्त्यश्च ताः काश्चन जघनभारासहिष्णुतया पदे पदे प्रस्खलन्त्यः कुलव्रतेनेवानुपृष्ठप्रधावितेन हठादाकृष्यमाणाः प्रचेलुः, काश्चन त्वरयाकृष्यमाणमुरुगुरुभराक्रान्तमशक्तमिव क्वणन्मणिनूपुररणितच्छलेन चरणयुगलं क्रन्दयन्ति स्म, काश्चन प्रधावनवशोद्गताङ्गविक्षेपादितस्ततो दोलायमानमुक्ताकलापविसृतेन विशदकिरणनिकुरुम्बकेण चामरेणेव हृदये तत्कालविश्रान्तं राजानमुपवीजयाञ्चक्रुः । निःसृत्य दर्शनस्थानमनुप्राप्ताश्च काश्चन गिरिसुतार्चनक्षणे गृहीतधूपदहनका एव धाविता उमाऽऽकृतिभ्रान्त्या झगित्युदयसुन्दरीमुद्दिश्य धूपमुपदर्शयन्ति, काश्चिदन्योन्योपमर्दकलहैरन्तरितदर्शनाः पश्चात्तापमुद्वहन्ति, अपराश्च काश्चिदेकस्मिन्नेव नयनकुवलये कज्जलमेकस्मिन्नेव कपोलतले पत्रभङ्गमेकस्मिन्नेव श्रवणशिरस्यवतंसकैरवमेकस्मिन्नेव कर्णे कनकपत्रमेकस्मिन्नेव करे कङ्कणमेकस्मिन्नेव चरणे निधाय नूपुरमुत्सुकेन मनसा विनिःसृताः पुष्पेषुनटनाटकनिविष्टा इव यथावदर्द्धनारीश्वरं रूपमादधिरे । एकाभिरप्यानन्दवाष्पाम्बुभिरुदकं, स्मितवशविकासिदशनांशुभिः स्वस्तिकान्, प्रकम्पविगलितावतंसकुसुमैः पुष्पप्रकरम्, अनुपथं प्रयच्छन्तीभिः, अन्याभिरतिवेगविस्मृतोत्तरीयवस्त्रतया करतलावृतपयोधराभिर्मुखनिहितपङ्कजान्पूर्णकलशानिव पुरः प्रगुणयन्तीभिः, प्रविशतो मिथुनस्यैव विरचिता माङ्गलिकसत्कारः। काभिश्च सुरतमपि राज्ञे दापयितुमात्मानमर्थयन्तीभिः श्वश्रू-

सकाशमपि राजसंगमाप्रासिदुःखमुदीरयन्तीभिर्ननांदारमपि दूतिकात्वेन समुपालब्धुं शिक्षयन्तीभिः साक्षाद्विडम्बितः स्वात्मा। काभिरन्योन्यं सपत्नीभिः श्वश्रूस्नुषाभिर्भ्रातृजायाननान्द्रादिभिरेकस्मिन्नेव राजन्यभिलाषमालोचयन्तीभिराहतं तत्खलु समानशीलव्यसनत्वात्सख्यम्। कासांचिदुदयसुन्दरीनिरीक्षणनिषण्णानां नाभवद्विलोचनपथे मलयवाहनः। कासांचिन्मलयवाहनालोकनप्रसक्तानां बभूव विघ्नमुदयसुन्दरीदर्शनस्य। स्थानेषु स्थानेष्वेकाः खलु मलयवाहनं वर्णयन्त्यन्याः स्फुटमुदयसुन्दरीरूपमुपकीर्त्तयन्त्यपराश्च मिथुनमपि श्लाघन्ते सहर्षमित्येवमनेकचेष्टापुरःसरमहंप्रथमिकया परस्परोपमर्दसंभ्रमेण युगपन्नगरनारीभिरालोक्यमानः, प्रशस्यमानः प्रशस्तमानसैः सूरिभिः, आशिष्यमाणस्तपोधनैः, अभिनन्द्यमानश्च प्रकृतिलोकैः, उद्दण्डचलचामरकराभिरनेकशो वारविलासिनीभिः प्रगुणितारात्रिकशेषाक्षतोपकरणपात्रवतीभिर्गोत्रविलया(वृद्धा?)भिर्धवलगीतिमधुराभिः पौरजनसुवासिनीभिर्जयजयोद्घोषमुखरैर्वन्दिभिरुद्गीतरीतिभिर्गायकैः पठद्भिश्च निखिलवेदार्थवेदिभिर्ब्राह्मणैः क्रियमाणमङ्गलाचारः, प्रहतपुरुकूतसंपदाडम्बरेण विविधमणितोरणोपचारचर्चिताभोगशोभिनि राजकुले संचचार।

जातश्च महानुत्सवः। पतिता च गगनाज्जयतादुदयसुन्दरीति दयितयाध्यासितः श्रिया मर्त्यलोकमवतीर्णो मलयवाहनापरप्रकृतिर्जनार्दन इति जयजयालापनिर्भरैः स्वर्गिभिरनल्पशो विसृष्टा पुष्पवृष्टिः। उदभूच्च तत्र तैरेव सप्रमोदमास्फालितानामदभ्रतरो दुन्दुभीनां विनादः। किमन्यदन्यैव हि विभूतिरुत्सवाडम्बरस्य।

कौसुम्भैः प्रतिमन्दिरं पुरवधूवासोभिरुत्पल्लवः
श्वेतोदञ्चितगुडि(च्छि?)काभिरभितः प्रत्यापणं पुष्पितः।
विस्फारैः फलितश्च पूर्णकलशैः प्रत्यङ्गणं विस्तृतः
प्रत्यध्वं प्रतिगोपुरं प्रतिगृहद्वारं च यस्तोरणैः॥

अपिच—

दिव्यैराभरणैर्विचित्रवसनैरामोदहृद्यस्रिभिर्
माल्यैर्भूरिविलेपनैश्च समभूद्भूपासमृद्धो जनः।
यद्वा किं न भवेद्भवेदपि यतस्तत्र प्रविष्टा पुरे
सा तेनोदयसुन्दरीति पदुना रूपेण लक्ष्मीर्ध्रुवम्॥

अथैवमेतस्य प्रत्यहमुत्तरोत्तरमवर्धमानस्य मध्ये महोत्सवस्य सहसैवाजगाम पातालभुवनात्प्रगुणिताशेषवैवाहिकोपकरणपाणिः कतिपयजरत्कञ्चुकिमह

त्तरासपरिचारिकाप्रभृतिपरिजनोपेतः कृते वधूवरस्य बहुविधाभरणनेपथ्यादि नरलोकदुर्लभं वस्तुजातमादाय राज्ञा शिखण्डतिलकेन प्रेषितो राजाङ्गनिर्विशेषः पिता तारावल्याः सेनाधिपो रत्नमौलिः ।

तेन चागत्य पुनर्नवीकृतो द्विगुणितश्च सोऽत्यन्तमुत्साहमेदुरो महीयसाऽऽडम्बरेण विभ्रमारम्भमुत्सवाभोगः । समर्पितश्च स खलु निखिलोऽप्युदयसुन्दरीसमीपत्वेन मातृगृहादागतः प्रति(परि ?)चारको लोकः । कथितश्च वाञ्छितवरलाभसुस्थिता समुपजाता पुत्रिकेति दम्भोलितः श्रुत्वा समं महादेव्या विजयरेखया प्रमोदमागतस्य राज्ञः शिखण्डतिलकस्य प्रेमपरिणतालापबन्धुरो बन्धुसंबन्धजन्मा सन्देशकः । तथैव चात्मनः सुता तारावली राज्ञा सादरमुपवर्ण्य कथितस्य विशेषतः पुनरुदयसुन्दर्या पुरस्कृतस्य सुरूपेण च मनसः प्रतिभासितस्याथ च नितांतमभिप्रेतस्य राजसुहृदः क्षत्रियकुमारस्य कुमारकेसरिणो दत्ता परिणेतुम् । अनन्तरमसौ रत्नमौलिर्निर्वर्तितसकलसंयुक्तकोपचारप्रक्रियाकलापः स्वागतोपहारपरितोषितश्च सानुबन्धमुदयसुन्दरीदुर्ललितसहनेन राजानम्, राजहृदयानुकूलवर्त्तनेन सुदृढमुदयसुन्दरीम्, उदयसुन्दरीशरीरहिताचरणेन तारावलीम्, तारावलीपालनोपचरणेन कुमारकेसरिणम्, सौहि(हि ?)त्यकरणेन पुनश्च राजानं सजङ्घाग्रहमभ्यर्च्यपृष्ट्वा च गमनाय कृतकृत्यश्चानन्दितेन चेतसा स्वं जगद्विरोचनकक्षाश्रयं जगाम ।

राजा च मलयवाहनस्तया वल्लभया सार्द्धमुदयसुन्दर्या तेन च प्रचुरदेशदानोपवर्द्धितैश्वर्यसुस्थितेन मथुरापतेर्जनकस्य कलिन्दकेतोः स्वसौख्यापादितप्रमोदेन तारावलीपरीतमूर्त्तिना सुहृत्तमेन कुमारकेसरिणा विनोद्यमानहृदयो नानापथविपश्चिताभिरनेकरसविशेषशालिनीभिर्भूरिशो विलासभङ्गिभिरनवरतमखिलान्येव मर्त्यलोकसुखानि भुञ्जन्नसारमपि सार(म)करोत् । अत्रान्तरे च समुपजाते हि कथाऽवसाने संवृत्य पुस्तकमुद्ग्री(वी)भूय स्थितवति तस्मिन्कवीश्वरे तौ तिलकतालकाख्यौ द्विजपुङ्गवावेकहेलयैव परमुत्कृतदिव्यतेजसावमरपुरसुन्दरीकरचलितचामरोपवीज्यमानाकृती विमानयानगतावन्तरिक्षे बभूवतुः । अवोचदेकश्च तयोः स एव तालको नाम । भोः सत्कवे ! सोड्ढल ! श्रुतोऽयमस्माभिस्तावकः प्रबन्धोऽयम्, (अ)पूर्वमिमं श्रोतुमुपक्षिप्ता हि विषयास्ते यादृग्गुणोपस्कृतमूर्तयः कथ्यन्ते सूरिभिस्तादृशा एव तथाप्युपक्रमः कथाया यथावदाक्षेपको हृदयस्य, संबन्धसन्धिषु काचिदेव सुश्लिष्टता संविधानकस्य, प्रस्तुतोपक्रान्ते च वस्तुनि किमुच्यते स्पष्टैव संपद्रसस्य, पद-

न्यासस्तु मसृणवर्णरचनादिभिर्गुणैराह्लादक एव श्रवसाम्, भणितिभङ्गीषु चान्यादृशमेव निवेशकौशलं लौकिकार्थस्य, किं वाऽन्यदपि। यत्किल कौकिली मायूरी माराली चेति प्रधानजातित्वं कवीनां तदपि क्वचित् किंचन समन्तादस्ति सम्यगतिव्यक्तमेवात्र।

तथा च कुवलयामोदसरसि मूर्च्छान्तसमुत्थितोदयसुन्दरीविलोकितस्य मलयवाहनस्य प्रक्रमे यथा—

"अत्रान्तरे झगिति तस्य मणेः प्रसंगा-
दुच्छिन्नमूर्च्छमपमुद्रविलोचनाऽसौ।
वेगोत्थिता धृतकराग्रमनङ्गरूप-
मग्रे नरेन्द्रमवनीतिलकं ददर्श॥"

अत्र प्रनितिपेशलेव वर्णगुम्फे सप्राणत्वादोजस्विना विभिन्नपदापगतदैर्घ्येण कोकिलरवानुवर्त्तिना वाणीगुणेन वैदर्भीरीतिमनुसरन्ती प्रकृष्टा कौकिली जातिः।

मायावलं प्रतिसमरमध्यासितस्य मलयवाहनस्य वीरोक्तौ यथा—

"सर्वत्राङ्गेषु वल्गद्धनगहनशिखाचक्रचण्डाग्रकोटि-
त्रुट्यत्पिङ्गस्फुलिङ्गोद्धुरपरिकरेणामुनैवाग्निना ते।"

अत्र सौष्ठवोद्रेकवाहिनि वर्णबन्धे घनप्राणत्वा(त्वा?)दोजःप्रधानेनैव समस्तबहुपदायामसरलेन मयूरकेका(नुका)रिणा वाणीगुणेन गौडी रीतिर्मायूरी जातिः।

चन्द्रोदयवर्णने च यथा—

"कमलिनी भुवनान्तरिते रवौ
व्यपगतालिकलापशिरोरुहा।
परिदधे विधवेव सुधाकर-
द्युतिवितानमिषेण सितांशुकम्॥"

अत्र च शैथिल्यशालिनि वर्णसन्दर्भे निष्प्राणत्वान्निरोजस्त्वात्स्वल्पपदसमासानतिविस्तृतेन हंसस्वनानुगामिना वाणीगुणेन पाञ्चालीसंज्ञाम् आश्रयन्ती माराली जातिः। गद्येऽप्येवमेव च यथोक्तगुणमनोहर एव संदृब्धस्ते प्रबन्धः। किमन्यदेवमेव हेतुरस्मदात्मलाभस्य, तदेव इच्छयसे, वाञ्छितं सिद्धमधुना, त्वत्तः कृतार्थान्नृप यामो वयमहो विहन्. ! इति प्रश्रयपुरस्सरमुदीरिते तेन स खलु कविरुत्पन्नविस्मयो मिलितकरकमलसंपुटोपलक्ष्यमाणप्रवृत्तिना शिरसैव साभ्यर्थनमनुपाय।

हंहो नृपोक्त्या युष्माभिः प्राक्प्रतारितोऽहम्, इदानीं तथ्यमावेद्यताम्, कौ किल युवाम् ? किमिति वेत्थमश्मनो रूपमापन्नौ ? कथमसावतैलवर्त्यादिपरिकरस्योद्भेदः प्रदीपस्य ? प्रदीपोन्मेषसमयमेव च कथमिदं मर्त्यशारीरिकमवस्थान्तरम् ? इदानीं तु कथं दिव्यं देहावतारमनुभूतवन्तौ ? कथमनाख्यातमन्य(न्यस्य)सर्वस्य ममेदमवगतं नाम ? कथं वाऽयमभून्निबन्धो हेतुरात्मलाभस्य युवयोरित्येवमादरात्कृतप्रश्नस्य कवेः सोड्ढलस्य स नाम तालक एव मध्यस्थं कथयितुमारेभे । भ्रातरहो कविप्रदीप ! नूनमहमस्य सकलस्यापि व्यतिकरस्य कारणमाकर्णयताम् । एष तावत्स खलु विश्वविख्यातकीर्तिः कृती रसगम्भीरसुवर्णसारया श्रियेव कादम्बर्याभि कथया पदे पदे प्रकृष्टार्थवता कोशेनेव हर्षचरितेन महानीश्वरः कवीनां वात्स्यायनवंशजन्मा सरस्वतीशिष्यः सारस्वते च स्रोतसि कवीन्द्रतिलक इति लब्धतिलकयशाः अग्रणीश्च द्विजन्मनां बाणो नाम कविः । अहं च भगवतो ब्रह्मणः सभायामिदमेव तालक इति दधानो नाम [illegible] हैरण्यिकत्वात् ब्रह्मलोकमद्दमि वयस्यस्येव देवमनुजासनं [illegible] [illegible]थं च तस्य मया कृतो [illegible]ऽभिधानमानुषेण [illegible] श्लोकः । स यथा—

[illegible] स्तौमि तं यस्य [illegible] प्रलक्षितं ।
[illegible] जन्मविषण्णं च विष्टपम् ॥

अत्र [illegible] प्रकाशमानो [illegible] सारस्वती-[illegible] बाणभट्टाख्यातिनमविच्छिन्नं च कालिदासादि-[illegible] विक्रमादित्यश्रीहर्षमुञ्जभोजदेवा [illegible] [illegible](?)विशालदेवप्रभृतिभिः सामन्तादभंक्तं कवीनां [illegible] । [illegible] साधु कवि-[illegible] [illegible] । [illegible] । [illegible] । [illegible] । [illegible]

लेन चेतसा झगित्युद्भूतकोपश्चाहं सरस्वत्याः प्रसादशिष्योऽयमित्यविमृशन्— आः ! ! स्वगर्वगरिमापहसिततसमस्तगुणिवर्ग रे कविवटो पठति मय्येवमवज्ञया स्तम्भीभूय दृषदिव स्थितोऽसि तद्यथेच्छमिह स्थितोऽसि तदामुना दुर्नयविपाकेन पाषाणप्रकृतिरेव भूत्वा मर्त्यलोके सरस्वत्यालये क्वचित्कालं क्षपयिष्यसीति शापमत्र सरस्वतीप्रख्ये च कविकुलस्य क्रोधान्धकारितप्रज्ञः प्रयुक्तवान्।

अहह ! ! ! किं किं किमेतद्बाणस्य वृत्तमिति तत्कालविहितहाहारवैः सर्वैरपि तैस्तत्रोपविष्टैः कविभिरस्यानुग्रहाय शापान्तकृते च कियतोऽप्यन्तरान्तरा दृषद्भावापदोऽस्य जंयाग्रहमभ्यर्थितेन पुनर्मया भवतु तस्मिन्नायतने सदैव दीपप्रभासंपर्कात्सकलशास्त्रावबोधनिर्मलमतिः कवितारहस्यवेदी मर्त्यशरीरेण द्विजो भूत्वा रजनीषु दृषदवस्थापगमसमनुपस्थितं सौख्यमासादयिष्यति मदेकश्लोकानवधारणोपलब्धशापस्तु यदा हि कवेः सोड्ढलस्य कृतिरपूर्वं उदयसुन्दरीति चम्पूप्रबन्धस्तमस्मितः श्रुत्वाऽवधारयिष्यति तदाऽस्य शापान्त इत्यखिलकविजनोपरोधादेतद्वितीर्णन्निजदुर्नयपरिहारकोत्पन्नाच्च महतोऽनुतापादनु (........?)गृहीत्वा कमण्डलुश्चुलके जलं बाणस्यैव शापेन मां शप्तवती।

मया तु सप्रश्रयमनुग्रहार्थमुपरुद्धा ननु बाणस्य सन्निधिमनुज्झतस्तवाप्यस्यैव शापान्तेन शापस्य पर्यवसानमिति प्रसन्नया गिरा मामनुजग्राह।

तेन च तत्क्षणे तस्मात्समकालमुभावप्यावां तथैव यथोपकल्पितया मूर्त्या झगित्यवतीर्णावस्मित्। अस्मिन्नपि निर्मानुषारण्यगह्वरगतं शून्यमायतनं देव्या इति प्रतिनिशमतिश्रद्धया मनुजदृष्टेरगोचराभिर्वनदेवताभिः स्वभावात् द्युतिशिखामात्रक एव सदैव दीप्यते स्म सुकृतेन दृषद्भावदौस्थ्यापनुत्तिहेतुरसौ प्रदीपः।

अथ ततः प्रभृत्येव महायतने स्थितिरेतावन्ति दिनान्यावयोरभूदद्य पुनः सकललोकोपकारिभारतीप्रसरस्त्वमत्र सुकवे महात्मनो निबन्धपुस्तकेनागतः श्रुतः प्रबन्धोऽवधारितश्च। तदनुभावादेव सखे शापस्य मोक्षः। नाम च तवैतत्तन्नानृषिः कुरुते काव्यमित्यस्माकमवतारस्य विदितमेवास्ति। न केवलं नाममात्रकेणैव विदितोऽसि सर्वात्मनाप्यादित एव यथाकिल बालभावमापन्नः स्वर्लोकमनुगते पितरि प्रथमगुणसम्पदामास्पदेन प्रियवयस्येन लाटभूमीपते र्योगिराजस्य गङ्गाधरइत्याख्यावता मा(न्न ?)नुना परिपालितः, सकलमनुजेन्द्रमुण्डताण्डवाचार्यचरितस्य च शौण्डीरनृपकुञ्जरगणनाग्रणीनूतनाम्नो धाम्नस्सरस्वत्याश्चौलुक्यकुलाभरणनायकस्य कीर्तिराजम्नोः सिंहराजस्य

सहाध्ययनबन्धुः, अध्यापितश्चन्द्रनाम्ना मनीषिणां वरेण, विभूत्या च लाटदेश
न्तःपातिविषयाणामन्तः स्थिकरहारीयद्विसप्ततिर्वोहिरिहारससशतकं ससशतः
चान्यदम्नापल्लीय(?)मेवमन्यतोऽपि विषयेषु कतिपु पूर्वपुरुषक्रमागताया भुवप्रवृत्ते
प्रभुः। अन्यच्च प्रदीपकश्लोकमुदितेन कोङ्कणमहीभुजा छित्तराजेन कविप्रदी
इति व्याहृतः सभायामित्यादिनानाप्रकारैर्नखल्वेकस्य मे सर्वस्याप्यात्मनोऽवता
इत्यभिमुखीभूतमनसो महर्षिवर्गस्य प्रतीतिमागतोऽसीत्येवमभिधाय तूर्ष्णी
भूय स्थितवति देवर्षौ तालके स्वयं बाणोऽपि महाकवित्वगुणावर्जितेन प्रेम्ण
बन्धुरितः सम्यगुपदेशपूर्वं वक्तुमुपाक्रमत।

भ्रातः! यथा तालकमहर्षिणा प्रोक्तस्तथैव तावकोऽयमलङ्कारनिरूपिता
शेषगुणसमग्रः प्राग्रहरो निबन्धः किमुच्यते सत्कविरसि किंतु महीयसा क्लेशेन
सिद्धं लब्धं च देव्याः प्रसादेन भारत्याः प्रबन्धमिममिदानीमितस्ततः श्रावयितु
मर्थनया मा हन्त गुणक्षेपिणि जनेऽस्मिन्सारमन्यसारीकरिष्यसि। कुतः—

ग्लपयति गिरोऽधीशां देवीं कवीनपि लज्जय-
त्यपि च नयति स्वं तृष्णान्धः कविर्लघुतामसौ।
यमपटमिव क्लीवः स्वीयं प्रबन्धमुदाहर-
न्नुदरभृतये याति द्वारं गृहस्य गृहस्य यः॥

अथ श्रियोऽर्थमेवार्जनं गुणानाम्, तत्र सम्प्रति, पश्य—

शुम्भाष्टापदकोटिकुञ्जरशतप्राप्यः समर्घा(र्घा?)इति
क्रीताः पूर्वनरेश्वरैः सरभसं ये काव्यभाजो गुणाः।
विक्रीयन्त इमे त एव पुरतो यस्यैव तस्याधुना
काकण्याऽपि मुखप्रमोटनमहो छिष्टा गुणेष्वीश्वराः॥

अपि च—

शीलं सदा सहजमीदृशमेव राज्ञां
यद्भुञ्जते श्रियममी गुणिनोऽपसार्य।
तैः शैशवेऽपि गुणवन्तमपास्य हार-
मास्वादितानि जननीकुचयोः पयांसि॥

तदेतदुच्यसे भोः कविसत्तम! प्रबन्धोऽयमीश्वरनिरपेक्षेण त्वया निवे-
दनीयस्सताम्। त्वं हि सत्त्वैकधनो मनस्वी विशेषतश्चामुना कवित्वसुकृतेन,
तत्खल्वदैन्यमेदुरमवासोऽसि पदं कवीन्द्राणामित्यादिसादरमाश्लो(श्ला?)घितेन
वचसा यथावदुपदिश्य यामो वयमिदानीमित्युवाच। कृतगमनप्रश्नोचितप्रश्र-

यश्च विजयः क्रियतामित्यालापपूर्वमुपरचितप्रणामं तं कविमाशिष्य, प्रणम्य च देवीं सरस्वतीम्, झटित्युल्लङ्घितोडुपङ्क्तया विमानयानर्द्ध्या सह महर्षिणा तालकेन तमेव ब्रह्मलोकं जगाम।

सोऽपि च कविरहो अपक्वकविताकटुरसेनामुना प्रबन्धेन विधुरितगुणेऽपि कविमात्रके मयि सुकविपदस्थापनसपक्षः पक्षपातो महाकवेर्बाणस्य। बाणोऽपि पश्यत विचेष्टितं दैवस्य येनेदमीदृशमुद्भूतशापमापन्नो दशान्तरम्। अहह दुर्द्धरा ह्येते विचित्रानन्तप्रकृतयो विधिकारपरिणामाः। भवत्वहमप्यधुना किं करोमि। अथवा जागरजडेक्षणोन्मेषः स्वपिमि तावन्न यावद्विभाति, विभाते चोत्थाय पूजयित्वा च देवीं यास्यामीति चेतसि विचिन्त्य तस्मिन्नेव मत्तवारणके पुस्तकमुच्छीर्षकीकृत्य सुप्तवान्। आयातनिद्रश्च स्वप्ने किल काव्यकथावतारिणो महाकवेरादिपुरुषाद्वाल्मीकिमहर्षितः प्रवृत्ते महीयस्यन्वये कवीनामवतीर्णमात्मनमात्मानैव लिख्यमानमद्राक्षम्। झगिति च तत्कालमेव प्रबुद्धवानितश्च जातं प्रभातमुत्थितश्च ध्वनिर्वनकुक्कुटानाम्। अथोत्थाय ससंभ्रमं ननु कीदृग्मया दृष्टः स्वप्नोऽयमये प्रसन्नया देव्या बाणस्यैव पक्षपातवचः प्रमाणीकृतम्, गणितोऽस्मि कवीन्द्ररेखायाम्, अतो यदुपदिष्टं गिरोऽधिदेवतया तत्करोम्यस्मिन्नेवायतने तद्वंशावतीर्णेनात्मना प्रशस्तमालिखामि पश्चाद्देवीमर्चयामि ततो यामीति संप्रधार्य तत्समयमुद्बुध्यागत्य मिलितेन परिचारकजनेन कृच्छ्रान्मेलितोपकरणः सपदि मरकतशिलापट्टघटितायामायतनभित्तावुत्कीर्य खटिकाद्रवधवलितैरक्षरैरभीष्टदेवताशंसनपुरस्सरं लिलेख। यथा—

पुनातु पाणिग्रहणे हरस्य दृष्टिर्मृडानीमवलोकयन्ती।
रुद्धा प्रहर्षाश्रुमिषागतेन गाङ्गेन सङ्क्षेपमिवाम्बुनाऽधः॥
आसीदसीमस्फुरितोरुधामा वाल्मीकिरग्रण्यतमो मुनीनाम्।
निर्वाणमार्गैकमहाध्वगोऽपि संपर्कितः क्वापि न यो रजोभिः॥
ब्राह्मीनिवासानुमितः स साक्षाद्देवः स्वयम्भूरिति कीर्त्तितो यः।
कोऽन्यः क्रमस्थापितवर्णसारां सृष्टिं कृती काव्यमयीं चकार॥
छंदोविचित्रैर्निहितैः क्रमेण पदैः समन्तान्मसृणीकृतान्तः।
निषेव्यते वर्णमहाटवीषु यस्यैष दिव्यैरपि काव्यमार्गः॥
वंशः कवीनामुदियाय तस्मान्मूर्ध्ना धृतो भूमिभृतां गणेन।
अच्छिद्रितेऽपि त्रिदशप्रतोषी वाणीगुणः स्फूर्जति कोऽपि यत्र॥
यस्मिन्नभूदग्रभवः कवीनां व्यासो मुनिर्यस्य गुणैर्विजेतुः।

ध्वजच्छटेवोन्नतसोमवंशमालम्बिता वल्गति भारते गीः ॥
कविर्गुणाढ्यः स च येन सृष्टा बृहत्कथा प्रीतिकरी जनानाम् ।
या संविधानेषु सुसन्धिबन्धैर्निपीड्यमानेव रसं प्रसूते ॥
स कश्चिदालेख्यकरः कवित्वे प्रसिद्धनामा भुवि भर्तृमेण्ठः ।
रसप्लवेऽपि स्फुरति प्रकामं वर्णेषु यस्योज्वलता तथैव ॥
ख्यातः कृती सोऽपि च कालिदासः शुद्धा सुधा स्वादुमती च यस्य।
वाणीमिषाच्चण्डमरीचिगोत्रसिन्धोः परं पारमवाप कीर्तिः ॥
बाणः कवीनामिह चक्रवर्ती चकास्ति यस्योज्वलवर्णशोभा ।
एकातपत्रं भुवि पुष्पभूतिवंशाश्रयं हर्षचरित्रमेव ॥
मान्यो जगत्यां भवभूतिरार्यः सारस्वते वर्त्मनि सार्थवाहः ।
वाचं पताकामिव यस्य दृष्ट्वा जनः कवीनामनुपृष्ठमेति ॥
सामन्तजन्माऽपि कवीश्वराणां महत्तमो वाक्पतिराजसूरिः ।
यश्छाययाप्यन्यमपीडयन्सन्नुत्पादयत्यर्थमनन्यदृष्टम् ॥
वन्द्यः स विद्वानभिनन्दनामा विस्रम्भपात्रं वचसोऽधिदेव्याः ।
समर्पिता यस्य खलु स्वकीयकोशाधिकारेषु सुवर्णमुद्रा ॥
यायावरः प्राज्ञवरो गुणज्ञैराशंसितः सूरिसमाजवर्यैः ।
नृत्यत्युदारं भणिते गुणस्था नटीव यस्योढरसा पदश्रीः ॥
बभूवुरन्येऽपिकुमारदासमासादयो हन्त कवीन्दवस्ते ।
यदीयगोभिः कृतिनां द्रवन्ति चेतांसि चन्द्रोपलनिर्मितानि ॥
तस्मिन्स्तुवंशे कविमौक्तिकानामुत्पत्तिभूमौ क्वचिदेकदेशे ।
कश्चित्कविः सोड्ढल इत्यजातनिष्पत्तिरासीज्जलबिन्दुरेव ॥
यो वत्सराजेन वरेण राज्ञां लाटावनीमण्डलनायकेन ।
सूक्ष्मादृढस्तोकगुणाश्रितोऽपि मित्रीकृतो भानुमतेव पद्मः ॥
जडेन तेनोदयसुन्दरीति कथा दुरालोकिनि काव्यमार्गे ।
सारस्वतालोकलवैकदृष्टा सृष्टा कविंमन्यमनोरथेन ॥
सा चात्र देवीभवने निवृत्तशापार्त्तिना बाणकवीश्वरेण ।
कविश्रमोद्भूतकृपेण सम्यक् श्रुता धृता ह्यभिनन्दिता च ॥
करिष्यते किं पिशुनोऽद्य येन न संमुखं स्थातुमपीह लब्धम् ।
तत्स्याद्भद्रं यदि दृश्यतेऽसौ विलूननासः पथि संमुखीनः ॥
दृष्टेऽपि तस्मिन्नथवा न नीचे निर्लूननासप्रतिमे दरोऽस्ति ।

विलोक्यते यद्यसुतापहर्त्ता द्रागेव देवो रविरेष साधुः॥
साधुर्जयत्यार्त्तिहरः कवीनां कवीश्वराः सूक्तसृजो जयन्ति।
जयन्ति सूक्तानि फलं हि वाचां वाचामधीशा जयतीह देवी॥

इत्येवमिमामात्मनः ख्यातिमयीं प्रशस्तिमभिलिख्य यथोपनी(न?) तैर्वनसरोऽम्बुजादिकुसुमोपहारवस्तुभिरसीमया भक्त्या देवीमभ्यर्चयामास भारतीम्।

निर्वर्त्तितपरमपूजोपचारकृत्यश्च कृतकृत्य इवानेकसूक्तोपशालिनीभिः स्तुतिभिः स्तुत्वा प्रणम्य क्षमयित्वा च भगवतीं निर्गतस्तस्मादानन्दनिर्भरश्च रभसोत्सुकेन चेतसा नगरमाजगाम।

विवेश चात्मनो भवनं मिलितश्च मित्राणामेकश्च तेषु सुललितपदोपन्यासवाणीतरङ्गदुग्धाम्बुधिरशोकवतीति कथानिबन्धस्य कर्त्ता महाकविश्चन्दनाचार्यनाम्ना श्वेताम्बरः सूरिः, श्वेताम्बरसूरिरन्यश्चाशुकवितया परमं प्रकर्षमापन्नः खड्गकाव्यपरितुष्टेन महीभुजा नागार्जुनराजेन खड्गाचार्य इति प्रदत्तापरनामधेयो विजयसिंहाचार्यः कविः, कविरपरश्च सकललोकोपरञ्जकानामास्पदमशेषतो गुणानामभिनवो वयसा साक्षाद्बिम्बमष्टापदोपरचितं जैनेन्द्रमनुहरन्त्या मनोहरो मूर्त्त्या दिगम्बराचार्यो भाषात्रयविपश्चिकश्च नाम्ना महाकीर्तिः, इन्द्रनाम्ना च रत्नमञ्जरीति चम्पूकथायाः स्रष्टा, सर्वहितालापशालिभिर्गुणैरग्रणीश्च सतां सत्कविरित्यादिभिर्मित्रैर्वीनद्धिरास्तैर्बन्धुभिश्चानवरतमापृच्छ्यमानवृत्तान्तो विलोक्यमानप्रबन्धः प्रशस्यमानगुणश्च विश्राम्यन् कियन्त्येव यावदास्ते दिनानि तावदेकहेलयैव भूपालभुम्मडस्य कविकुञ्जरद(व?) लङ्कलुण्ठनेराक्रान्तधराविरोधिनखरायुधस्य कोङ्कणमहीभुजो मुम्मुणिराजस्यान्तिकादाजगाम कविः पाठकश्च भाषात्रयस्य त्यागी वस्ती च परमं मित्रमार्यशिवादवनीश्वरस्य तस्य च कवेर्बन्धुरिव मधुरसाहारनामा सौजन्यगुणास्पदं भटः। यः खलु परिक्रम्य परितोऽपि मण्डलान्तरेषु मन्त्रमाण्डलिकाकुलानामावलीमात्मनो भर्तुरावर्जयन् अदित्सुमारम्भानात्त दर्पज्वरं गलहस्तयन्। येन हि परास्थानं गतेन प्रौढपदप्रेरणे समरस्थानेऽस्य स्ववशता निजस्वामिनः समानानीतो झगिति गर्वितारिमण्डलीकस्य कण्ठकन्दलं सर्वदः।

स चागत्य स्वभावादानन्दरसनिर्भरमालिङ्गितो निर्भरं सोड्ढलेन प्रीत्या यथासनमुपविष्टः वक्तुमारेभे। भोः कवीन्द्र! त्वया स्वयमेव कृता चम्पूरूपमुदयसुन्दरीति कथा। सा च निर्मितावस्थैवेति श्रुत्वा नरेन्द्रे

शापागतस्य श्राविता बाणभट्टस्य । तेन च निशम्य सम्यगभिनन्दितेति कवि-
प्रियेण स्वामिना मुम्मुणिराजेन श्रुतं च यथा तथा शृणु । शूर्पारकनगरादाग-
च्छता लाटेन्द्रकुलशेखरेण भूभृता वत्सराजेन कथंचिदध्वनः सन्निवेशात्तस्मि-
न्नायतने प्रविश्योपविष्टेन दृष्टा झटित्येव भित्तौ प्रशस्तिः । तदोपलब्धोऽयमेव-
मालिखितो व्यतिकरः । तत्कौतुकाहितरसेन च ते(न)प्रथमं भवन्तमाहूय यथैव
संवीक्षितः प्रबन्धो यथा च मत्पठितार्यावधारणनिबन्धना निबन्धसृष्टिरासीदिति
ज्ञातं यथाऽयमाश्चर्यहेतुराकर्णितो बाणभट्टस्य वृत्तान्तः तत्सर्वमसमविस्मयरसा-
क्षिप्तहृदयेन निवेदितं राज्ञे । राजा च सुदूरमभिवर्द्धितानुरागवृत्तिरतित्व-
रमिदानीमेव भवन्तमीहते द्रष्टुमादिष्टश्च मित्रमिति त्वदानयनार्थमह-
मतो निर्विलम्बमुत्थीयतां गम्यतामित्येव भाषितस्तेन क्रियत एवमिति गृहीत्वा
पुस्तकमगाद्राजकुलमवाप चास्थानमण्डपम् । प्रविष्टश्च तत्रान्तरग्रे सेवागतं
मण्डलान्निजपतिप्रतापालोकडम्बरेणेव प्रेङ्खता प्रवरमणिदलकलापदीप्ताङ्गभू-
षणांशुपटलेन नृपलोकं सामन्तचक्रमास्थानलोकं च सकलमनुक्रमि-
कावलोकमानमग्रे च तस्मादखिलविद्यावग्रहमहामतिमचिन्त्यसिद्धेश्च मार्ग-
दर्शनादिन्द्रपदस्य रागिणं गुणेषु सहजसौजन्यवत्सलममलकाव्यरसतरंगा-
हतं प्रमाणं कविपुङ्गवानामपश्यत् । तस्य चानेकगुणगम्भीराभोगमहनीयस्य सर्व-
कविराजचक्रस्य विमलहेमसिंहासनोपविष्टमुपरिष्टाक्रान्तः पर्यन्तलम्बितावि-
स्तरणिमुक्ताकलापचञ्चलचारुणो हरितचीनातपत्रस्य मूले विद्याधरमिव लीलया
कल्पवितानतले निषण्णम्, क्षितिभृत्कुलमहाबलं भुजलग्नमुद्राङ्कितभुवि-
वासान्तमनिलमुन्मुञ्चता चामरेण सनाथकरतलाभिः पार्श्वयोश्चामरधारिणीभि-
रुपवीज्यमानम्, क्षत्रियशौण्डीरमिन्द्रमिव व्यक्तत्रिलोचनम्, उपेन्द्रमिव
निकुलान्तरसुन्दरमभ्युदयम्, हरमिव सुलोचनम्, ब्रह्माणमिव क्षत्रियकुलेऽवतीर्णम्,
मन्दरमिव सारम्, रविमिव भुजावष्टम्भितप्रतापम्, इन्दुमिवाह्लादकारिविशुद्धा-
नन्दम्, अभिनवराजन्यचूडामणिं मुम्मुणिराजमद्राक्षीत् । यस्यातिविस्तृतानेक-
विषयवर्तिना गुणगणेन वशमेते सर्वेऽपि पतितदृग्यथावनावितताभिरभिरामा-
विरचितस्तुतिभिः सिन्धुर्वृत्तिभिरुद्घोषितपदो दाम इति प्रतिष्ठानामा स नाम
कीर्तितो जगति ।

तेन हि प्रतिनयनतंसोत्पलकृताञ्जलिप्रविश्यातिथिना राज्ञा सुमनस्कमिव
दूरात् विलोक्य संभाष्य च परिजनोपनयनपूर्वेण वचसा संमानितः स कवि-
र्नवोचितानन्दश्च सर्वैरपि सभ्यैरावृतः सुकृतानन्दः कविरः । अथान्यां

सानन्दकथाकर्णनरसोत्सुकेन भूभृता पुनस्तन्मु(स्वमु?)खेनैव स्फुटीकृतं(त्य?) वत्सराजनिवेदितं वृत्तमादिष्टः प्रबन्धपठनाय सर्वतोऽपि कविभ्यो गृहीतानुमतिरुत्क्षिप्य बन्धात्पुस्तकमादौ भारतीमवनम्य ततः पूर्वकवीननुध्यातवान् ।

वागीश्वरं हन्त र(भ)जेऽभिनन्द-
मर्थेश्वरं वाक्पतिराजमीडे ।
रसेश्वरं स्तौमि च कालिदासं
बाणं तु सर्वेश्वरमानतोऽस्मि ॥

इत्यभिप्रेतां कविचतुष्टयीमनुस्मृत्य वाचयितुमारब्धवान् । क्रमेण(कतिपयैः) दिवसैस्तं सर्वमपि श्रावयामास । वाचितप्रबन्धश्च परितुष्टेन रभसादुचितमात्मनो गुणानाम् , अनुरूपं च कविक्लेशस्य, सदृशं च कवितान्युत्पत्तिकौशलस्य, योग्यं च कथारसविभूतेः, यथावदतिमनोरथैर्वस्तुभिर्महता संमानडम्बरेण पूजितो राज्ञा सर्वैश्च तैः सभावर्त्तिभिः साधुकारितो लोकैरभिनन्दितः कविभिः(प्र)शंसितो विशिष्टैरालिङ्गितस्तु मित्रैराजगाम गृहम् । आगतश्च गृहमकृतदेवायतनादिकीर्त्तनमकिंचनस्य धनमजातपुत्रस्य सूनुरनासकामिनीसंभोगस्य रतिसुखमनार्जितयशसो यशश्चेत्यादिभिश्चतुर्वर्गफलो निबन्ध इति तयाकल्पश्रिया ज्ञापितसंसारफल इव सफलीकृतमनुष्यजातिरिव दृष्टादृश्य इव समवालम्ब इव सिद्धासाध्य इव च त्रिभुवनाधिपत्यलाभाधिकां निर्वृतिमवाप ।

प्रबन्धस्य च प्रचारमुपरिष्टाच्चिन्तयन् विनयोपरचितकरसंपुटाञ्जलिरुवाच सज्जनः सर्वान्—

वृत्तेभ्यः किल किं भयं न च भयं तेभ्योऽपि ये सांप्रतं
वर्त्तन्ते कवयः प्रबन्धकरणक्लेशोपलब्धश्रमाः ।
अन्येभ्यश्चकितोऽस्मि वृत्तकवितानाम्रेण भाण्डारिणो
ये तेषामभितोऽप्यनत्वविदुषां शृङ्गे न पुच्छे ग्रहः ॥

ततश्च—

ये तावत्किल कृत्स्नवाङ्मयविदस्ते सन्तु दूरं बुधा
ओमित्यक्षरमात्रकेण विदुषामप्येष वद्धोऽञ्जलिः ।
कीदृशस्तु कथेयमत्रसकलैरात्मपद्......
.... ॥
.... इति
....
दमार्थिना अपि परोपकृतौ रतात्मे ।

ते सर्वकालमियदेव परं भणामि
यावन्न कल्पशतमभ्युदय………… ॥
…………………………त्ति नन्दन्तु ते
ये कुर्वन्त्यजरामरान्नरपतीन्काव्येषु सूक्तामृतैः ।
तेऽपि क्ष्मापतयो जयन्ति जगतामारक्षिभिर्यैरसौ
भूर्भास्वद्भुजवज्रदण्डदलितानिष्टै(स्स)मानन्दति ॥
अपि जयति जगत्यामि(ष्ट)देवः पिनाकी
जयति स च पिनाकिन्युज्वला यस्य भक्तिः ।
जयति जयति चासावत्र चम्पूकथायां
शिवनुतिपदपू(र्णा) हन्त सारस्वतश्रीः ॥

॥ इति कायस्थकविसोड्ढलविनिर्मितायामुदयसुन्दरीकथायां
सर्वानन्दो नाम सारस्वतश्रीपदाङ्कोऽष्टम-
उच्छ्वासकः ॥

॥ समाप्तेयमुदयसुंदरीकथाचम्पूः ॥

Index of proper names occurring in the Udayasundarikathâ.

Index of Geographical names occurring in the Udayasundarikathâ.

शुद्धिपत्रम् ।



पृ.	प.	अशुद्धम्	शुद्धम्
२	८	स्तूत्रम्	च्छिद्रं (?)
२	१८	करटीन्दु	करटीन्द्र
३	२३	तया	तयाऽत्र
८	२६	वरूथिनी	वरूथिनीको
८	२९	मुखा	मुखा
९	२१	सुधासमु	समु
,,	२२	मधुरया	सुधामधुरया
१०	५	कर्तुं	कर्तुं
,,	१३	निवेशितेण	निवेशितेन
११	९	विलया	वलया
१८	१६	कवीन्द्रेद्वे	कवीन्द्रेद्वि
२०	११	मित्रतिष्ठ	मत्रतिष्ठ
२३	३	काम	क्राम
२५	५	जलता	ज्यालता
२८	२८	मत्यद्भत	मत्यद्भुत
३४	४	गतो	गमितो
,,	२४	एव ।	एव
,,	,,	पीडा	पीडा ।
,,	२७	द्वाःस्था	द्वाःस्थो
,,	,,	पति	पती
,,	३०	मेपा	सेवा
३७	१२	मुन्निवे	सन्निवे
३७	२३	नोदित	नोजति
३८	२१	निवासः ।	निवासः
,,	,,	पञ्जरके	पञ्जरके ।
३९	८	शिरः	सर
३९	१६	भूमिरुल्लसिता	भूमिः, उल्लसता
,,	१७	वर्ता शिरः	वर्ताशिरः
,,	,,	पांसुर्लुलता	पांसुः, लुलता
,,	२२	स्वयं	समयं
४४	१२	मूर्द्धि	मूर्द्धि
५९	११	मन्दा	मन्द
६०	१४	घन	घन
६०	२०	आलाका	कन्यका

पृ.	प.	अशुद्धम्	शुद्धम्
६५	२८	झूर्ति	झूर्ति
६६	२४	मिव	मिव
७२	४	मातुं–	मातु
७६	८	।	,
८२	२६	दरिको	दराको
९१	१	रावतो	रावृतो
९७	२०	वल्ली	वल्ली
१००	११	शि	शि–
१०२	२६	मया;	मया
१०८	२२	शक्ति	शुक्ति
[illegible]	,,	वृत्र	ऋक्ष
१३७	१४	स्प	स्प–
११४	१८	(छां ?)	
१२४	१९	छंपा	क्षम्या
,,	,,	(मनवष्टन्मनपतव ?)	
१४४	५	स्दय	हृय
१५१	१४	इत्तुलङ्के	क्षुल्के
,,	२८	वोगि	गोगि
,,	,,	मा (सु ?) तुना	मातुलेन
१५४	१८	माता	मासा
१५५	२४	मटः	मटः